CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* श्रीः *

मनोविज्ञानम् ।

आयुर्वेदरत्नाकर–वैष्णवधर्मसंरक्षक–
वैद्यरत्न–सर्वतन्त्रस्वतन्त्र–
पं० श्रीब्रजविहारिचतुर्वेदि-
विरचितम् ।

सर्वतन्त्रस्वतन्त्र-
पण्डितश्रीबालबोधमिश्र-
संशोधितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६।२६।२८८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* श्रीगणेशाय नमः *

मनोविज्ञानम् ।

आयुर्वेदरत्नाकर-वैष्णवधर्म्मसंरक्षक-

वैद्यरत्न-सर्वतन्त्रस्वतन्त्र-

पं० श्रीव्रजविहारिचतुर्वेदि-

विरचितम् ।

सर्वतन्त्रस्वतन्त्रपण्डितश्रीबालबोधमिश्र-

संशोधितम् ।

तच्च-

काश्यां 'मास्टरप्रिण्टिङ्गवर्क्स' नामकयन्त्रालये

मुद्रापय्य प्रकाशितम् ।

अस्य सर्वेऽधिकाराः प्रणेत्रा स्वायत्तीकृताः ।

वैक्रमाब्दाः १९९७ शकाब्दाः १८६२

खृष्टाब्दाः १९४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रक—
श्रीमन्नालाल अभिमन्यु एम.ए.
मास्टर प्रिण्टिङ्ग वर्क्स,
बलानाला, बनारस।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तावना ।

सुविदितमेवैतत्तत्रभवतां भवतां विपश्चितां यत्, सकल एव जनः 'परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः' इति, 'प्रतिकूलवेदनीयं दुःखम्' इति, 'दुःखत्रयाऽभिघातात्' इति च वचनजातं-प्रत्यक्षानुमानप्रतिपन्नदुःखत्रयपरीतात्संसारादुद्विजमानः, अत एवैकान्तिकात्यन्तिकतत्परिहारोपायं गवेषमाणः, 'तत्त्वज्ञानान्निश्श्रेयसाधिगमः' इति तत्त्वज्ञानं निरतिशयानन्दरूपमात्यन्तिकदुःखनिवृत्तिरूपं वा निश्श्रेयसं दुःखविरोधितया तत्परिहाररूपं प्रत्युपायभूतं विज्ञायाऽपि तत्त्वं द्रव्यादि-प्रमाणादि-जीवब्रह्मैक्य-प्रकृतिपुरुषविवेकरूपेण नानाशास्त्रप्रतिपन्ननानारूपतया सर्वोपसंहारमन्तरा सुखेन ज्ञातुमशक्यमिति तदुपसंहारमाकाङ्क्षति । तदयमाचार्य्यः करुणया प्रवर्त्तमानः सकलदर्शनपारदृश्वा परावरज्ञः साक्षात्कृतधर्म्मा नामप्रतिपन्नविष्णुभावः समुपसञ्जिहीर्षया शास्त्रमिदं मनोविज्ञाननामकं प्रणिनाय । तदिदं शास्त्रं समुपसंहृततत्त्वजातं समुपसंहृतजगज्जालं ब्रह्मतत्त्वमिव समुपसंहृतसकलरसं मध्विव प्रपाणकमिव च कियन्माहात्म्यमिति । प्रणेता चायमाचार्य्यः शास्त्रं ज्ञेयैकदेशार्थमपि प्रणेता ततोऽप्यधिकतरविज्ञानः पाणिन्यादिरिव व्याकरणादिप्रणेतेति कियद्विज्ञानवानिति च सुधियां स्वयं प्रतिपन्नमिति पुनरुक्तभिया न वचनप्रतिपादनमर्हतीति यन्त्रप्रमादोपनतां त्रुटिमेव क्षमापयन् विरमति—

पौषकृष्णतृतीया सं० १९९७	विदुषां विधेयः— **श्रीबालबोधमिश्रः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोविज्ञानविषयानुक्रमणिका ।

विषयाः—	पृ०पं०
मङ्गलाचरणम्	२१-१
प्रसङ्गागतभागवतमङ्गलव्याख्याने ज्ञानपूर्वकवाक्यरचनविचारः	२४-२२
कर्त्तुः स्वातन्त्र्यम्	२५-१
ईश्वरस्य सृष्टिप्रवृत्तौ प्रयोजनाऽप्रयोजनविचारः	,,-१२
जगन्मिथ्यात्वम्	,,-२४
पुरुषार्थविचारे दुःखनिवृत्तिरूपे लोकतो योगतः पूर्वपक्षः	२७-१
परमानन्दरूपे मीमांसातःपूर्वपक्षः	,,-१०
आद्ये-साङ्ख्यमतेन सिद्धान्तः	,,-१९
द्वितीये-वेदान्तमतेन सिद्धान्तः	२८-९
पुरुषार्थे स्वतस्त्वपरतस्त्वविचारः	,,-१४
मोक्षे आत्मज्ञानस्य साधनत्वम्	,,-१७
ब्रह्मणो जिज्ञास्यत्वम्	,,-२३
इन्द्रियविचारः	३०-१०
मनोविचारे मनसः सिद्धिः	३५-५
मनसो वादिभेदेन-इन्द्रियत्वाऽनिन्द्रियत्वविचारः	,,-२०
मनस एव योगदर्शितदिशा मोक्षकारणत्वम्	३६-११
योगदर्शितदिशा-ईश्वरसिद्धिविचारः	,,-२३
मनसः प्रतिशरीरमेकत्वम्	३७-५
मनसो लिङ्गवर्णनम्	,,-२०
शरीरस्य त्रैविध्यम्	३८-२१
व्यवहारानुसारिपदार्थकल्पनम्	३९-५
न्यायविचारः	४०-२
ज्ञानसामान्यकारणविचारः	,, -९
ज्ञानयौगपद्यायौगपद्यविचारः	४१-३
अध्यासविचारः	,,-११
ख्यातिविचारः	,,-१७
शब्दस्य नित्याऽनित्यत्वम्	४२-५
द्रव्यगुणादीनां भेदाऽभेदविचारः	,,-१८
मनसश्चातुर्विध्यम्	४३-१२
प्रत्यभिज्ञाविचारः	४४-२
परमाणुकार्य्यत्वादिविचारः	४५-२
जातिसामान्यविशेषविचारः	,, -९
शब्दार्थसम्बन्धनित्याऽनित्यत्वप्रतिपादनम्	४६-४
मनोजन्यत्वनित्यत्वे श्रुतिस्मृतिबलाबलत्वम्	४७-१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः—	पृ०पं०
मनोमाहात्म्यम्	४९-१
मनोबुद्ध्यादिभेदाऽभेदत्वम्	५३-१५
मनोवृत्तिबुद्धिवर्णनम्	५६-९
प्रमाणभेदविचारः	,, -१४
मतभेदेनानुमानादिप्राधान्यविचारः	,,-१८
बुद्धित्रैविध्यादिविचारः	५७-१९
कर्म्मभेदप्रतिपादनम्	६०-३
विद्याऽविद्यामीमांसा	,,-२२
बुद्धिक्षणिकत्वविवेकः	६१-२२
बुद्धेर्ह्रासवृद्धिभावौ	६२-१६
आत्मविचारः	६३-३
पुरुषसिद्धिस्तद्बहुत्वसिद्धिश्च	६४-२६
प्रधानस्य स्वातन्त्र्यम्	६५-२३
आत्मनः शरीरादिपार्थक्य-महत्त्वविचारः	६८-८
जीवेश्वरभेदाऽभेदविचारः	६९-८
ईश्वरजीवमतभेदविचारः	,,-२१
सृष्टिहेतुत्वम्	७०-६
लिङ्गशरीरवर्णनम्	७१-४
अवस्थात्रयवर्णनम्	७२-२०
मोक्षस्वरूपवर्णनम्	७३-४
पुरुषपदनिरुक्तिः	७४-६
देहान्तरप्राप्तेः कर्म्मनिमित्तकत्वम्	,, -११

विषयाः—	पृ०पं०
प्रकृतिस्वरूपविचारः	७४-२४
मायाऽविद्ययोः स्वरूपप्रतिपादनम्	७५-१
प्रकृतेः सर्वमूलत्वम्	७५-११
सुखाद्यात्मकसत्त्वरजस्तमः—स्वरूपत्वम्	,, -१४
व्यक्ताऽव्यक्तपुरुषाणां साधर्म्य-वैधर्म्ये	७६-१७
मूलकारणे मतभेदः	७७-१०
ब्रह्मलक्षणविचारः	७९-१२
जगतो ब्रह्मस्वरूपत्वम्	८१-३
अपसिद्धान्तदोषपरिहारः	८२-१२
जिज्ञास्यब्रह्मपदार्थविचारः	,, -२२
ज्ञानपदार्थविचारः	८३-११
ब्रह्मविचारेऽनुबन्धचतुष्टय-प्रदर्शनम्	,, -१८
आत्मनः प्राधान्यम्	८५-४
आत्मनो वागगोचरत्वम्	८६-१
आत्मनःसुखाद्यननुसङ्गित्वम्	८८-९
आत्मनो भेदाऽभेदपरिमाण-विचारः	,, १७
तत्त्वज्ञानबाधेऽनिष्टप्रसक्तिः	८९-९
आत्मनः प्रमाणगोचरत्वम्	,,-१६
ब्रह्मोपासनफलम्	,,-२४
जगतः आत्मकर्तृत्वम्	९०-१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः—	पृ०पं०
ब्रह्मणो लोकपादकल्पनम्	९१-१९
ब्रह्मणः स्वमहिम्नि प्रतिष्ठितत्वम्	९२-२०
ब्रह्मण एव कल्पनया जीवादि-प्रपञ्चभावः	९३-१०
श्रुतीनामद्वैततात्पर्य्यकत्वम्	९७-४
वादिनां मार्गभेदविचारः	,, -१३
मिथ्यात्वलक्षणम्	,, -२२
अभेदस्य भेदाऽबाध्यत्वम्	९८-१६
द्वैतशास्त्राणां पाषण्डरूपत्वम्	९९-१४
विवर्त्तपरिणामविचारः	१००-१०
प्रतिबिम्बादिवादः	,, -२४
विद्याऽविद्ययोर्मोक्षबन्ध-हेतुत्वम्	,, -२५
अन्तःकरणादिप्रवृत्तेः पुरु-षार्थहेतुकत्वम्	१०२-१७
मिथोविरुद्धस्यापि सत्त्वादेः कार्य्यकरत्वम्	१०३-१
आत्मनः स्वयंप्रकाशत्वम्	,, -१५
प्रत्यक्षागमयोरागमस्य प्राबल्यम्	,, -२२
आगमस्य मायिकत्वेऽपि ब्रह्मणि मानत्वम्	१०४-९
अखण्डार्थत्वविचारः	,,-२५
पुरुषस्य स्वतः शुद्धरूपत्वम्	१०५-४

विषयाः—	पृ०पं०
संसाराभासस्याविचारित-रमणीयत्वम्	१०५-२२
ब्रह्मण एवाविद्याविषया-श्रयत्वम्	१०६-११
शरीरे आत्मसम्बन्धस्य चैतन्यहेतुत्वम्	१०७-९
आप्तलक्षणम्	,,-१९
समनस्कचेतनाधातोः पुरुषशब्दप्रतिपाद्यत्वम्	१०८-११
मनसो विषयग्रहणे इन्द्रिय-सापेक्षऽत्वानापेक्षत्वम्	,,-२३
कर्म्मफलस्य ज्ञातव्यत्वम्	११०-१९
पुरुषस्य सर्वकारणत्वम्	,, -२४
शरीरस्य भोगायतनत्वमा-त्मसम्बन्धप्रयुक्तम्	१११-८
आत्मनो ज्ञानवत्त्वं करण-प्रयुक्तम्	,,-२३
आत्मादीनां नित्यत्वाऽनि-त्यत्वे	११२-८
सृष्टेर्बुद्ध्यादिक्रमिकत्वम्	,,-२०
संसारस्य रागादिहेतुकत्वम्	११३-६
योगविचारः	११५-६
देहान्तरप्रतिपत्तिः	,,-१४
आत्मनो रोगनैरुज्ये	११६-३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः— पृ०पं०

आत्मनो ज्ञानवत्त्वं मनोयोगाधीनत्वम् ११६-१७
शुद्धसत्त्वस्य सर्वसाधनसौकर्य्यम् ११७-१८
रोगनैरुज्ययोर्विकृताविकृतस्रोतःप्रयुक्तत्वम् ११७-१९
स्रोतसां नानाविधत्वम् ११८-१५
पञ्चोष्मणोऽशितपीतादिपाकनिमित्तत्वम् १२०-१८
रोगाणां रसादिदोषनिमित्तत्वम् १२१-३
रोगाणां प्राप्तिपरिहारोपायाः १२२-६
मरणस्वरूपविचारः १२४-१०
जन्ममरणहेतुविचारः १२६-२०
आत्मनः पदार्थाऽऽकलने बुद्धिवृत्तिद्वारकत्वम् १३०-१२
श्राद्धविचारः १३२-६
वासनासद्भावविचारः ,, -२३
आतिवाहिकशरीरविवेकः १३३-१४

विषयाः— पृ०पं०

योगिनां मरणद्वैविध्यम् १३३-१८
जगद्भ्रमकारणविचारः १३४-२१
अविद्योपाधिकस्यैव ब्रह्मणो जगत्कारणत्वम् १४२-१२
सुखदुःखादिभोगस्य वासनानुरूपत्वम् १४३-२०
जगतां ब्रह्मशक्त्याविर्भावरूपत्वम् १४४-१०
कार्य्यब्रह्मणो व्योमजत्वादिविचारः १४७-१२
जगत्प्रवाहस्य नित्यानित्यविचारः १४९-१८
जगतः ईश्वरसङ्कल्पजन्यत्वम् १५१-९
जगतो ब्रह्मस्वरूपत्वम् १५४-३
वेदादिसिद्धतत्त्वजातसङ्कलनम् ,,-२१
मनसः प्राधान्यप्रतिपादनम् १५६-२
उपसंहारश्लोकाः ,,-६
ग्रन्थान्तमङ्गलम् १५७-१३

॥ इतिशम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* श्रीगणेशाय नमः *

अथ मनोविज्ञानम् ।

मनोविज्ञानतन्त्रस्य सुखबोधाय भूमिका ।
शास्त्रसञ्चयसारांशैः क्रियते कृतिनां मुदे ॥

अथेदमालोच्यते "मन एव मनुष्याणां कारणं सुखदुःखयोः" इति, "मनसैवानुद्रष्टव्यम्" इति च मन एव भोगापवर्गकारणमिति तद्विज्ञानमेव सर्वैरेषितव्यमिति मनोविज्ञाननामकं तन्त्रमारब्धम्, तदत्र नानाशास्त्रसारांशप्रदर्शनमस्यैव स्थूणानिखननन्यायेन शेषभूतमिति नासंगतानुपयुक्तपुनरुक्ताभिधानमाशङ्कनीयमिति ॥

"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत् ।
लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम् ॥
स पुमाँश्चेतनं तच्च तच्चाधिकरणं स्मृतम् ।"

अत्र सत्त्वं सत्त्वसंज्ञकं मनः "रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तेः । आत्मा चेतनः सत्त्वादित्रिगुणलक्षणं व्यक्तं चतुर्विंशतितत्त्वञ्च भूतात्मा इन्द्रियात्मेत्यात्मशब्दस्य नानार्थत्वात् । शरीरं पाञ्चभौतिकं चेतनाधिष्ठानभूतं स्थूलं गृह्यते । तत्त्वाहङ्कारिकेन्द्रियादिसंघातरूपं सूक्ष्मम्, चेष्टानधिकरणत्वात् । तदेतत्त्रयं मिलितं सर्वप्रतिष्ठाभूतं लोकश्चतुर्दशभुवनात्मकं ब्रह्माण्डरूपं "लोक्यत इति लोकः" कर्मघञा लोकृदर्शने इत्यतोव्युत्पत्तेस्त्रिदण्डवदिति निदर्शनम् । तद्यथा—दण्डत्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्येकं धारणासमर्थमपि मिलितं धारयति, एवमेतत्त्रयं प्रत्येकं किञ्चित्करणाक्षममपि मिलितं जगद्रूपं सर्वसम्पादनसमर्थमिति । तदेव वियुक्तं धारणासमर्थं पञ्चत्वं गतवतामिति । तत्त्रितयं सक्रिययोगाधारजीवनमायुरुच्यते । आयुर्लक्षणे पृथगिन्द्रियस्य ग्रहणं बाह्येन्द्रियाणामप्रत्यक्षेऽपि वृक्षादीनामान्तरेन्द्रियसद्भावाज्जीवत्वप्रदर्शनार्थम् । अत एव छेदनजलदानाभ्यां पत्रसङ्कोचविकाशदर्शनेन सुखदुःखानुमानम् । तददर्शनेन घटादीनां तदभावः । तत्र सर्वं प्रतिष्ठितमिति । तत्र सत्त्वादित्रितयरूपे लोके सर्वं ब्रह्मादिस्थावरान्तं यावद्वस्तु प्रतिष्ठितं शरीरे समुपलभ्यमानं शरीरस्यापि लोकत्वं गमयति । "लोकस्तु भुवने जने" इति सत्यप्यभिधाने आकाशादीनां सद्भावासद्भाववैलक्षण्यात् केन साम्येन लोकशब्द उभयसाधारण इत्युक्तं तत्रसर्वमिति । उपलभ्यते च शरीरेप्यवकाशादिनाऽऽकाशादीति लोकत्वं सिद्ध्यतीति । कारणानुरूपं कार्य्यमितिस्थिते सत्त्वाद्यचेतनमिति कथं चेतनधर्म्मेच्छादिमदिति चोद्यम्, सगुणात्मवादे भवदपि निर्गुणात्मवादे नावतरति, सत्त्वस्यैवेच्छादिपरिणामात् । तथा च श्रुतिः— "कामः सङ्कल्पो विचिकित्सा ह्रीर्धीर्भीरित्येतत्सर्वं मनएव" इति । सामानाधिकरण्यन्तु वृत्तिवृत्तिमतोरभेदादिति । सत्त्वात्मशरीरसमुदायस्य पुरुषशब्देन व्यवहारादेवेच्छादिगुणलाभः । आत्मा निर्गुणोऽपि सत्त्वगुणेन्द्रिययोगाच्चेतन इति व्यवह्रियते । तदुक्तम्—"मात्रास्पर्शास्तुकौन्तेय शीतोष्णसुखदुःखदा" इति । "मीयन्ते विषया आभिरिति मात्रा इन्द्रियाणि" इति । उपचारादेव मनोधर्म्मसुखदुःखेच्छाधृतिबुद्धिस्मृतिसन्देहभ्रान्तिमान् स्वस्वरूपानभिज्ञो भवति । तदुक्तम्—"वृत्तिसारूप्यमितरत्र" इति । स्थूलसूक्ष्मशरीराद्युपाधिवशादेव च जाग्रदाद्यवस्थावान् विश्वतैजसप्राज्ञशब्दभाक् अविद्यावशादेव चाहं कर्त्ता भोक्ता देवदत्तो यज्ञदत्त इत्यभिमन्यमानः संसारी व्यपदिश्यते । यदा तु श्रवणादिनाऽवगतिपर्य्यन्तेन श्रुत्या "तत्त्वमसि" "अयमात्मा ब्रह्म" इति बोधितो राजपुत्र इव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्प्रबोधादात्मानं शवरं मन्यमानो राजपुत्रस्त्वमिति बोधितोऽहं ब्रह्मास्मीति मन्यते । विद्यया तदाऽविद्याकृतसंसारधर्म्मापनयेन स्वस्वरूपावस्थः स्वस्थो भवति । तदुक्तम्—"तदा द्रष्टुः स्वरूपेऽवस्थानम्" इति । अपि चायमात्मा प्रागपि ब्रह्मैव सन् सर्गान्तरसंस्कारोदयेन द्विविधाऽविद्योपाधिक ऐन्द्रजालिकवत्कोषकारकीटवद्वा बाललीलान्यायेन व्याकृतनामरूपसंसारप्रवेशेन जीवभावमापद्यते । तथा च श्रुतिः—"सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयं तदैक्षद्बहुस्याम् प्रजायेय अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि"इति । गर्भोपनिषद्दर्शितदिशा कललबुद्बुदपेशीकरण्डादिक्रमेण गर्भावस्थासाद्य दुःखमनुभवन् ध्यायेम चरणकमलमिति परमात्मानं प्रार्थयन्नपि निःसृत्य विस्मृतसंस्कारो भवति । कदाचित्तु बालवल्लीलानिर्मितोपसंहारेणोदासीनो भवति । तदुक्तम्—"लोकवत्तु लीलाकैवल्यम्" इति । कतिधा पुरुषीये—

तत्रश्लोकौ—"अत्र कर्म फलश्चात्र ज्ञानश्चात्र प्रतिष्ठितम्
अत्र मोहः सुखं दुःखं जीवितं मरणं स्वता ।
अचेतनं क्रियावच्च चेतश्चेतयिता परः
युक्तस्य मनसा तस्य निर्दिशन्ते विभोःक्रियाः ॥"

इति चरकवचनमपि "अत्र सर्वं प्रतिष्ठितम्" इति पूर्वोक्तमनुवदति । सत्त्वात्मशरीराणां साम्यासाम्यकृतं सुखदुःखादि तदधीनस्यात्मनो व्यपदिश्यते । सत्त्वरजस्तमसामाद्यं सुखाश्रयभूतम्, इतरे दुःखाश्रयभूते इत्यपिसत्त्वादीनां पृथगुपादाने प्रयोजनमेकं न प्रत्येकं कर्म्मसामर्थ्ये परस्परापेक्षत्वात्, तेन ज्ञाप्यते त्रयाणां समप्रधानत्वम् । परस्पराश्रयत्वादेव न पृथक् प्राधान्यम्—तदुक्तम्—"नानुबन्धकृतमनेकात्त्वम्" इति, "अन्योन्यमिथुनाः सर्वे" इति च । सत्त्वादिप्राधान्याप्राधान्यकृतमेव देवादीनां सुखदुःखादितारतम्यम्—तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Funding: MIDF

"ऊद्र्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालः संक्षेपतो भौतिकः सर्गः॥"

इति मनुष्यादिकार्य्यब्रह्मपर्य्यन्तं तारतम्येन वर्त्तमानमानन्दं ब्रह्मणि निरतिशयमुक्तं श्रुतौ। सत्त्वात्मशरीरेषु भोक्तृतयाऽऽत्मनः प्राधान्येंऽपि सत्त्वस्य प्राथम्यमात्मनः शरीरपरिग्रहहेतुत्वख्यापनार्थम्। तत्र सर्वं प्रतिष्ठितमिति, किन्तत्सर्वमिति कारणेषु प्रथमं प्रधानमुपदिश्यते सामान्यरूपेण विशेषरूपेण—

"खादीन्यात्मा मनःकालो दिशश्च द्रव्यसंग्रहः।
सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्॥" इति

आत्मनः सर्वप्राधान्येऽपि भूतानां प्रथममुपादानं चैतन्यमिन्द्रियकृतमिन्द्रियञ्च भूतकृतमिति दर्शयितुम्। कालदिगपेक्षया मनसः प्रथममुपादानमात्मनः शरीरपरिग्रहहेतुक्रियावत्त्वेन। कालदिशोः सर्वत्र परिणामिसमवायिहेतुत्वेन साधारण्येन पश्चान्निर्द्देशः। समानविषयतया साद्दश्येनेदमपि स्मर्य्यते—

"महाभूतानि खं वायुरग्निरापः क्षितिस्तथा।
शब्दःस्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः॥"इति

खादयः शब्दादिषु क्रमशः एकद्वित्रिचतुःपञ्चगुणा वाय्वादयः क्रमशश्चलोष्णद्रवरूक्षस्वभावाश्च।

"सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्।
चेतनावान् यतश्चात्मा ततःकर्त्ता निरूच्यते॥"

वचनमिदं जगति चेतनाचेतनविभागं दर्शयति। चैतन्यञ्च करणयोगात्, करणञ्च त्रयोदशविधम्। पञ्च ज्ञानेन्द्रियाणि चक्षुस्त्वक्श्रवण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ्राणरसनरूपाणि । पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपाणि । दशकमिदं बाह्यम् । मनोबुद्ध्यहङ्कारत्रयमान्तरम् । व्यापारवत्कारणं करणमिति आहरणधारणप्रकाशनव्यापारम् । आहार्य्यञ्च कर्मेन्द्रियाणां वचनादिरूपं दिव्यादिव्यतया दशविधम् । धार्य्यं प्राणादिरूपस्ववृत्याऽन्तःकरणत्रयस्य शरीरं भूतपञ्चकं दिव्यादिव्यतया दशविधम् । प्रकाश्यं शब्दादि तथा दशविधम् । तदुक्तम्—

"करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्
कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च ॥" इति
"आत्मज्ञः करणैर्योगाज्ज्ञानन्त्वस्य प्रवर्त्तते
तदयोगादभावाद्वा करणानां निवर्त्तते ॥" इति च

तच्च चैतन्यं चतुर्विधशरीरेषु जरायुजाण्डजोष्मजत्रये स्पष्टबाह्येन्द्रिये स्पष्टम्, उद्भिज्जे तरुगुल्मादौ तु बाह्येन्द्रियाणामस्फुटतयाऽस्फुटम् । अत एवाद्यत्रयं बहिःसंज्ञमन्त्यमन्तःसंज्ञमिति चोच्यते । शरीरत्वञ्च वृक्षादिष्वाध्यात्मिकवाय्वित्रन्द्रिययोगात्,तद्योगश्च क्वचित्क्षतारोहणादिना। क्वचिच्चाशोकवकुललवलीवृन्ताकसूर्य्यभक्तादौ पादस्पर्शगण्डूषसेकमेघशब्दश्रवणमत्स्यादिगन्धवासनसूर्य्याभिमुखभ्रमणादिना तत्तद्विशेषदर्शनेन त्वग्रसनश्रवणघ्राणचक्षुरनुमानात् । अपि चैषां विद्यावत्त्वेऽपि तददानादभिवादनेऽप्याशिरप्रदानादित्यादिपूर्वजन्मापराधेन शरीरित्वम् ।

तदुक्तम्—"एकस्थाने रतिर्य्यस्य नित्यं भोजनसालसः
वानस्पत्यनरः प्रायो धर्म्मकामार्थवर्जितः ॥
अभिवादितस्तु यो विप्रो नाशिषं सम्प्रयच्छति
श्मशाने जायते वृक्षो गृध्रकङ्कोपसेवितः ॥
वृक्षगुल्मं वहुविधं तथैव तृणजातयः
तमसाऽधर्म्मरूपेण शब्दिताः कर्महेतुना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ।
एतदन्याश्च गतयो ब्रह्माद्यैः समुदाहृताः ॥" इति

अचेतनत्वव्यवहारस्त्वेषां सत्यपि चैतन्ये बहिश्चैतन्यापराधेन । वस्तुतोऽचेतना लोष्टपाषाणादय एवेति । तदयं विभागः—वस्तु द्विविधम्, चेतनमचेतनञ्चेति । चेतनमपि द्विविधम्, बहिरिन्द्रियमन्तरिन्द्रियञ्चेति । तत एव बहिश्चेतनमन्तश्चेतनञ्चेति । प्रथमं जरायुजादि त्रयं द्वितीयमुद्भिज्जमेकम् । अचेतनं घटादि चेतनद्रव्यारम्भकाणि आकाशादि नवद्रव्याणि । अचेतनारम्भकाणि तान्येवात्ममनोवर्जितानि सप्त, घटादिष्वपि शब्दादिगुणोपलब्धेः । तत्र न्यायवैशेषिकायुर्वेदानुसारेण आकाशं शब्दसौकुमार्य्यलघुसूक्ष्मश्लक्ष्णगुणं वाय्वादिपूर्वपूर्वभूतानुप्रवेशात्तद्गुणं प्रातिस्विकगुणञ्च । तद्यथा—वायुरव्यक्तशब्दव्यक्तस्पर्शलघुखररूक्षसूक्ष्मशैत्यवैशद्ययुक्तः । तेजः शब्दोष्णस्पर्शरूपस्थूलसूक्ष्मलघुवैशद्यगुणम् । जलं शब्दस्पर्शरूपरसगुरुद्रव्यस्नेहशैत्यमान्द्यसरसान्द्रमृदुपैच्छिल्यगुणम् । पृथिवी शब्दस्पर्शरूपरसगन्धगुरुखरकठिनमान्द्यस्थैर्य्यवैशद्यसान्द्रगुणयुक्ता । आत्मा च बृहत्वाद्बृंहणत्वाद्वाऽऽत्मैव ब्रह्मेति गीयते इत्युक्तदिशा व्यापकत्वशरीराद्युपष्टम्भकत्वाभ्यां ब्रह्माऽपि भवन्नविद्यावशाज्जीवभावमुपयाति ।

तत्रश्लोकाः—"स तथाभूत एवात्मा स्वयमन्य इवोल्लसन् ।
जीवतामुपयातीव भाविनाम्ना कदर्थिताम् ॥
ततः स जीवशब्दार्थकलनाकुलतां गतः ।
मनो भवति भूतात्मा मननान्मन्थरीभवन् ॥
मनः सम्पद्यते तेन महतः परमात्मनः ।
सुस्थिरादस्थिराकारस्तरङ्ग इव वारिधेः ॥
तत्स्वयं स्वैरमेवाशु सङ्कल्पयति नित्यशः ।
तेनेत्थमिन्द्रजालश्रीर्विततेयं वितन्यते ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेवं जीवभावमापन्नो मनसा करणेन क्रियमाणमप्युपचारात्स्वस्मिन् मन्यमानः कारणं कर्त्ता निमित्तं मन्ता वेदिता बोद्धा द्रष्टा घ्राता ब्रह्मा विश्वकर्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यश्चेतनावान् विभुर्भूतात्मेन्द्रियात्मेति नाना व्यपदिश्यते । इन्द्रियन्तु चक्षुरादि इन्द्रस्यात्मनो ज्ञापनादानन्दनाद्वा भवति । तदुक्तम्—"इन्द्रलिङ्गमिन्द्रदत्तमित्यादि"

"श्रुत्या स्पृष्ट्वा च दृष्ट्वा च भ्रान्त्या घ्रात्वा विमृश्य च ।
इन्द्रमानन्दयत्येषा तेनेदमिन्द्रियं मतम् ॥" इति

कार्य्यानुगुणञ्च संज्ञया परिभाषणम् । तदुक्तम्—"कार्य्यकालं संज्ञापरिभाषम्, यथोद्देशं संज्ञापरिभाषम्" इति । मनोगुणमेव सुखदुःखाद्युपाददानः सुखी दुःखी च भवति । तच्च मनस्त्रिगुणमिति त्रिविधम्, शुद्धं राजसं तामसञ्चेति । तत्प्रत्येकमप्यनन्तभेदमपरिसंख्येयं मनः सत्त्वं, सत्त्वञ्च शरीरं तच्च सप्तविधम्—शुद्धं ब्राह्ममार्षमैन्द्रं याम्यं वारुणं कौवेरं गान्धर्वमिति । राजसं षड्विधम्—आसुरं राक्षसं पैशाचं सार्पं पैत्रं शाकुनमिति । तामसं त्रिविधम्—पाशवम् मात्स्यं वानस्पत्यञ्चेति । प्रकारान्तरेण शरीरं त्रिविधं, दैवतैर्य्यकमानुषभेदात् । आद्यमष्टविधम्, ब्राह्मादिभेदाद्द्वितीयम् पञ्चविधम्, तृतीयमेकविधमिति । तदुक्तम्—

"अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः संक्षेपतो भौतिकः सर्गः ॥" इति

कालश्चैकोऽपिसन् उपाधिभेदात्क्षणादिव्यवहारविषयः, तथा दिगपि प्राच्यादिव्यवहारविषयतामासादयति । तदुक्तम्—"क्षणादिः स्यादुपाधितः" इति "उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्" इति च । उपाधिश्चाद्ये सूर्य्यक्रियाऽन्त्ये उदयाचलादिः । आकाशं निर्गुणमपि पञ्चीकरणप्रक्रिययाऽन्यभूतयोगात्सगुणमिति तदात्मकद्रव्याणि मार्दवसौषिर्य्यलाघवादिगुणयुक्तानि । वायुश्चलइति तदात्मकानि द्रव्याणि तथाभूतानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमन्यत्र । जलञ्चान्तरिक्षात्पतितमेकरसमपि तत्तदौषधिसम्बन्धान्नानारसम्भवति । तत्र सोमगुणातिरेकान्मधुरो रसः । पृथिव्यग्न्यतिरेकात्कषायः । हेमन्ते सोमातिरेकः शिशिरे वाय्वाकाशातिरेको वसन्ते वातश्लेष्मातिरेको ग्रीष्मे वातपित्तातिरेको वर्षासु वातकफातिरेकः शरदि पित्तकफातिरेकः । क्वचिद्रसैर्वातादीनामरिमित्रभावः । तद्यथा—मधु कफं नाशयति, आम्लरसः पित्तं बर्द्धयति कटुरसश्च, तिक्तरसो वातं वर्धयति पटोलपत्रं शमयति । फलत्रयन्तु नाशयति त्रिदोषमपि मलञ्च विरेचयति । मण्योषध्योरचिन्त्यकार्य्यकरत्वम् । मन्त्रस्य स्वरवर्णयोगवियोगाभ्यामिष्टानिष्टफलत्वम् । तदुक्तम्—

"दुष्टःशब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।" इति

दृश्यते च द्रव्यगुणकर्म्मणां प्रभावातिशयाद्विजातीयकार्य्यजनकत्वमपि । तद्यथा पारिमाण्डल्याणुपरिमाणाभ्यामणुमहतोर्द्व्यणुकत्र्यणुकयोरुत्पत्तिः । तदुक्तम् "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्" इति । दावाग्निदग्धस्य वेत्रवीजस्य कदलीकाण्डारम्भकत्वम् । भस्मकरोगदुष्टस्यौदर्य्यस्य वह्नन्नपचनम् । अग्नेश्च मणिसंयोगासंयोगाभ्यां दाहादाहाविति—

तदुक्तम्—"इदं बीजोऽङ्कुर इव दृश्यमाने महाशये ।
ब्रूते य एवमज्ञत्वमेतत्तस्यास्ति शैशवम् ।।
बीजम्भवेत्स्वयं दृश्यं चित्रादीन्द्रियगोचरम् ।
यवधानादिधान्यानि युक्तस्तत्राङ्कुरोद्भवः ।।
मनः षष्ठेन्द्रियातीतं यत्स्यादतितरामणु ।
बीजं तद्भवितुं शक्तं स्वयम्भूर्जगतां कथम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्सूक्ष्ममसदाभासमसदेव ह्यतादृशम् ।
कीदृशी बीजता तस्य बीजाभावे कुतोऽङ्कुरः ॥
गगनाङ्गादपि स्वच्छे शून्ये तत्र परे पदे ।
कथं सन्ति जगन्मेरुसमुद्रगगनादयः ॥
न किञ्चिदात्मनः किञ्चित्कथमेति कुतोऽथवा ।
शून्यरूपाद्घटाकाशाज्जातोऽद्रिः क कुतः कदा ॥

कार्य्यस्य तत्कारणतां प्रयातं
वक्तीति यस्तस्य विमूढबोधः ।
कैर्नाम तत्कार्य्यमुदेति तस्मात्
स्वैः कारणाद्यैः सहकारिरूपैः ॥

दुर्बुद्धिभिः कारणकार्य्यभावं सङ्कल्पितं दूरतरं व्युदस्य ।
तदेव तत्तत्स्थमनादिमध्यं जगत्तदेतस्थितमित्यवेहि ॥

नहि द्रव्यं गुणकर्म्मणी विना गुणकर्म्मणी वा द्रव्यं विनेति द्रव्य-गुणकर्म्मणामविनाभावः ।

"परापरत्वे युक्तिश्च संख्या संयोग एव च ।
विभागश्च पृथक्त्वञ्च परिमाणमथापि वा ॥
संस्कारोऽभ्यास इत्येते गुणा ज्ञेयाः परादयः ।
देशकालवयोमानपाकवीर्य्यरसादिषु ॥
परापरत्वे युक्तिश्च योजना जातु युज्यते ।" इति

द्रव्यं द्रव्यगुणकर्मसु समवायिकारणम् । तदुक्तम्—"समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्" इति । वस्तुतस्तु—

"अथ पृथ्व्यादयो नो वा केचिदत्रोपकुर्व्वते ।
सहकारिकारणत्वं तत्पूर्वश्चात्र दूषणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मात्परे जगच्छान्तमास्ते तत्सहकारिभिः ।
चित्तात्प्रसरतीत्युक्तिर्बालस्य न विनिश्चितिः ॥" इति

तदेवं साङ्ख्यादिकल्पना बालिशकल्पनैवेति विरम्यते । कार्य्य-कारणयोः शुक्लतन्तुना शुक्लपटारम्भात्सारूप्येऽपि क्वचिद्वैरूप्यमपीत्युपपादितम् । द्रव्यं खादि नवकमुक्तम् । तद्गुणाश्च रूपादयश्चतुर्विंशतिर्वैशेषिकमते, आयुर्वेदमते च परादयो दश इति, गुरुलघुशीतोष्णस्निग्धरुक्षमन्दतीक्ष्णस्थिरसरविसरपिच्छिलमृदुकठिनश्लेष्मखरस्थूलसूक्ष्मसान्द्रद्रवा विंशतिरिरितिचोक्तम् । शब्दादयः पञ्च खादीनां प्रधानगुणा अर्थशब्दव्यपदेशभाजः । तदुक्तम्—

"अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः" । इति

एते च भूतगुणाः सन्तो भौतिकशरीरगुणा अपि भवन्ति । आकाशादिषु शब्दादीनामेकद्वित्रिचतुःपञ्चरूपेणोपलब्धिस्तु साङ्ख्यमते शब्दादिपञ्चतन्मात्रतः एकद्वित्रिचतुःपञ्चरूपेणोत्पत्तिः । न्यायमते परत्र पूर्वभूतानुप्रवेशात् । तदुक्तम्—"पञ्चभ्यः पञ्चभूतानि" इति, "विष्टब्धं ह्यपरं परेण" इति । "अव्यूहाविष्टम्भविभुत्वानि आकाशधर्म्माः", "आकाशस्याप्रतिघातो दृष्टं लिङ्गम्" इतिचाकाशसिद्धये न्यायायुर्वेदौ । परादितो गुर्वादिपृथक्पाठस्तु पञ्चपुरुषीये आयुर्वेदे समुपयोगीति बोधयितुम् । मनसि प्रस्तुतेऽन्तःकरणत्वसादृश्येन स्मृत्या प्रसङ्गाद्बुद्ध्यहङ्कारौ विविच्येते । न्याये बुद्धिर्ज्ञानम् । तदुक्तम्-"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" इति । साङ्ख्ये महत्तत्त्वम् । तदुक्तम् "प्रकृतेर्महान् ततोऽहङ्कारः" इति । वेदान्ते एकमेवान्तःकरणं संशयनिश्चयगर्वस्मृतिरूपवृत्तिभेदेन मनोबुद्ध्यहङ्कारचित्तनामकम् । तदुक्तम्—

"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्धिरेवाहमितिवृत्त्याऽहङ्कार इत्युच्यते । तदुक्तम्—"ततोऽहङ्कारः" इति । स चाहङ्कारस्त्रिगुण इति सात्त्विको राजसस्तामसश्चेति। तदुक्तम्—

"सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥" इति

प्रमाऽप्रमा भ्रमः संशयो निश्चय इत्यादि सर्वं बुद्धेरेव प्रपञ्चः । इच्छादिकञ्चात्मलिङ्गम् । तदुक्तम्—

"इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः ।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः ॥" इति

परमात्मन एव साकारपक्षमाश्रित्य किञ्चित्प्रश्नोत्तरं योगवाशिष्ठगतं समुद्ध्रियते ।

तद्यथा प्रश्नः—

"किं स तादृग्विधो रुद्रः किं कृष्णः किं महाकृतिः ।
किं पञ्चवदनः कस्माद्दशबाहुः स तिष्ठति ॥
किं त्रिनेत्रः किमुग्रात्मा किमेकः किं प्रयोजनः ।
केनेरितः किमकरोच्छायासीद्वद का मुने ॥" इति

स्वातन्त्र्ये पूर्णकामस्य प्रवृत्त्यनुपपत्त्या पारतन्त्र्ये केनेरित इति । छायारूपा मायाऽपि कासीदिति ।

उत्तरम्—"काकुत्स्थ ! रुद्रनामासावहङ्कारतयोत्थितः ।
विषमैकाभिमानात्मा मूर्त्तिरस्यामलं नभः ॥
व्योमाकृतिः स भगवान् व्योमकर्णो महाद्युतिः ।
चिद्व्योममात्रसारत्वादाकाशात्मा स उच्यते ॥" इति

एतद्विव्रियते—असौ परमेश्वरः सर्वसर्गस्थितिसंहारगोचरसङ्कल्पाध्यवसायादिबीजभूतसर्वाभिमानात्मकमायावृत्तिरूपेणाहङ्कारेण सर्वजगदध्यासभूतस्तम्भभूतेन सर्वप्राणिरोदने सर्वशरणागतरुगद्रावणे च निमित्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतेन रुद्रनामा सन्नुत्थितस्तस्य रोदनरुगद्रावणयोः क्रमेण विषमैकाभिमानात्मसम्पन्नस्वमायाया इष्टमूर्त्तिस्तु नभ आकाशमेवाऽमलम् । पञ्चवदनत्वं प्रतिशरीरानुषक्तज्ञानेन्द्रियपञ्चकत्वेन । दशवाहुत्वञ्च—दक्षिणवामपार्श्वभागभेदेन क्रमशः कर्मेन्द्रियपञ्चकत्वतत्कार्य्यवचनादिपञ्चकत्वाभ्यामिति । निराकारपक्षेतु—

"सर्वभूतनरैः सार्द्धं ब्रह्मणा परमेयुषा ।
यदाऽसौ संपरित्यक्तस्तदा स्वां मूर्त्तिमागतः ॥
स चैकांशैकरूपात्मा नास्ति तस्य हि सा कृतिः ।
तथा दृश्यत एवाऽसौ भ्रान्तिमात्रेण मूर्तिमान् ॥
चिदाकाशगते स्फारे भूताकाशे स तिष्ठति ।
देहेऽत्र सर्वभूतानां नित्यं वायुरिवेश्वरः ॥
सर्वभूतपरित्यक्तस्तस्मिन् काले स्वमूर्तिमान् ।
क्षोभयन् स त्तणं क्षीणः परमां शान्तिमेष्यति ॥
ये गुणाकृतयः कालाश्चित्ताहङ्कारवुद्धयः ।
रुद्रस्य तस्य ते नेत्रसन्निवेशेन संस्थिताः ॥
निश्चलं तेन त्रैलोक्यं गृहीतं करकोटरे ।
यस्मात्तद्व्यतिरेकेण सर्वभूतगणेष्वपि ॥
अन्यन्न विद्यते किञ्चिदिहात्मैव ततः स्थितः ।
सर्वसत्योपलम्भात्मा स्वभावोऽस्य प्रयोजनम् ॥
ईरितः केन रूपेण चिन्मात्राकाशरूपिणा ।
तेनैव च निगीर्णःसन् परमां शान्तिमेत्यसौ ।
निर्म्मलाकाशरूपात्मा कृष्ण इत्येष ईश्वरः ॥" इति

पुराणगता आकाशात्परतो दशदशगुणाहङ्कारसहस्रकृतयः, कापिलमाहेश्वरपाञ्चरात्रगता महदादिकल्पना च श्रुतिषु न श्रुता इत्युपेक्षिताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वानरीं सुतवत्, द्रव्यं गुणकर्मवत्, अवयविनमवयववत्, सलिलं तृषितवत्, मातरं सुतवच्च सर्वे पदार्थाः प्रकृतिं न वियुञ्जन्तीति ।

तदुक्तम्—"स पार्थिवपदार्थानां स्थितिः पुष्करपत्रवत् ।
भागस्तमेवाधावन्ति ते सुता मातरं यथा ॥
अतो यदेव नेदीयो ब्रह्माण्डाख्यं महावपुः ।
तत्पदार्थाः प्रधावन्ति तृषिताः सलिलं यथा ॥
अवलम्ब्य तदेवान्तः संस्थितास्तैजसादयः ।
न स्थितिं प्रवियुञ्जन्ति स्वां यथाऽवयवा इव" ॥ इति

तद्यथा—वानरीमतिवेगाद्धावन्तीमपि लग्नाः सुता न त्यजन्ति तद्वत्पदार्थाः प्रकृतिमिति । नहि कारणवियुक्तं कार्य्यमस्तीति । द्रव्यं सह गुणैः समुत्पद्य पश्चात्क्रियावद्भवति । गुणाः परादयो गुर्व्वादयो रूपादयो वा । नातो गुणोऽधिकः प्रकृतिभूतः कार्य्यभूतो वा । सुश्रुते च व्यवायी विकाशीति द्वावेव गुणावुक्तौ, तयोरेवान्येषामन्तर्भावादिति ।

तदुक्तम्—"पूर्वं व्याप्याखिलं देहं
ततः पाकञ्च गच्छति ।
विकाशी विकशन् धातून्
सन्धिबन्धान् विमोक्षयेत् ॥" इति
"सरस्तीक्ष्णप्रकर्षौ तु केश्चित्तौ परिकल्पितौ ।" इति च

तदेवं द्रव्यगुणकर्म्मात्मकं सकलमेव ब्रह्माण्डं धर्म्माधर्म्मफलभूतं शुभाशुभरूपं सुखदुःखात्मकमविद्याविलसितम् । कर्म्मत एव शरीरं दग्धं धूमादिरूपं भूत्वा चन्द्रलोकादिरूपं स्वर्गप्रदेशमवाप्य सुखभोगाय भवति । पुण्यक्षयेऽवरोहसमये सानुशयं मेघवर्षादिरूपेण यवाद्यन्नसंसर्गेणान्नभक्षणाद्वीर्य्यरूपेण परिणमन् शरीरभावमापद्य पुनर्भोगाय भवति । तदेतच्छां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोग्यबृहदारण्यकादौ सुप्रतीतम्। तदेव कर्म्म धर्म्मरूपं प्रातिस्विकफलानुसन्धानेन क्रियमाणमन्तःकरणशुद्ध्यादिक्रमेणात्मसाक्षात्काराय भवति। तदुक्तम्—"क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः", "सति मूले तद्विपाको जात्यायुर्भोगाः", "यतोऽभ्युदयनिश्श्रेयससिद्धिः स धर्म्मः" इति। बुद्धिवैशद्यायापरथाऽर्थपदार्थवर्णनम्। अर्थाः शब्दादय इन्द्रियगोचराः खादिभूतानां समाननिमित्तत्वात्प्रातिस्विकगुणाः पूर्वभूतानुप्रवेशेन परत्र द्वित्रिचतुःपञ्चरूपेण तरतमभावेन सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलस्थूलतरस्थूलतमभावेन व्यवस्थिता भोज्यतां प्रयान्ति। शीतोष्णानुष्णशीतभेदेन खरतीक्ष्णशरादिभेदेन च वाय्वादिषु समुपलभ्यन्ते। तदुक्तम्-"अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः" इति। इच्छाद्वेषादयः प्रवृत्तिनिवृत्तिहेतवः संसारनिदानभूता अविद्यामूला विद्ययाऽविद्यानिवृत्तौ समूलकाषं कषिता भवन्ति। तदुक्तम्—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति। प्रवृत्तिश्च वाग्बुद्धिशरीरारम्भः शुभाशुभभेदेन दशधा इति विचारसारसोपानपद्धतिमारुरुक्षतां नैयायिकादीनां मतम्। वायुप्रपञ्चमपि वर्णयन्ति उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनरूपमन्तर्भावितभ्रमणादिकम्। नोदनाभिघातादिकमपि संयोगविशेषरूपं तत्कृतमेव। शब्दभावाभावाभ्यामभिघातनोदनभेदः। स चायं तिर्य्यग्गतिमान्, उद्‌र्ध्वगतिमाननलः, स्पन्दनवज्जलम्। गुरुत्वात्पतनं जलभूम्योः। तदुक्तं—"गुरुत्वात्पतनम्" इति, "गुरुणी द्वे" इति चेति। तद्यथा वर्षति मेघे भूमौ जलं पततीति, वृन्तात्फलं पततीति च। स्रवणं नाम जलस्य नवघटादितोऽन्यदेव पतनतः। तदेव घटादितो भवत्स्रावाख्यां पर्व्वतकन्दरादितो वेगतो निःसरत्प्रस्रावाख्यां लभते। स एव च वृक्षादौ मूलसिक्तं जलं समुन्नयन् हरितपल्लवादिभावाय कल्पते। वाष्पयन्त्रेण यानाकर्षणं शरीरधारणं जलस्य जलवैज्ञानिकैरुपवर्णितं धारकरकातुषारहिमभावादिकं वायूष्णकृतं प्रत्यक्षप्रमाणकमागमप्रमाणकञ्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"ता आपो गर्भन्दधिरे" इति श्रुतेः । सुवर्णरजतादिमेघपरिघट्टनाद्विद्युत्स्फूर्जनादिकं सर्वं वायुकृतमेव । विज्ञानोपयोगितया पुनरपि कर्म प्रपंच्यते । ज्ञानेच्छाप्रयत्नप्रवृत्तयः यथाक्रमं कारणकार्य्यरूपाः । तदुक्तम् "जानाति इच्छति यतते प्रवर्त्तते" इति । प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति । कायिकवाचिकमानसिकरूपं त्रिविधं कर्म्म शुक्लं कृष्णं शुक्लकृष्णमशुक्लाकृष्णञ्चेति । तदुक्तम्—"कर्म्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्" इति । तच्च कर्म्म "कर्म्मफलमनुष्ठातरि" इति सत्यपि वचने किञ्चिदन्यकृतमन्यत्रफलदं वचनादेव । तद्यथा—पितृकृतं पुत्रेष्ट्यादि पुत्रे, पुत्रकृतं श्राद्धादि पितरीति । किञ्चिद्दृष्टफलकं कृषिगोरक्षवाणिज्यादिगुरुशुश्रूषादिकं शस्यादिज्ञानादिफलकम् । कारीर्य्यादि वृष्टिफलकम् । किञ्चिददृष्टफलकं दर्शपौर्णमासादि । किञ्चिद्दृष्टादृष्टफलकमुद्भिदादि । तदुक्तम्—"क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः" इति । दिग्विशेषनियमश्च कर्म्मणि यथा—"प्राचीनप्रवणे वैश्वदेवेन यजेत" इति । तदियं कर्म्मादिविद्याऽपरेत्युच्यते, ब्रह्मविद्या परेति । तदुक्तम्—"द्वे विद्ये वेदितव्ये पराऽपरा च" इति । तत्र परा यया तदक्षरं विज्ञायते, अपरा यज्ञादिविद्येति । सौर्य्यवीर्य्यादिकञ्चात्मधर्म्मतयाऽतिवलवति स्थूले महति दृष्टमायोधने । तद्विपरीतञ्च क्षुद्रे दुर्व्वले पतनपिपासादिकमिति । सत्त्वादि सात्मजम् । जन्म तु मातृतः पितृतः सत्त्वत आत्मतः सात्म्यत इति पञ्चविधं कर्म्मकृतमेव । कर्म्मच भोगापवर्गजनकमुक्तम् । "यतोऽभ्युदयनिश्श्रेयससिद्धिः स धर्म्मः" इति । भक्तिरूपञ्च भक्तिमुक्ती सेवातदभावाभ्याम् । जीवश्च तद्भागी नात्मा । तदुक्तम्—

"मुक्तिश्च सेवारहिता भक्तिः सेवाविवर्द्धिनी ।
मुक्तिभक्त्योरयं भेदो निःशेषं लक्षणं श्रृणु ॥
जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव तु ।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचित्तु-द्रव्यं चिन्त्यमचिन्त्यञ्चेति। चिंत्यमात्मादितद्‌गुणाःकृष्णपीतादयः। अचिन्त्यं वृक्षादि तद्‌गुणा मधुरादयः। "द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाः पदार्थाः सप्त" इति वैशेषिकाः। प्रथमं पदार्थो द्विविधः, भावोऽभावश्च। आद्यः षड्विधो द्रव्यगुणकर्म्मसामान्यविशेषसमवायभेदात्। अभावो द्विविधः संसर्गान्योन्याभावभेदात्। तत्राद्यस्त्रिविधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्च। अभावस्याधिकरणात्मकत्वात् द्रव्यादिसमवायान्ताः षडेति केचित्। समवायस्य संसर्गत्वात् संसर्गस्य च संसर्गिस्वरूपव्यतिरेकेणानुपलब्धेर्द्रव्याद्यभावान्ताः षडित्यन्ये। समवायो नित्य एक इति परे। सम्बन्धिभेदभिन्नोऽनित्य इत्यपरे। स चायं समवायो द्रव्ये गुणकर्म्मणोः,तेषु सामान्यस्य, नित्यद्रव्येषु विशेषस्य, अवयवेष्ववयविनाम्। तदुक्तम्—

"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः।
तेषु जातेश्च सम्बन्धःसमवायः प्रकीर्त्तितः॥"इति
"योऽङ्गिनोऽङ्गेषु सामान्यविशेषगुणकर्मणाम्।
द्रव्ये योगो विशेषस्य नित्यद्रव्ये स्मृतश्च सः।
समवाय इति ज्ञेयो नित्य एव मनीषिभिः॥"इति च

संयोगश्च सम्बन्धो द्रव्ययोरेव। तद्यथा—शुक्रार्त्तवसंयोगभूतलघटसंयोगादि। द्रव्यञ्च कार्य्याणां समवायिकारणम्। कारणत्वं नाम कार्य्यान्यवहितप्राक्क्षणावच्छेदेन कार्य्याधिकरणवृत्त्यन्ताभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वम्। कारणं त्रिविधम्,समवाय्यसमवायिनिमित्तभेदात्। तदुक्तम्—

"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम्"॥इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम् ॥" इति

भेदपृथक्त्वविभागाभिन्ना इति वैशेषिकादयोऽभिन्ना इति परे। संयोगविभागौ परस्परविरोधिनौ। अत्यन्ताभावाऽन्योन्याभावयोः प्रतियोगिताश्रयावच्छेदकाभ्यां विरोधः। सहानवस्थानं विरोध इति तल्लक्षणम्। प्रागध्वंसाभावयोः प्रतियोगिसमवायिदेशत्वम्। तयोरत्यन्ताभावेन विरोधाविरोधौ मतभेदनिबन्धनौ। समवायिकारणत्वं द्रव्यस्य साधर्म्यम्। असमवायिकारणत्वं गुणकर्म्मणोर्निमित्तत्वम्। त्रयाणां स्वसमवेतकार्य्यारम्भकत्वं समवायित्वम्। स्वाश्रयस्वाश्रयाश्रयकार्य्यारम्भकत्त्वमसमवायित्वम्। तद्भिन्नकारणत्वं निमित्तत्त्वम्। तदुक्तम्—

"समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्त्वम् ॥
यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकन्तत्।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥" इति

प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यनुपलब्धिप्रमाणेषु चार्वाकवैशेषिकसांख्यन्यायमीमांसकवेदान्तिनः क्रमश एकद्वित्रिचतुःपञ्चषट्प्रमाणवादिनः। प्रमात्वाप्रमात्त्वे तद्वतितत्प्रकारकत्व—तदभाववतितत्प्रकारकत्वाभ्याम्। आद्यं स्वतः, परं परत इति मीमांसकादयः। तद्विपरीतमिति नास्तिकाः। उभयं परत इति नैयायिकादयः। तच्च स्वतस्त्वमुत्पत्तिगतं ज्ञप्तिगतञ्च, स्वाश्रयजनकजन्यत्वस्वाश्रयग्राहकग्राह्यत्वाभ्याम्। परतस्त्वञ्च गुणदोषतज्ज्ञानाभ्याम्। अत्र प्रामाण्यं स्वत इति ज्यायः, तज्जन्यप्रवृत्तिं प्रति तद्धर्म्मिकप्रामाण्यज्ञानं कारणमिति ज्ञानाधीनप्रवृत्तौ प्रथमं प्रामाण्यज्ञानस्यापेक्षणात्, परतस्त्वेऽनुगतगुणाभावादनवस्थापाताच्च। प्रमाणसंख्याविकल्पस्तु स्वस्वविचाराधीनान्तर्भावानन्तर्भावाधीन इति न विरोधमावहति, प्रमेय-

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धिप्रयोजनत्वात्प्रमाणानाम् । तदुक्तम्—"प्रमेयसिद्धिः प्रमाणाद्धि" इति । नित्यमेकमनेकानुगतमिति जातिलक्षणम् । सत्ताया द्रव्यत्वादिभिः सामान्यविशेषभावो द्रव्यगुणकर्म्मसु अनुवृत्तिव्यावृत्तिबुद्धिकरत्वेन । सदिति त्रिष्वनुवृत्तिबुद्धिः । द्रव्यं न गुण इत्येवं व्यावृत्तिबुद्धिः । जातिगुणक्रियादेशकालारम्भकद्रव्यादयो भेदबुद्धिहेतवः । तद्यथा—घटो न पटः, नीलो न पीतः, सक्रियो न निष्क्रियः, अत्र नात्र, पुराणो न नवः इत्येवं जात्यादिभेदाद्भेदः । समानजातिदेशकालगुणक्रिये घटद्वये आरम्भकभेदात् परस्परं भेदः । परमाण्वादिनित्यद्रव्ये विशेषाद्भेदसिद्धिः । विशेषस्तु स्वतो व्यावृत्त इति न भेदकान्तरमपेक्षते । स्वतो व्यावृत्तत्वञ्च स्वेतरानपेक्षभेदवत्त्वम् । क्रियावद्गुणवच्चेति द्रव्यलक्षणम् । आद्यं विभु, व्यभिचारीति द्वितीयम् । न चेदमपि कार्य्यद्रव्ये प्रथमक्षणे व्यभिचारि, उपलक्षणत्वात् । शरीरमिन्द्रियं विषय इति कार्य्यद्रव्याणामपरो भेदः । चेष्टाश्रयत्वमात्मभिन्नत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमुपभोगसाधनत्वमिति लक्षणानि । उपलक्षणत्वाच्च न दोषमावहन्ति । भूतत्वञ्च पञ्चमहाभूतसाधारणो धर्म्मः । तच्चात्मावृत्तिविशेषगुणवत्त्वम् । ज्ञानमात्रं प्रति त्वङ्मनःसंयोगश्चर्म्ममनःसंयोगो वा कारणमिति । आत्मा मनइन्द्रियसंयोगाच्चेतयिता भवति । तदुक्तम्—"आत्मा मनसा युज्यते,मन इन्द्रियेण, इन्द्रियमर्थेन" इति । आत्मैव चादिसर्गावान्तरसर्गयोर्नामरूपात्मसूक्ष्मभूतसंसृष्टः सृष्टिनिदानमिति प्रकृतिरित्युच्यते । तदुक्तम्—"अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति, "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" इति, "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति च । तच्चात्मलीनं बीजं प्रलये स्वरूपेण, सृष्टौ विरूपेण महदाद्याकारेण परिणमते । वैरूप्यञ्च तत्त्वभेदेन । सुखदुःखमोहात्मना तु सारूप्यमेव । तत एव च तदनुमानम् । तदुक्तम्—

**"सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्य्यतस्तदुपलब्धेः ।
महदादि तच्च कार्य्यं प्रकृतिसरूपं विरूपञ्च ॥" इति**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमानञ्च—सर्वं बाह्याध्यात्मिकं सुखदुःखमोहान्वितं कारणस्य प्रधानत्वं सुखदुःखमोहस्वरूपसत्त्वरजस्तमःस्वरूपत्वरूपं गमयति । मृदामिव मृत्स्वभावत्वं मृदन्वितं घटादि । सुखदुःखमोहान्वितत्वञ्च—एकैव स्त्री स्वामिनं सुखाकरोति, तत्कस्य हेतोः ? तं प्रति सुखरूपसत्त्वगुणाविर्भावात् । सैव च सपत्नीर्दुःखाकरोति, तत्कस्यहेतोः ? ताः प्रति दुःखरूपरजोगुणाविर्भावात् । सैव पुरुषान्तरं स्वामविन्दमानं मोहयति, तत्कस्य हेतोः ? तं प्रति मोहस्वरूपतमोगुणाविर्भात् । अनयैव स्त्रिया सर्वे भावा व्याख्याता इत्युक्तदिशा स्वामिसपत्नीपुरुषान्तराणां सुखदुःखमोहकरत्वं पद्मावत्या इव सर्वेषां भावानाम् । सत्त्वादि परस्परविरुद्धस्वभावमपि मिलितं वातपित्तादिकमिवाध्यात्मं शरीरधारणम्, बाह्यं वर्त्तितैलादिकमिव प्रकाशं जगत्करोति । प्रत्येकं स्वेतरप्राधान्ये तत्तत्कार्य्यकरत्वं सलिलमिव तत्तदाश्रयं नाना रसम् । तदुक्तम् "परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्" इति । प्रधानपुरुषयोः कर्तृत्वचैतन्ये भिन्नाधिकरणेऽपि परस्परसंयोगेन चेतनोऽहं करोमीति सामानाधिकरण्येन प्रतीयेते । सन्ध्याकालीनारुणरविकरसम्पर्केणाकाशस्येवारुणिमा, स्फटिकस्येव च जपाकुसुमसम्पर्केण । तदुक्तम्—

"तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥" इति
"प्रकृतेःक्रियमाणानि गुणैःकर्म्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्त्ताऽहमिति मन्यते ॥" इति च

मनस्तु कार्य्यमपि सत् न स्वेतरद्रव्यप्रकृतिकमिति द्रव्यपरिगणने पृथगुक्तम् । प्रकृत्यैव च सर्वं कार्य्यमारभमाणं तदनुरूपमेव त्रिगुणं भवति । शुक्लतन्त्वारब्धं पटद्रव्यमिव शुक्लम् । येन विना यन्न भवति तत्तस्य कारणम्, तन्तुरिव पटस्य, कपालमिव घटस्य । द्रव्यञ्च पृथिव्यादिमनःपर्य्यन्तं कर्म्मगुणाश्रयम् । तत्संयोगादाकाशादिकमपि तथा भूतम् । नवकमिदं सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्य्यारम्भाय पर्य्याप्तं समवयनशीलं कार्य्यसमवायानुयोगि समवायिकारणम्भवति कार्य्यमात्रस्य चेतनशरीरादेः। अचेतनस्य घटादेरात्ममनोऽनुपलम्भात्तद्रहितं सप्तकमिति। पार्थिवं घटादि समुत्पद्यमानं भिन्नरसादिमदपि पाकात्तदितररसादिमद्भवति। क्रियाकारणं कर्तृकर्म्मादिभेदेन षड्विधम् स्वतन्त्रमस्वतन्त्रञ्च। स्वतन्त्रं कर्तृ। स्वातन्त्र्यञ्चान्यानधीनव्यापारवत्त्वम्। अस्वतन्त्रं करणादि। तत्त्वञ्च कर्तृव्यापाराधीनव्यापारवत्त्वम्। द्रव्यनवकं शरीररूपेण परिणमद्देवदत्तयज्ञदत्त इति व्यपदिश्यमानं कर्तृ भवदपि मुख्यमात्मनैव, तदितरेण तु भाक्तमेव। कार्य्यञ्च कारणगुणपूर्वकं दृष्टं शब्दादिमदाकाशाद्यारब्धं शब्दादिमद् घटादि। तदुक्तम्—"कारणानि कार्य्यमारभन्ते कारणगुणाश्च कार्य्यगुणान्" इति कणादकपिलव्यासादिमतमिति। इत्थमात्मप्रधानके चतुर्विंशतितत्त्वमये कोशे आत्मानुप्रवेशेनैव सङ्कोचविकाशवति जगति जल्पवितण्डादिशुष्कतर्कमयचार्वाकादिमतसमाश्रयणेन कण्टकतैक्ष्ण्यादिवत् स्वाभाविकं जगदिति मन्यन्ते बोधविधुराः। नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिः। इतरथा सर्वं सर्वत्र जायेतेति परे प्रतिपद्यन्ति। मनसि वैकृतादहङ्काराज्जायमाने ज्ञानादिकमुत्पद्यते चेतने, शब्दादिकञ्चाकाशादिके। नहि निर्गुणं किञ्चिदस्तीति। संख्यादिविभागान्ताः कालाकाशदिशां साधारणगुणाः। रूपरसगन्धस्पर्शादयो यथायथं पञ्चभूतगुणाः। चरकवैशेषिकमतेन गुणवत्समवायिकारणमिति द्रव्यलक्षणम्। रक्तश्वेतकृष्णादिषु सप्तविधरूपेषु किञ्चित्सम्मेलनकृतमित्येवं सत्यपि वहुनि वक्तव्ये "भूमिकामात्रम्"इदमिति विरमति चेतः।

॥ इति शम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ तत्सद्ब्रह्मणे नमः ३

अथ मनोविज्ञानम् ।

पूर्वार्द्धः प्रारभ्यते ।

यत् सृष्टेः पूर्वकालं श्रुतिशतविदितं सच्चिदानन्दरूपम्
प्रेक्षापूर्वं समस्तं जगदिदमकरोन्नामरूपे प्रविश्य ।
सृष्टिस्थित्यन्तकारि प्रथितवहुगुणं निर्गुणं जीवभावं
प्राप्तं तद् ब्रह्म नित्यं निजहृदि कमले भावयेऽभीष्टसिद्ध्यै॥१॥

—०—

तटस्थं यल्लक्ष्म स्थितिजनिलयाख्यं त्रिजगतां
स्वरूपं यज्ज्ञानं सदिति परमानन्दमिति च ।
परं योगं युञ्जन् हृदि यदिह योगी कलयते
मुदे स्वान्ते शान्ते तदिह परमं ब्रह्म कलये ॥२॥

—०—

यदाधारा सृष्टिस्थितिलयविधा वेदविदिता
यदीयं मन्यन्ते भुवनपरिणामं कतिपये ।
विवर्त्तम्भाषन्ते जगदिदमशेषन्तदपरे
परं ब्रह्म क्षेमं रचयतु च तद्ग्रन्थरचने ॥३॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविद्येयं किम्वा परमपि विवर्तं रचयति
प्रधानं किम्वेयं परिणमति लोकावलितया ।
उताहो मायैषा भ्रमयति च देवानपि यतो
विकल्पोऽयं यस्यां भवतु शुभदाऽसौ भगवती ॥४॥

—०—

अवन्ती स्वं भक्तं निजचरणसक्तं रचयति
अयन्ती जिह्वाग्रं किरति मधुधारामिव गिरम् ।
सृजन्ती विज्ञानं हरति हृदयाऽज्ञानमखिलं
शिवं सेयं वाणी पुटितजनपाणी रचयतु ॥५॥

—०—

यस्याज्ञां न विहन्तुमीशत इह ब्रह्मादयो देवता
यद्भीता इव सम्भवन्ति सततं कार्य्ये निजे तत्पराः ।
सर्वस्यापि च भक्तिमात्रसुलभो यः सर्वदा तं परं
प्रारब्धान्तकृते हृदि प्रतिपलं साम्बं शिवम्भावये ॥६॥

—०—

यस्याज्ञां शिरसा विभर्ति सकलः प्रीतः स्वयम्भ्वादिक-
स्तुष्टः सत्वरमेव वाञ्छितफलं ध्यातश्च यो यच्छति ।
यस्मिन् सर्वमिदं जगत् प्रविततं पातं तथा लीयते
सोऽयं सम्प्रति मङ्गलाय भवतात् साम्बः शिवः सात्मजः ॥७॥

—०—

तुष्टे यत्र सदैव मङ्गलमयं कार्य्यं सतां जायते
रुष्टे नैव कदाऽपि दैववशतो यत्नैकृतेऽभीक्ष्णशः ।
इत्येवन्तु यमर्चयन्ति सततं कार्य्ये शुभे मानवाः
सोऽयं विघ्नविनाशनाय भवतु श्रीविघ्नराजः परः ॥८॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्थार्थं सर्वकालं जगदिदमखिलं सस्पृहं दृष्टपूर्वं
यत्पूर्वं नानुभूतं निजकृतिरहितं न श्रुतं धीरवृन्दैः ।
विज्ञानं तद्दुरापं कथमपि मनसः शास्त्रतत्त्वं विचिन्त्य
क्षेमार्थं मोदहेतोः सपदि च रचये सज्जनानां बुधानाम् ॥९॥

—०—

नमस्कुर्व्वन्धन्वन्तरिचरकसुश्रुतपदयुगं
प्रपश्यन्तद्ग्रन्थान् हृदि च कलयन् सारनिचयान् ।
तिरस्कुर्वन्नन्यान् कुकविरचितान् सारनिचया-
ज्ञनानन्दं कुर्वन् कमपि च निवन्धं प्रकटये ॥१०॥

—०—

यतः सर्वाणि भूतानि प्रविभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥११॥

—०—

अजममरमनाद्यमेकं निजसौख्यलवाञ्चिताखिलानन्दम् ।
हृदि निहितमात्मसारं निगमान्तामृतरसायनं वन्दे ॥१२॥

—०—

दिवि भूमौ तथाकाशे बहिरन्तश्च यो विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥१३॥

—०—

ब्रह्मबृंहैव जगज्जगच्च ब्रह्मबृंहणम् ।
विद्यते नानयोर्भेदश्चिद्घनब्रह्मणोरिव ॥१४॥

—०—

अध्यात्मशास्त्रमन्त्रेण तृष्णाविषविशूचिका ।
क्षीयते भावितेनान्तः शरदा मिहिका यथा ॥१५॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथेदानीं लोकहिताय मनोविज्ञानशास्त्रमारभमाणोऽनादिजन्मपरम्परासञ्चितदुरितनिबन्धनाज्ञानध्वान्तध्वंसननिदाघप्रचण्डमार्त्तण्डकल्पस्यास्य शास्त्रस्य निर्विघ्नसमाप्तिप्रचयगमनाय श्रुतिस्मृतिसदाचारबोधितकर्त्तव्यताकं समुचितजगन्नाटकसूत्रधारकल्पस्य ब्रह्मणः साम्बशिवस्य च "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि च" इति महाभाष्यसमुपोद्बलितम्, "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसम्विशन्ति" इतिश्रुतिबोधितजगज्जन्मस्थितिलयकारणत्वरूपतटस्थलक्षणलक्षितम्, "सच्चिदानन्दम्" इति स्वरूपलक्षणलक्षितं ब्रह्म प्रदर्शयन्, "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इतिवचनबोधितमाशीर्नमस्कारात्मकं मङ्गलमाचरन्, "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" इति, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति, "जन्माद्यस्य" इति च वचनबोधितं जगन्मिथ्याभावं जन्माद्यस्य यतोऽन्वयादितरत इति भागवतवचनानूदितं प्रकटये ।

—०—

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥" इति

—०—

अस्य जगतो मनसाप्यचिन्त्यरचनारूपस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तफलाश्रयस्य जन्मादि जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेर्ब्रह्मणोऽन्वयव्यतिरेकसिद्धम्, यत् यस्मिन् ब्रह्मणि सूरयो देवा ब्रह्माद्या अपि मुह्यन्ति न विज्ञातुं प्रभवन्ति, यः अर्थेष्वभिज्ञः समालोचितकार्य्यजातो ज्ञानपूर्वकं वाक्यरचनमिति वेदार्थज्ञः, स्वराट् स्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशः स्वतन्त्र इति वा, स्वतन्त्रो हि कर्त्ता भवति । यः परमात्मा आदिकवये ब्रह्मणे ब्रह्म तेने वेदानध्यापयामास आविर्भावयामासेति यावत् । तेज आदिषु अन्योऽन्यभ्रान्तिवत् यत्र त्रिसर्गस्त्रिगुणसर्गस्त्रयाणां लोकानां वा सर्गस्त्रयाणां ब्रह्मादीनां वा सर्गो मृषा मिथ्या, अनिर्वचनीयाविद्यात्मकत्वात् । स्वयन्तु स्वेन धाम्ना तेजसा निरस्तकुहकः प्रनष्टाविद्यः । नहि तेजसि सूर्य्ये तिमिरसंसर्गसम्भवः । तं सत्यं परमार्थसत्यम्, अत एव परं सर्वोत्कृष्टं धीमहि ध्यायेम इति ॥ अन्यथा वा व्याख्यायते । परमात्मप्रसादमन्तरेण ब्रह्मज्ञानं ब्रह्मादीनामपि दुर्ल्लभं श्रुतिरेव जानाति । तदुक्तम्—"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्" इति । तत्प्रसादेन तु भवति ज्ञानम् । यदुक्तम्—"यमेवैष वृणुते तेन लभ्यते" इति । अतः प्रसादमन्तरेण दुर्ल्लभं तज्ज्ञानम् । तदुक्तम्—"मुह्यन्ति यत्सूरयः" इति । प्रसादेन तु भवति ज्ञानं ब्रह्मादीनामपि वेदोपदेशेन । तदुक्तम्—"तेने ब्रह्म हृदा य आदिकवये" इति व्याख्यातम् । ब्रह्मणे जगत्प्रवर्त्तनं सप्रयोजनमप्रयोजनं वा ? उभयथा प्रवृत्त्यनुपपत्तिः । तद्यथा—ब्रह्माप्तकाममनाप्तकामं वा ? अन्त्ये—अस्मदादिवदीश्वरत्वानुपपत्तिः । आद्ये—सिद्धे इच्छाद्यभावेन प्रवृत्त्यनुपपत्तिः, ज्ञानेच्छाकृतिप्रवृत्तीनां कार्य्यकारणभावात् । तदुक्तम्—"जानाति इच्छति यतते प्रवर्त्तते" इति । अप्रयोजनपक्षेऽपि प्रवृत्त्यनुपपत्तिरेव । तदुक्तम्—"आप्तकामस्य का स्पृहा" इति । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य कारणत्वमिति । यदिष्टं तदेवोद्देश्यं प्रयोजनमिति । तदुक्तम्-"यमुद्दिश्य प्रवर्त्तते तत्प्रयोजनम्"इति । किन्तु लीलयैव प्रवृत्तिः, क्रीडार्थं प्रवृत्तिस्तु प्रयोजनमननुसंधायापि भवति । तद्यथा—बालानां राज्ञाञ्च क्रीडाविहारेषु मृगयादिषु । अपि च वाचारम्भणश्रुत्या मृषैव सृष्टिरिति न प्रयोजनमपेक्षते । तदुक्तम्-"यत्र त्रिसर्गो मृषा" इति । त्रिसर्गो जीवेश्वरजडसर्गः । तद्यथा—परमात्मैव नामरूपात्मके जगति प्रविष्टः तेज इवार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्यनुप्रविष्टं मन्थनादिना भूतानुग्रहाय रामकृष्णादिरूपेणाविर्भवतीतीश्वरसर्गः। यथा वा सूर्य्यस्यैकस्यापि नानाजलोपाधिभेदेन प्रतिबिम्बरूपाणि नाना प्रतिसूर्य्यकाणि बिम्बव्यतिरेकेण मिथ्याभूतानि, तथैव परमात्मनः प्रतिशरीरमन्तःकरणाद्युपाधिभेदेन प्रतिबिम्बरूपा नाना जीवास्तद्व्यतिरेकेण मिथ्याभूता इति जीवसर्गः। यथा वा कुलालतन्तुवायादयो मृत्तन्तूनुपादाय नाना घटपटादीनि सृजति, तथैव परमात्मा प्रकृतिं मायामुपादाय मायिकमाकाशादि नाना सृजतीति जडसर्गः। अनन्तशक्तित्वाच्चायमात्माऽनन्त इत्युच्यते। तदुक्तम्—"सत्यं ज्ञानमनन्तं ब्रह्म" इति, "नाद्यन्तो यद्विभूतीनां सोऽनन्त इति गीयते" इति च गारुडे। गीतायाञ्च—

"नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥" इति

वस्तुतो निराकारस्यापि परमात्मनो भक्तानुग्रहाय विविधमनोहरनानाकरत्वमपि प्रदर्शितं स्वग्रन्थे श्रीरामानुजाचार्य्यचरणैः। तदुक्तं गीतायामपि—

"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥
येत्वक्षरमनिर्देश्यमव्यक्तं पर्य्युपासते।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥" इति

पुरुषार्थमुद्दिश्य सर्वशास्त्रप्रवृत्तिरिति त्रिविधदुःखात्यन्तनिवृत्तिरूपे पुरुषार्थे परमानन्दरूपे ब्रह्मस्वरूपे पूर्वपक्षतया लोकः शास्त्रञ्च पूर्वमीमांसाख्यं समुत्तिष्ठति। तद्यथा—आद्ये प्रकृतिपुरुषविवेकख्यातिमात्रसाध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लौकिकसाधनं पूर्वपक्षतया समुत्तिष्ठति । तथाहि—दुःखं नाम आध्यात्मिकाधिभौतिकाधिदैविकभेदभिन्नमात्मानं शरीरं मनो वा समधिकृत्य वातादिदोषवैषम्यनिमित्तं ज्वरादिबन्धुवियोगविषयविशेषादर्शननिबन्धनं मानसं सन्तापाद्याध्यात्मिकमौषधबन्धुसंयोगविषयविशेषदर्शनमात्रनिवृत्तिकम् । भूतं पृथिव्यादि समधिकृत्य जातमाधिभौतिकं स्थावरजङ्गमजनितं निरत्ययस्थानाध्यासादिनीतिशास्त्रपर्य्यालोचनमात्रप्रतिपक्षकम् । देवग्रहभूताद्यावेशमधिकृत्य जातमाधिदैविकं मणिमन्त्रोपयोगसत्प्रतिपक्षकमिति कृतमतिदुष्करेणानेकजन्मपरम्पराऽऽयाससाध्येन विवेकज्ञानेन शास्त्रोपायेनेति । द्वितीये परमानन्दरूपे ब्रह्मज्ञानैकमात्रसाध्ये पूर्वपक्षतया समुत्तिष्ठति मीमांसाशास्त्रं स्वर्गफलकयागादिसाधनोपदेशकं वर्णयति च यागादिकमेव दुःखाननुषङ्गिसुखसाधनमिति । तदुक्तम्—

आद्ये—"शकटं पञ्चहस्तेन दशहस्तेन वाजिनम् ।
गजं हस्तसहस्रेण देशत्यागेन दुर्जनम् ॥" इति
वर्जयेदिति शेषः ।

"अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥" इति च

द्वितीये—"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम् ॥" इति

आद्ये सिद्धान्तपक्षमाश्रित्य सांख्यः प्रवर्त्तते नेति । नहि लौकिकेन तेन तेनोपायेन तत्तद्दुःखं निवर्त्तते, निवर्त्तमाने वा सजातीयं वाऽपरं नाविर्भवति । तदेवमेकान्तस्यावश्यनिवृत्तेरत्यन्तस्यापुनरुत्पादस्याभाव इति । तदुक्तम्—

"नैकान्तात्यन्ततोऽभावात्" इति । शास्त्रीयन्तु विवेकज्ञानम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥
अनेकजन्मसंसिद्धिस्ततो याति परां गतिम् ।"

इत्युक्तदिशा दीर्घकालसाध्यमपि विद्यारूपं स्वविरोधिनीमविद्यामुच्छिनत् तन्मूलं दुःखत्रयं समूलकाषं कषति । न च ज्ञानबाधेनाज्ञानं पुनरुद्भवितुं स्वकार्य्यञ्च साधयितुं प्रभवति । तदुक्तम्—

"निरुपद्रवभूतार्थस्वभावस्य विपर्य्ययैः ।
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥" इति

द्वितीये वेदान्तशास्त्रं सिद्धान्तपक्षमाश्रित्य प्रवर्त्तते । नहि स्वर्गसुखं नाम नित्यम्, जन्यभावत्वेन विनाशित्वात् । नापि दुःखाननुषङ्गि निरतिशयं वा, पशुबीजादिहिंसया दुःखानुषङ्गात्, स्वर्गस्वाराज्यफलभेदेन सातिशयत्वात् । नित्यश्च दुःखाननुषङ्गिनिरतिशयब्रह्मानन्दरूपं परमपुरुषार्थ इति श्रुतिस्मृतिडिण्डिमः । परमत्वञ्च नित्यत्वादिकमेवास्य । द्विविधञ्च पुरुषार्थत्वम्, स्वतः परत इति । आद्यम्—अन्येच्छानधीनेच्छाविषयत्वरूपं परमानन्ददुःखनिवृत्त्यन्यतरमोक्षरूपफलगतम् । द्वितीयम्—अन्येच्छाधीनेच्छाविषयत्वरूपं धर्म्मादिसाधनगतम् । स च मोक्ष आत्मज्ञानात् । तथा च श्रुतिः—"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति, "आत्मवित् शोकं तरति" इति, "ब्रह्मवेद ब्रह्मैव भवति" इति चेति । ब्रह्मभावश्च मोक्ष इति । स चायं मोक्षो नित्यो ब्रह्मरूपत्वादेव । आत्यन्तिकदुःखनिवृत्तिपक्षेऽभावत्वादभावस्याधिकरणात्मकत्वेन ब्रह्मरूपत्वाद्वा न जन्मभावतयाऽनित्यतादोषमावहतीति । अत एव पूर्वमीमांसायाः पूर्वपक्षत्वाभिप्रायेण ब्रह्मजिज्ञासामवतारयामास भगवान् बादरायणः "अथातो ब्रह्मजिज्ञासा" इति । अथशब्द आनन्तर्य्यार्थको नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयानन्तर्य्यमाह । अतः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दो हेत्वर्थको धर्म्मज्ञानस्यानित्यफलकत्वं ब्रह्मज्ञानस्य नित्यफलकत्व- मिति विशेषमाह । वेदाध्ययनानन्तर्य्यं धर्म्मज्ञानानन्तर्य्यं वा नाथशब्दार्थः, धर्म्मपदेन वेदार्थवर्णने ब्रह्मणोऽपि वेदार्थतया धर्म्मजिज्ञासयैव गतार्थ- त्वात् । विनापि धर्म्मज्ञानं पूर्वाभ्यासेन जातविविदिषस्य ब्रह्मजिज्ञासोप- पत्तेः । "तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन" इति त्वसंस्कृतान्तः- करणाभिप्रायेण । बौधायनवृत्तिकारमतमवलम्ब्य धर्म्मज्ञानान्तर्य्यं वर्णितं ब्रह्मजिज्ञासायाः श्रीमद्रामानुजाचार्य्यचरणैरिति । क्षयित्वञ्च स्वर्गसुखस्य "यथेह कर्म्मचितो लोकः क्षीयते एवममुत्र पुण्यचितो लोकः क्षीयते" इति, "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति च श्रुतिस्मृतिप्रतिपन्नम् । अविशुद्धियुक्तत्वञ्च "स्वल्पः संकरः सप- रिहारः सप्रत्यवमर्षः" इतिपञ्चशिखाचार्य्यवचनसिद्धम्, "मा हिंस्यात् सर्वा भूतानि" इतिश्रुतिसिद्धञ्च । न चास्य "अग्नीषोमीयं पशुमालभेत" इत्यनेन सामान्यविशेषभावेन बाधः, आद्यस्यानारभ्याधीतत्वेन हिंसाया नरकसाधनत्वबोधकतया, परस्यारभ्याधीतत्वेन क्रतुसाधनत्वबोधकतया भिन्नविषयत्वेन विरोधाभावात् । तदुक्तम्—

"विरोधे हि वलीयसा दुर्वलं बाध्यते" इति । "अपाम सोमममृता अभूम" इति तु चिरस्थेमानं लक्षयति । तदुक्तम्—

"आभूतसम्प्लवं स्थानममृतत्त्वं हि भाष्यते" । इति
"न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ।" इति च

तत्त्वज्ञानन्तु हिंसादिसंकराभावाद्विशुद्धम् । तदुक्तम्—"तद्विपरीतः श्रेयान्" इति, "विवेकख्यातिरविप्लवा हानोपायः" इति चेति । एतच्च पुरञ्जनोपाख्याने पितृहूदेवहूशब्दनिरुक्तौ व्यक्तम् । अपि च ब्रह्माति- रिक्तस्य सर्वस्य मिथ्यात्वादपि न स्वर्गादेर्नित्यत्वशङ्कावसरः । तदेतद्विशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षमादर्शयितुं "यत्र त्रिसर्गो मृषा" इति। त्रिसर्गश्चाध्यात्मिकाधिभौतिकाधिदैविकरूपः इति। ब्रह्मणश्च प्रसिद्धाप्रसिद्धविकल्पे जिज्ञासाविषयत्वानुपपत्तावपि आत्मतया प्रसिद्धस्य तद्विशेषविप्रतिपत्त्या स्वार्थहान्यनर्थप्राप्तिदोषपरिहाणाय जिज्ञासाविषयत्वोपपत्तेः। विप्रतिपत्तिश्च शरीरेन्द्रियमनःक्षणिकविज्ञानशून्यकर्तृभोक्तृकेवलभोक्तृब्रह्मात्मभोक्तृतयाऽऽत्मनि चार्वाकादिवेदान्तिपर्य्यन्तानामितिवेदाविरोधितर्कोपकरणनिश्श्रेयसप्रयोजनवेदान्तवाक्यमीमांसावतारो ब्रह्मजिज्ञासोपन्यासमुखेन। मनःशरीरेन्द्रियक्षणिकविज्ञानपक्षेऽनित्यत्वदोषः। शून्यपक्षस्तु "नाभाव उपलब्धेः" इतिसूत्रनिरस्तः। कर्तृभोक्तृपक्षे विकारित्वप्रसङ्ग एव। "आत्मा स भोक्तुः" इत्यौपनिषत्पक्ष एव ज्यायानिति। रूपादिज्ञानं क्रियात्वेन करणमिन्द्रियं कल्पयति, छिदिरिव वास्यादि। तच्चेन्द्रियं दृश्यमानं गोलकादि, तच्छक्तिमात्रम्, शक्तिमद्द्रव्यान्तरम्, मन एव सुखादिज्ञानक्रियया कल्प्यमानं क्रमेण रूपेण रूपादिज्ञानक्रियाशक्तिमत्, आत्मा वा व्यापकः सन्नपि शरीरावच्छेदेन ज्ञानादिमानिव तत्प्रदेशविशेषावच्छेदेन चक्षुरादीन्द्रियमितिविकल्पः भौतिकमाहङ्कारिकमितिविकल्पश्च, सत्यपि गोलकादावन्धबधिरादेर्दर्शनश्रवणाद्यभावेनासत्यपि वृक्षादौ "तस्मात्पश्यन्ति तरवः" इत्युक्तदिशा दर्शनश्रवणात् शक्तिमद्द्रव्यान्तरकल्पनापेक्षया शक्तिमात्रकल्पने लाघवेऽपि लोके कर्तृकरणभेददर्शनेनाहङ्कारिकत्वस्य श्रुतावनुपलम्भेन "अन्नमयं हि सौम्य मनस्तेजोमयी वाग् दिशः श्रोत्रम्" इतिश्रुतिदर्शनेन भौतिकगोलकाद्यधिष्ठानाऽतीन्द्रियेन्द्रियसिद्ध्या नावकाशमर्हतः। तस्याभावादेवान्धबधिरव्यवहारः। अत एव कृष्णताराग्रवर्त्तिनासाग्रवर्त्तीत्यादि नैयायिकादीनामुद्घोषः। श्रोत्रन्तु प्रदेशविशेषावच्छिन्नमाकाशं वा दिग्वा सर्वथेन्द्रियमतीन्द्रियमिति। प्राप्यकारि अप्राप्यकारीत्यपरो विकल्पः। कुड्यान्तरितानुपलब्धेः प्राप्यकारीति ज्यायः। त्वगादि स्वदेशे विषयग्राहकम्। चक्षुःश्रोत्रे विषयदेशं गत्वा। अत एव भेरी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दो मया श्रुत इति व्यवहारः। श्रोत्रं स्वदेशे ग्राहकमितिवादिनान्तु वीचीतरङ्गन्यायेन कदम्बगोलकन्यायेन वाऽनन्तशब्दपूर्वोक्तव्यवहार-भ्रममूलकत्वकल्पना गौरवपराहता । इन्द्रियमनोबुद्ध्यादीनि—"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिः" इति-श्रुतिसिद्धानि परापरभावेन व्यवस्थितानि न प्रत्याख्यानमर्हन्ति । आहङ्कारिकत्वन्तु अहङ्कारोऽध्यात्मं व्यापको वा कारणमुभयथाऽपि प्रमाणाभावाद्दूरनिरस्तम् । पुराणे आहङ्कारिकत्वन्तु तदधीनत्वमात्रेण । शुष्कतार्किकाणां सावयवत्वेन घटादिवद्भौतिकत्वकल्पनन्तु मनोवदणुत्वेऽपि तुल्यभावेन तद्वदेव निरवयवत्वाधिभौतिकत्वसिद्ध्या स्वरूपासिद्धं सत्प्रतिपक्षितञ्च । गन्धादिषु रूपादिमात्रव्यञ्जकत्वेन दीपवच्चक्षुरादीनां तैजसत्वाद्यनुमानन्तु यद्यद्गुणव्यञ्जकं तत्तदारब्धमिति सामान्यव्याप्तौ शब्दग्राहकेऽनारब्धे श्रोत्रेऽनैकान्तिकम्, रूपादिचतुष्टयमादाय विशेष-व्याप्तौ मनस्यनैकान्तिकम्, रूपादिसाधारण्येनात्मवन्मनसोऽभौतिकत्वं सङ्ख्यादिसाधारण्येन चक्षुरादिष्वतिप्रसक्तमित्यागमिकमेव भौतिकमिन्द्रियमिति । सर्वत्र दृष्टकार्य्यकत्वेनेन्द्रियसर्वगतत्वानुमानन्तु यौगानां सर्वत्रेति कृत्स्नजगद्विवक्षायां भागासिद्धम्, शरीरदेशविवक्षायां शरीरेऽनैकान्तिकम्, सोपाधिगमनक्रियावत्त्वादाकाशादिवत्तत्त्वन्तु प्राणोपाधिगमनक्रिये शरीरेऽप्यतिप्रसक्तम् । किञ्च सर्वगतत्वे सर्वत्र विषयोपलब्धिप्रसङ्गः । शरीरे एव वृत्तिलाभे तु सर्वगतत्वकल्पना न प्रमाणप्रयोजनवती । अप्राप्यकारित्वकल्पनन्तु सुगतानां घ्राणादिषु दूरत एव गन्धाद्युपलब्धिप्रसङ्ग-बाधितम्, चक्षुःश्रोत्रयोर्घ्राणादिवत्प्राप्यकारित्वानुमानबाधितञ्च । काचाभ्रपटलान्तरितदर्शनन्तु काचादेः स्वच्छद्रव्यत्वेनाप्रतिघातकत्वादुपपद्यते । प्राप्यकारित्वादेव कुड्याद्यन्तरितानुपलब्धिः । तत्सिद्धमिन्द्रियमतीन्द्रियं भौतिकं परिच्छिन्नं प्राप्यकारीति । मनःप्रधानकमिन्द्रियं मनःसम्बन्धादेव विषयग्राहकम् । मनसैव चात्मा सुखादिकञ्च गृह्यते । तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मनोमात्रस्य गोचरः। मनोग्राह्यं सुखं दुःखमिच्छाद्वेषो मतिः कृतिः।" इति मन एव सर्वजगत्कारणम्। तदुक्तम्—

"बहुनात्र किमुक्तेन मनःकर्म्मद्रुमाङ्कुरः।
तस्मिञ्छिन्ने जगच्छाखी छिन्नकर्म्मतनुर्भवेत्॥
मनः सर्वमिदं सौम्य तस्मिन्नन्तश्चिकित्सिते।
चिकित्सितो वै सकलो जगज्जालमयो भवेत्॥
तदेतज्जायते लोके मनोमननमाकुलम्।
तस्य चिन्ताप्रसादेन बध्यते मुच्यते पुनः॥
यथा तिलकणे तैलं गुणो गुणिनि वा यथा।
यथा धर्म्मिणि वा धर्म्मस्तथैव चित्तके जगत्॥
रश्मिजालं यथा सूर्य्ये यथाऽऽलोकस्तु तेजसि।
यथौष्ण्यं चित्रभानौ च मनसीदं तथा जगत्॥
शैत्यं यथैव तुहिने यथा नभसि शून्यता।
यथा चञ्चलता वायौ मनसीदं तथा जगत्"॥ इति

किञ्च मनस एव साम्राज्यमेतत् यत् सत्यपि क्रियाप्रकरणे प्रकरणमनादृत्य श्रुत्यादिप्राबल्यात् पुरुषायुषस्यावयवभूतेष्वहःसु तावत्संख्यकमनोवृत्तिषु विद्याशेषभूतासु क्रियावयवत्वं सम्पाद्यते। नहि वस्तुतो मनश्चिदादीनां क्रियावयवत्वं सम्पदा लिप्सितव्यं तेन यत्किञ्चित् कर्म्मसु क्रियते मनसैव तद्वृत्तिषु सम्पादनीयम्। तेन मनश्चिदादीनां विद्याशेषत्वम्। अपि चोपासनाकाण्डे—"मनो ब्रह्मेत्युपासीत", "आदित्यं ब्रह्मेत्युपासीत", लोके—"शालिग्रामशिलां विष्णवित्युपासीत" इत्यादिकं मन आदिषु ब्रह्मादिबुध्योपासनं मनोमाहात्म्यादेव। तस्मादेव च जाग्रति स्वप्ने च विषया मनोवृत्त्यैव विषयीक्रियन्ते। इन्द्रियाणि तु मनोवृत्तिशेषतयैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुपयुज्यन्ते । प्राधान्यादेव च परत्वमिन्द्रियापेक्षया श्रुतावुक्तम्—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इति, "इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः" इति च । अपि च—ज्ञानिनां सङ्कल्पमात्रेण पितृलोकादिप्राप्तिं दर्शयन्ती श्रुतिर्मनोमाहात्म्यमेव वर्णयति । तद्यथा—"स यथा पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुपतिष्ठन्ते" इति । सङ्कल्पो मनस एव मुख्यो धर्म्मः । तदुक्तम्—"सङ्कल्पात्मकमत्र मनः" इति । तदात्मत्वं वृत्तिवृत्तिमतोरभेदादिति । स्मृतिश्च मनसः प्रधानभूतं कार्य्यम् । मनननिदिध्यासने अपि मनसः कार्य्यभूते । अपि च "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा ह्रीर्धीर्भीर्धृतिरधृतिरित्येतत्सर्वं मन एव" इति श्रुतिरपि कामादीनां मनोधर्म्मत्वाभिप्रायेणैव । "मनसैवानुद्रष्टव्यम्" इति श्रुतिरपि मनोऽधीनत्वं ब्रह्मसाक्षात्कारस्य चरमवृत्तिरूपस्यावगतिपदाभिधेयस्य विद्यारूपस्याविद्यानिवर्त्तकस्य दर्शयति । "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति त्वसंस्कृतमनोविषयम् । मन एव च बुद्धिचित्तान्तःकरणशब्देनाभिलप्यते । अत एव मनोबुद्ध्यन्तःकरणचित्तपदमादाय न्यायसांख्यवेदान्तयोगानां प्रवृत्तिः । तर्कोऽपि व्याप्यारोपेण व्यापकारोपरूपः "यदि पर्व्वतो निर्वह्निः स्यान्निर्धूमः स्यात्" इति मनस एव व्यापारः । तदेव सुखदुःखादिकरणतया परात्मलिङ्गम् । आत्मैव परात्मेति च वेदान्तसरणिः । तदुक्तम्—

"मन एव मनुष्याणां कारणं सुखदुःखयोः" । इति
"इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः ।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः ॥" इति च

अत्र चेतना मनोवृत्तिरूपा । तद्यथा—चेतना ज्ञानरूपा द्विविधा । आत्मरूपा "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः । वृत्तिरूपा ज्ञानरूपचैतन्यावच्छेदकत्वात् । तदुक्तं विवरणे—"ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारात्" इति । आत्मा च मनोवृत्तिसुखादिलिङ्गकस्तेभ्यो भिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव । न तु सुखादिव्यतिरेकेणानुपलब्धेः सुखादिरूप एवेति । सुखादेस्त्रिगुणमनःपरिणामत्वेन त्रिगुणतया संहतरूपत्वात् । आत्मनस्तद्वैपरीत्यात् । ते च बुद्ध्यादयः स्वस्वासाधारणाध्यवसायादिव्यापारयोगिन आत्मनः सुखादियोगाय कल्पन्ते । मनस्तु सङ्कल्परूपासाधारणव्यापारयोग्यपि सात्त्विकाहङ्कारकार्य्यत्वसाधर्म्येणेन्द्रियमपि । तदुक्तम्—

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्म्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥" इति
"अध्यवसायो बुद्धिर्धर्म्मो ज्ञानं विराग ऐश्वर्य्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम् ॥" इति
"अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥
उभयात्मकमत्रमनः सङ्कल्पकमिन्द्रियश्च साधर्म्यात् ॥" इति च

सर्वो हि जन आलोच्य मत्त्वाऽभिमत्य निश्चित्य प्रवर्त्तत इति स्वात्मसात्त्विकम् । आलोचनमननाभिमाननिश्चयाः क्रमेणेन्द्रियमनोऽहङ्कारबुद्धिव्यापाराः । तदुक्तम्—

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्व्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं मुग्धवस्तुजम् ॥
अतःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया ।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता ॥
सम्मुग्धं वस्तुमात्रं हि प्राग्गृह्णन्त्यविकल्पितम् ।
तत्सङ्कल्पविकल्पाभ्यां कल्पयन्ति मनीषिणः" ॥ इति

अपि च विपर्य्ययाशक्तितुष्टिसिद्ध्याख्यः स्वस्वावान्तरप्रभेदभिन्नः शास्त्रे प्रत्ययसर्गतयाऽभिधीयमानो मानस एव सर्गः । सङ्कल्पश्च समाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानजातीयाभ्यां व्यवच्छिन्दन् भवति मनोलक्षणम् । तदुक्तम्-"समानासमानजातीयव्यवच्छेदो हि लक्षणार्थः" इति । ज्ञानं सगुणात्मवादिमते मनोजन्यमात्ममात्रवृत्ति सप्रभेदानुभवस्मृतिरूपम् । तदेवं मन एव जडमप्यात्मानं चक्षुरादिप्रमाणसहकृतमात्मनि सन्निकृष्य सप्रभेदं ज्ञानं जनयत्-चेतनं करोति । स्वयञ्च ज्ञानक्रियाकरणतया कल्प्यमानं सत्यपि नानेन्द्रियार्थसन्निकर्षे ज्ञानायौगपद्येन-अणु निरवयवं नित्यं सिद्ध्यति । दीर्घशष्कुलीभक्षणस्थले ज्ञानयौगपद्याभिमानस्तु-उत्पलशतपत्रभेदन्यायेनालातचक्रन्यायेन वा । तदुक्तम्—"अयौगपद्याज्ज्ञानानां मनसोऽणुत्वमिष्यते" इति ।

निर्गुणात्मवादिमते तु कार्य्यं सावयवमनित्यं स्वस्मिन्नेव क्रमेण यौगपद्येन वा ज्ञानादिवृत्तिमद्भवति । करोमि जानामीति तु वृत्तिज्ञानादिकमात्मनि संयोगोपाधिकम् । तदुक्तम्—

"तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः" ॥ इति
"युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः" ॥ इति च

निर्गुणमते वृत्त्युपलब्ध्योर्मनआत्मनोः परिणामप्रतिबिम्बतया भेदः । सगुणमतेत्वात्मवृत्तितयाऽभेदः । तदुक्तम्-"वृत्त्युपलब्धिर्ज्ञानमित्यनर्थान्तरम्" इति । ज्ञानेन्द्रियतद्विषयाधिष्ठानज्ञानानां पञ्चत्वं सकलवादिसिद्धम् । मनस इन्द्रियत्वमिति दार्शनिकाः, नेत्यौपनिषदाः । तदुक्तम्—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इति । कथमिन्द्रियत्वे तत्परत्वमिति तदाशयः । विशेषगुणशून्यत्वज्ञानासमवायिकारणसंयोगाश्रयत्वस्पर्शशून्यत्वलिङ्गैः कालात्माकाशवन्मनोवैभवत्वानुमानन्तु ज्ञानायौगपद्यलिङ्गकाणुत्वानुमानबाधितम् । कार्य्याणां सामग्रीपरम्परागवेषणा तु कार्य्यसदातन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वानवस्थापातभीता नात्मानं लभते। अत एव ज्ञानं स्वप्रकाशमिति प्राभाकरादयः। इतरथा ज्ञानं ज्ञातमर्थसाधनतया प्रयोजकं प्रवृत्तिनिवृत्त्योरितिज्ञानपरम्परायामनवस्थैव। परप्रकाश्यमितिवादिनस्तु—त्रिचतुरादिकद्रागवेषणामात्रेण वस्तुसिद्ध्या प्रवृत्त्यादिसिद्धौ नानवस्थानिर्मोद्दप्रसङ्गवस्त्वन्तरप्रवृत्तिविघातापादकतयाऽऽत्मानं लभत इति मन्यन्ते। एतेनात्मनोऽपि ज्ञानरूपस्य स्वप्रकाशत्वं व्याख्यातम्। तदुक्तम्—

"अत्रायं पुरुषः स्वयं ज्योतिः" इति। सगुणवादेतु—प्रत्यक्षादिविषयः। तदुक्तम्—"अध्यक्षो विशेषगुणयोगतः" इति। ज्ञानं ज्ञाततालिङ्गकानुमितिग्राह्यमिति भाट्टाः। अनुव्यवसायरूपमानसप्रत्यक्षग्राह्यमिति तार्किकाः। साक्षिवेद्यमित्यौपनिषदाः। स्वयं प्रकाशमिति प्राभाकराः। मन एव च योगे चित्तमिति शब्दितं प्रमाणविपर्य्ययविकल्पनिद्रास्मृतिरूपवृत्तिपञ्चकं क्रमेण क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमित्यवस्थापञ्चकम् चरमद्वये सम्प्रज्ञातासम्प्रज्ञातसमाध्युपयोगिविवेकख्यात्या गुणवैतृष्ण्यरूपपरवैराग्यसम्पादनद्वारा मोक्षाय कल्पते। अविद्यास्मितारागद्वेषाभिनिवेशरूपक्लेशपञ्चकमपि तस्यैव वृत्तिविशेषः। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तदुक्तम्—"क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः", "सति मूले तद्विपाको जात्यायुर्भोगाः", "विवेकख्यातिरविप्लवा हानोपायः" इत्यादि। विभूतयोऽपि नानाविधास्तारकज्ञानान्ताः तृतीयपादप्रतिपादिता योगाङ्गतया तद्वृत्तिरूपधारणाध्यानसमाधिमेलनरूपसय्यँमरूपतत्प्रसादलभ्याः। तदुक्तम्—"त्रयमेकत्र सय्यँमः", "भुवनज्ञानं सूर्य्यसय्यँमात्" इत्यादि। तारकज्ञानं सर्वविषयं सर्वथा विषयमक्रमञ्चेति। कैवल्यमपि "गुणानां प्रतिप्रसवः स्वरूपप्रतिष्ठा वा चितिशक्तिः" इत्युक्तिरूपं विवेकख्यातिपरवैराग्यरूपतत्प्रसादलभ्यमेव। अपि च—ईश्वरसिद्धिरपि निरतिशयज्ञानरूपतद्वृत्तिप्रसादलभ्यैव, ईश्वरस्यापि योगमते शुद्धसत्त्वोपाधिकत्वान्मनस एव सत्त्वरूपत्वात्। तदुक्तम्—"तत्र निरतिशयं सार्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञबीजम्" इति, "रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इति च । मनस एव सत्त्वासत्त्वाभ्यां संसारापवर्गौ । तत्सत्त्वासत्त्वे च वृत्तिसद्भावतन्निरोधाधीने । वृत्तेरेव च जीवनतया तत्स्थितिसम्पादकत्वम् । तदुक्तम्— "वृत्तिर्वर्त्तनजीवने"इति । भवति वृत्तिनिरोधश्चित्तनिरोधोपायतयाऽपवर्गकारणमिति । मनश्च प्रतिशरीरं ज्ञानायौगपद्यलिङ्गमेकमेव । नानात्वं लिङ्गाभावान्नात्मानमासादयेदिति । मनःसन्निकर्षादेव ज्ञानाय भवतीन्द्रियमिति सत्यपिसर्वेन्द्रियसन्निकर्षेऽणुना मनसा युगपदसंयोगाज्ज्ञानायौगपद्यं सिद्ध्यति । वस्तु च चिन्त्यमचिन्त्यमिति द्विविधम् । मनोमात्रवेद्यं सुखादि चिन्त्यम्, स्वेतरसहकृतवेद्यं घटाद्यचिन्त्यमिति । मनश्च ज्ञानभावाभावलक्षणकं सत्यपीन्द्रियार्थसन्निकर्षे । तदुक्तम्—

"लक्षणं मनसो ज्ञानस्याभावो भाव एव च ।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्त्तते ॥" इति

तदसन्निकर्षे ज्ञानमिति शेषः । कारणं तावद्द्विविधम्, बाह्यमाभ्यन्तरञ्च । बाह्यं दशविधम्, ज्ञानकर्म्मेन्द्रियभेदात् । आन्तरं त्रिविधम्, मनो बुद्धिरहङ्कार इति । त्रयञ्चात्मनो विषयोपलम्भे द्वारि । द्वारभूतानि बाह्येन्द्रियाणि । इन्द्रियालोचितं हि वस्तु सङ्कल्पाभिमानाध्यवसायैस्त्रयमात्मनि समर्पयति । तदुक्तम्—

"सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥" इति

मनसो ज्ञानायौगपद्यलिङ्गत्वं गौतमेनाप्युक्तम् "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"इति । व्याकृतञ्च वात्सायनेन—सत्स्वपि स्मृत्यादिषु लिङ्गेषु भवति मनो ज्ञानायौगपद्यलिङ्गमपि । स्मृत्यादयोऽपीन्द्रियान्तरेणासन्तः कार्य्यतया कारणं मनो ज्ञापयन्ति । मनोनपेक्षत्वे चेन्द्रियाणां युगपत्सन्निकर्षे यौगपद्येनोत्पद्येरन् ज्ञानानि । नचैतदस्ति, तस्मादस्ति मन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्रियान्तराणां नियन्त्रणप्रेरणाकर्षणावरोधनहेतुभूतमिति । यत्संयोगासंयोगाभ्यां ज्ञानस्य भावाभावाविति । तदुक्तम्—

"तदेतज्ज्ञायते लोके मनोमननमाकुलम् ।
मनसो व्यतिरेकेण देहः क्व किल दृश्यते ॥" इति
"दृश्यात्यन्तासम्भवेन ऋतेनाऽन्येन हेतुना ।
मनःपिशाचप्रशमं याति कल्पशतैरपि ॥
रश्मिजालं यथा सूर्य्ये यथाऽऽलोकस्तु तेजसि ।
यथौष्ण्यं चित्रभानौ च मनसीदं तथा जगत् ॥
शैत्यं यथैव तुहिने यथा नभसि शून्यता ।
यथा चञ्चलता वायौ मनसीदं तथा जगत् ॥
बहुनात्र किमुक्तेन मनःकर्म्मद्रुमाङ्कुरम् ।
तस्मिञ्छिन्ने जगच्छाखी छिन्नकर्म्मतनुर्भवेत्" ॥इतिच

"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इत्यत्र सतीन्द्रियार्थसन्निकर्षे इत्यादिः । यथैव हि सत्यपीन्द्रियार्थसन्निकर्षे मनःसन्निकर्षमन्तरेण न ज्ञानमुत्पद्यते, तथैवेन्द्रियसन्निकर्षमन्तरा मनःसन्निकर्षमात्रादपि नोत्पद्यत इति परस्परापेक्षं सन्निकर्षद्वयमिति । त्रिगुणमपि मनः सत्त्वप्रधानतया सत्त्वसंज्ञकं भवति । ज्ञानकर्म्मेन्द्रियमाहङ्कारिकम्, भूतानि चाकाशादीनि, शब्दादितन्मात्रैरेकैकाधिक्येन परं परमारभ्यमाणानि क्रमश एकद्वित्रिचतुःपञ्चगुणानि समुत्पद्यन्ते । इत्येवं प्रकृत्यादिचतुर्विंशतितत्त्वनिष्पन्नः पुरुषो देवगोनरादिरूपेण सम्पद्यत इति । मनोऽभौतिकत्वात्सर्वविषयमिन्द्रियान्तराणि भौतिकत्वात्प्रतिनियतरूपादिविषयाणि । शरीरं त्रिविधम्, स्थूलं सूक्ष्मं तन्मात्रिकञ्च । आद्यं षाट्कौशिकं मातापितृजं विनाशि । तदुक्तम्—"मातापितृजा निवर्त्तन्ते" इति । द्वितीयं लिङ्गशरीरमिन्द्रियादिसप्तदशात्मकमाप्रलयं स्थायि । तदुक्तम्—"सप्तदशैकं लिङ्गम्" इति, "प्रत्युत्पन्नमशक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियतं महदादिसूक्ष्मपर्य्यन्तम्" इति च । तृतीयं प्रायणे मरणाजन्मान्तरालकाले लिङ्गशरीराधारत्वेन कल्पितम् । तदुक्तम्—

"चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया ।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" ॥ इति

पदार्थकल्पनन्तु व्यवहारानुरोधि यावद्व्यवहारापेक्षितं न नियतम् । अत एव यत्कार्य्यं यत्स्वभावानुगतं तत्तत्स्वभावसामान्यकारणमिति न्यायमते घटादिकं मृत्स्वभावानुगतं तत्स्वभावचूर्णकपालादिकारणकमित्यापरमाणु कार्य्यकारणभावः समवतिष्ठते । साङ्ख्यमते च—सुखदुःखमोहस्वभावानुगतमाप्रधानं सत्त्वरजस्तमःस्वरूपमवतिष्ठते । पूर्वमते भोक्तृतया जीवात्माऽचेतनप्रवृत्तिश्चेतनाधिष्ठानप्रयोज्य इति वास्यादिदृष्टान्तेन परमाणुप्रवृत्त्या परमात्मा कल्प्यते । परमते च—"त्रिगुणमविवेकिविषयः" इत्युक्तदिशा सर्वं प्रकृत्यादि संहतमिति संघातपारार्थ्येनासंहतः पुरुषोऽनुमीयत इति यावत्परमाणुप्रकृति प्रमेयं कल्पितम्भवति । तदुक्तं खण्डने—

"प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि ।
बालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः" ॥ इति

सांख्ये च—"न वयं षट्पदार्थवादिनो वैशेषिकवत्" इति, "षोड़शादिष्वेवम्" इति चेति । मनश्च युगपज्ज्ञानानुत्पत्त्या सुखादिज्ञानकरणतया च कल्पितं मनोमयरूपतया पञ्चकोशान्तर्गतं ताराऽरुन्धतीन्यायेन ब्रह्मावबोधनिमित्तं भवति । निदिध्यासनसंस्कृतञ्चात्मसाक्षात्काराय कल्पते । तदुक्तम्—"मनसैवाऽनुद्रष्टव्यम्" इति । "अप्राप्यमनसा सह" इति चासंस्कृतमनोऽभिप्रायम् । तदिदं मनो ज्ञानायौगपद्यादेवाणुपरिमाणम् । दीर्घशष्कुलीभक्षणे रासनादियौगपद्याभिमानस्तु—आलातचक्रवदुत्पलपत्रशतभेदवच्चाशुसञ्चारहेतुकः । नचेदं ज्ञानायौगपद्यं बुद्ध्यात्महेतुकम्, निर्व्यापारत्वान्मनोव्यापारौपाधिकव्यापारवत्त्वाच्च । चरकवचनमपि ज्ञाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौगपद्यलिङ्गमेव मनो व्यवस्थापयति । "युगपज्ज्ञानानामभावो मनसो लिङ्गम्" इति । न्यायेन सर्वं व्यवस्थापयति नैयायिकः। स चायं न्यायः पञ्चावयवात्मकः । ते चावयवाः—प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः । प्रतिज्ञा च साध्यनिर्द्देशः पर्वतो वह्निमानिति । हेतुः तृतीयान्तं पञ्चम्यन्तं वा वाक्यम् धूमादिति । उदाहरणं सनिदर्शनं व्याप्तिप्रदर्शकं वाक्यम् यो यो धूमवान् स वह्निमान् यथा महानसम् इति । उपनयो व्याप्यस्य पक्ष-धर्म्मताप्रदर्शकं वाक्यम् वह्निव्याप्यधूमवानयमिति । निगमनं पक्षधर्म्म-ताज्ञानप्रयोज्यतया साध्यनिर्णयजनकं वाक्यम् तस्माद् वह्निमानिति । त्वङ्मन संयोगश्च ज्ञानसामान्ये कारणं रासनादिसामग्र्याः प्रतिबन्धक-तया न तत्काले त्वाचप्रत्यक्षमिति । वस्तुतस्तु चर्म्ममनःसंयोगो ज्ञानसा-मान्येकारणम्,रासनादिकालेत्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति।"सुषु-प्तिकाले च चर्म्ममनःसंयोगाभावान्न किमपिज्ञानम्" इति पक्षधरमिश्राः । परे तु सुषुप्तिः प्रलयरूपा, कार्य्यमात्रध्वंसश्च प्रलय इति। "तन्मनोऽसृ-जत" इति मनोऽपिकार्य्यतया विनाशीति न तद्वृत्तिरूपं तत्संयोगासमवा-यिकारणकं वा ज्ञानं सुषुप्तौ। तथा च प्रबोधे परामर्शः—"सुखमहमस्वाप्सं न किञ्चिदवेदिषम्" इति । तच्च मनो दीर्घशष्कुलीभक्षणस्थले रासनादियुगपज्ज्ञानोत्पत्त्या महत्, अणु चेत् प्रतिशरीरमनेकं वेति केचित्कल्पयन्ति । नैयायिकास्तु—मनः परममहच्चेत् सर्वशरीरावच्छेदेन सर्वस्य ज्ञानोत्पादप्रसङ्गः। शरीरपरिमाणश्चेन्मध्यमपरिमाणतया घटादिव-द्विनाशित्वप्रसङ्ग इति। अणुपरिमाणम्भवदाशुसञ्चारितयालातचक्रन्यायेनो-त्पलपत्रशतव्यतिभेदन्यायेन वा क्वचिद्यौगपद्याभिमाननिमित्तम्भवति । यथाहि तृणाद्यग्रसंलग्नं स्फुलिङ्गमाशु सञ्चरत् क्रमेण तत्तद्देशे संयुज्यमा-नमप्याशुसञ्चारादेव दोषादज्ञायमानक्रममालातचक्रभ्रमं प्रयोजयति । यथा वा सूच्यग्रं तीक्ष्णतया पत्राणां वा कोमलतया क्रमेण पत्राणि भिन्ददपि निरुक्ताभ्यामेव दोषाभ्यां युगपद्व्यतिभेदभ्रमं जनयति, तथै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदपि द्रष्टव्यमिति । वस्तुतस्तु न्यायादिमतस्य शिष्टाऽपरिग्रहादिनाऽनादरणीयतया विभ्वपि मनः स्वस्वादृष्टबललब्धशरीरसंयोगेनैव ज्ञानजनकतया सामग्रीयौगपद्यायौगपद्याभ्यां ज्ञानयौगपद्यायौगपद्यहेतु भवति । तदुक्तमीश्वरकृष्णेन—

"युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः" ॥ इति

बहुत्वाभिमानस्तु व्यापारबहुत्वौपाधिक आत्मन इव चन्द्रस्येव च नानौपाधिकः । तथा च श्रुतिः—"रूपं रूपं प्रतिरूपो बभूव" इति, "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति, "इन्द्रो मायाभिः पुरुरूप ईयते" इति च । स चायमभिमानः शरीरे अहं स्थूलः कृशः इत्यात्माऽभिमान इवाऽध्यासरूपः । स्मृतिरूपः परत्र पूर्वदृष्टाऽवभासलक्षणः । परत्र पूर्वेत्यधिष्ठानारोप्यरूपसत्यानृतमिथुनीकरणमुक्तम् । दृष्टेति दर्शनमात्रमुपयोगि न तु वस्तुसत्तेति । अवेति प्रत्ययान्तरबाधरूपावसादावमानाभ्यां बाध्यमानत्वमुक्तम् । स्मृतिरूप इति स्मृतेरूपमिव रूपं यस्येति योगेनासन्निहितविषयकत्वलाभेन प्रत्यभिज्ञाव्यवच्छेद उक्त इति । सजातीयासजातीयव्यवच्छेदलाभाल्लक्षणमिदं सम्पूर्णं भवति । "एतदेवान्यत्रान्यधर्म्मावभासः" इत्यन्यथाख्यातिवादिनः । "इदमिति रजतमिति च स्मृत्यनुभवरूपतया सत्यपि स्वरूपतो विषयतश्च भेदे विवेकाग्रहनिमित्तो व्यवहारः" इत्यख्यातिवादिनः । "सत एव शुक्तिकादे रजतादिविपरीतकल्पना" इति विपरीतख्यातिवादिनः । "सर्वं सत्" इति सत्ख्यातिवादिनः । "असत्" इत्यसत्ख्यातिवादिनः । "बाधाबाधाभ्यां सदसत्" इति सदसत्ख्यातिवादिनः । "ज्ञानमेव" इत्यात्मख्यातिवादिनः । "बाधभानाभ्यां सदसद्विलक्षणम्" इत्यनिर्वचनीयख्यातिवादिनः । तदेवं निरूप्यमाणं मनः प्रतिशरीरमेकम् । ज्ञानायौगपद्यादणु । महत्त्वेऽनेकेन्द्रियसन्निकर्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानयौगपद्यं स्यात्। संयोगादिगुणवत्त्वाद्द्रव्यम्, समवायिकारणतया द्रव्याभावान्नित्यमिति च भवति। तदुक्तम्—"तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते" इति। तदिदं मनः सम्यङ्निरूपितं पुनर्निरूप्यमाणं भवति स्वीकृतपरित्यागादिरूपप्रतिज्ञाहान्यादिरूपनिग्रहस्थानव्यभिचारादिरूपहेत्वाभासविवेकाय। तद्यथा—शब्दो नित्योऽनित्यो वेति विकल्पे--अनित्य इति प्रतिज्ञाय श्रावणत्वाच्छब्दत्ववन्नित्यमित्येवमादिनिरूपणं प्रतिज्ञाहान्यादिनिग्रहस्थानमापादयति। भावत्वादित्येवं व्यभिचारादि। प्रयत्नानन्तरभावित्वादनित्य इति, प्रयत्नाभिव्यङ्ग्यत्वान्नित्य इंति वा निरूपणं निरुक्तदोषाद् विविनक्ति। तदुक्तम्—"कर्म्मैके तत्र दर्शनात्" इति, "नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्" इति। अभ्यामेव च हेतुभ्यां नित्यानित्यवादम्, भेदेऽभेदे वाऽऽत्यन्तिके घटः पट इति, घटः कुम्भ इति वा सामानाधिकरण्यादर्शनात् नीलो घट इति सामानधिकरण्यदर्शनेन द्रव्यस्य गुणादिभिर्भेदाभेदवादञ्च समर्थयन्ते वादिनः। वस्तुतस्तु "परस्परविरोधे हि न प्रकारान्तरस्थितिः" इति, "परस्परविरुद्धद्वयमध्ये एकतरनिषेधस्य तदितरविधिनान्तरीयकत्वम्" इति, "सहानवस्थानं विरोधः" इति च पर्य्यालोचनेन सोऽयं क इति प्रत्यभिज्ञया नित्य एवेति। प्रत्यभिज्ञायाः सैवेयं दीपकलिकेतिवत् सादृश्यादप्युपपत्त्या—उत्पन्नः क इति प्रतीत्याऽनित्य एवेति। गुणगुणिनोः समवायात् सम्बन्धस्य भेदनिबन्धनत्वाद् भेद एव। गुणसमुदायो द्रव्यमिति सिद्धान्तेन नीलो घट इति प्रतीत्या वाऽभेद एवेति। तच्च मनोऽन्तःकरणरूपं साङ्ख्यमते त्रिगुणप्रकृतिपरिणामभूतं गुणानामुपचयापचयाभ्यां सुखदुःखमोहेभ्यो भवत् सात्त्विकं राजसं तामसम्भवदपि प्रतिशरीरं नानेकम्भवति देवदत्त इव बालो युवा स्थविर इति व्यवह्रियमाणः। विभुविशेषगुणायौगपद्यमपि मनसोऽणुत्वहेतुकं मनसोऽणुत्वं गमयति। महत्त्वेऽपि करणधर्म्मत्वप्रयुक्तमयौगपद्यम्। नहि नीलपीताद्यनेकगुणसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लग्नमपि चक्षुर्युगपदनेकज्ञानं जनयति । तत्कस्य हेतोः ? करणधर्म्मत्वादेवेति । तदाह पतञ्जलिः—"कार्य्यकालं संज्ञापरिभाषम्" इति, "यथोद्देशं संज्ञापरिभाषम्" इति, "प्रकृतिवदनुकरणम्भवति"इति सर्वमेतत्—शास्त्रतत्त्वेन्दुशेखरतोऽवसेयम् । सुखदुःखमोहाश्च परस्परविरुद्धाः । अत एव सहाभवन्तो विभिन्नान्येव सत्त्वादीनि कारणानि कल्पयन्ति । प्रकाशलाघवादिकन्तु सहभवन्नानेकं कल्पयति । किञ्चित्कार्य्यमनेकमपि सहभवदसहभवद्वा क्रमेण भवन्नानेकं कारणं कल्पयति । यथैव दाहतापप्रकाशादिकं वह्निं सूर्य्यं वा । घटकरणगवाकलनसर्पमारणादिकं दण्डम् । तथैवानुभवस्मरणप्रयत्नादि मन इति सिद्ध्यति मनः प्रतिशरीरमेकमिति । सङ्कल्पनं नाम मनसोऽसाधारणो व्यापारः । सात्त्विकाहङ्कारजन्यत्वसाधर्म्येणेन्द्रियं भवदुभयविधेन्द्रियसहकारि भवत्युभयात्मकम् । स्मरणादिनानाव्यापाराच्चित्तादि नानारूपं व्यवह्रियते चित्तमिति बुद्धिरित्यन्तःकरणमिति मन इति योगसाङ्ख्यवेदान्तन्यायादिषु । तदुक्तम्—

"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ।।" इति
"सङ्कल्पकमत्र मनः इन्द्रियश्च भवति साधर्म्यात् ।
गुणपरिमाणविशेषान्नानात्वं बाह्यभेदाश्च ।।" इति
"उभयात्मकमत्र मनः" इति च ।

तदिदं राजवत्सर्वेन्द्रियप्रवर्त्तकं प्रधानमिन्द्रियेषु भवति । ज्ञानमप्यन्वयव्यतिरेकाभ्यामेतत्प्रभावादेव नानाविधं भवति । सत्येतस्मिन् स्वप्नप्रबोधयोर्भावात्, असति तु सुषुप्त्यादावभावात् । तदिदं सर्वव्यवहारसाधकं न प्रत्याख्यानमर्हतीति । अपि च—करणं कर्त्तृव्यापाराधीनव्यापारं दृष्टं कुठारादि । मनोऽपि करणं क्रमवत्कर्त्तृबुभुत्साधीनप्रवृत्तिकं न युगपन्नानाज्ञानाय कल्पत इति न महत्त्वकल्पनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्रयोजनमित्यणु निश्चीयते । स्मरणप्रयोजकं सत् पूर्वानुभवजसंस्कार-प्रत्युत्पन्नेन्द्रियसंयोगाभ्यां स्मरणानुभवावेकविषयतया जनयत्तत्तेदन्तो-ल्लेखेन प्रत्यभिज्ञानमपि जनयति । 'तदिदं प्रत्यभिज्ञानमांशिकप्रत्यक्षस्म-रणरूपम्' इति केचित् । 'इन्द्रियसन्निकर्षस्मरणरूपज्ञानलक्षणलौकिकालौ-किकसन्निकर्षप्रयोज्यलौकिकालौकिकोभयविषयताशालि सुरभि चन्दनमिति प्रत्यक्षमिव प्रत्यक्षम्' इत्यन्ये । 'स्मरणप्रत्यक्षविषयाभेदभानाज्ज्ञानान्तरमेव' इति परे । वस्तुतस्तु—चक्षुरेव सन्निकर्षसंस्कारसहायं तत्तेदन्ताशालि-प्रत्यक्षजनकमिति न सिताऽसितसरित्सम्भेद इवांशिकस्मरणप्रत्यक्षात्मक-करम्बितज्ञानकल्पनम् । तदुक्तं खण्डने—

"तत्सदृक् प्रत्यभिज्ञानं यत्ते संस्कारबोधकम् ।
सहकारि तदेवास्तामक्षस्यातिप्रसक्तिनुत" ।। इति

तदिदं मनः आन्तरमपि भवत्तडागोदकमिव कुल्यया केदारसंयुक्तं केदाराकारमिन्द्रियप्रणालिकया विषयसंयुक्तं विषयाकारं भवति । अपि चेदं मनः शकुनिरिवान्यत्र शान्तिमलभमानो नीड़लीनः स्वप्नप्रबोधयोः शान्तिमलभमानं प्राणलीनं सुषुप्तिं प्रयोजयति यत्रैष पुरुष उपाधिरहितः स्वपितीति व्यपदिश्यत इति । तथा च श्रुतिः—"अत्रायं पुरुषः स्वपिति नाम स्वं हि अपीतो भवति स्वं स्वरूपमपि गतो भवति" इति । सावयवं क्षीरादि, दध्यादिभावेन परिणममानं दृष्टम्, निरवयवं मनः कथं विषया-कारेण परिणमत इति प्रश्नः "तन्मनोऽकुरुत" इति श्रुत्या सादिद्रव्यत्वेन सावयवमिति नावकाशमासादयति । नापीन्द्रियत्वे नातीन्द्रियत्वशङ्का, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इति श्रुत्या तद्व्यतिरेक-बोधनात् । अपि च निरवयवस्येव परमाणोर्व्यापारसम्भवाद् बाह्यविषय-सम्बन्ध उपपद्यते । तदुक्तं गीतायाम्—"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्" इति, श्रुतौ "अन्यत्रमना अभूवम्" इति चेति । वस्तु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्तु सावयवं सक्रियं दृष्टमिति, यथा दृष्टमदृष्टकल्पनमिति, घटादिवद्रूपादिमत्त्वात् षट्केन योगादेकव्यादितन्मात्रयोगाच्च परमाणवोऽपि सावयवा एवेति । परिमाणमपि ह्रस्वमणु दीर्घं महच्चेति समानाधिकरणयुगलं सावयववृत्ति दृष्टं न निरवयववृत्ति कल्पनीयम्भवति । अवयवावयविभावप्रसङ्गश्चाब्रह्म समवतिष्ठमानो नानवस्थां मेरुसर्षपसाम्यं वा प्रसञ्जयति । तदुक्तं व्यासेन—"रूपादिमत्त्वाच्च विपर्य्ययस्तथा दर्शनात्" इति । सामान्यविशेषभावोऽपि व्यावृत्त्यनुवृत्तिबुद्ध्या व्यवतिष्ठमानो द्रव्यादिसाधारणः । तद्यथा-मृत् सुवर्णं वा चूर्णपिण्डादिषु कटकमुकुटादिष्वनुवर्त्तमानं सामान्यम्, चूर्णकटकादि व्यावर्त्तमानं विशेषः । सत्ता द्रव्यादिष्वनुवर्त्तमाना सामान्यमेव । द्रव्यत्वादिकन्तु पृथिव्यादिष्वनुवर्त्तमानं सामान्यम्, गुणादिषु व्यावर्त्तमानं विशेषश्च । रूपं वर्णो वा नीलादिष्वनुवर्त्तमानं सामान्यम्, नीलपीतादिकं व्यावर्त्तमानं विशेषः । कर्म्मापि यागहोमादिष्वनुवर्त्तमानं सामान्यम्, यागहोमादि व्यावर्त्तमानं विशेषः । सादृश्यमपि साधर्म्यरूपं समानधर्म्म इत्याह्लादजनकत्वादिष्वनुवर्त्तमानं सामान्यम्, आह्लादजनकत्वादि व्यावर्त्तमानं विशेषः । सामान्यं जात्यपरनामधेयं कारणतावच्छेदकतया सिद्धं द्रव्यत्वादि, कार्य्यतावच्छेदकतया घटत्वादि, अनुगतप्रतीत्या गोत्वादि, भावरूपमतद्व्यावृत्तिरूपं वेति द्वैतम् । सादृश्यमपि पदार्थान्तरं गुणादिरूपं वेति द्वैतम् । वस्तुतस्तु द्रव्यमेव तथा तथाऽवस्थितं गुणादिव्यवहारप्रयोजकमिति द्रव्यमेवैकं तत्त्वमिति । कार्य्यञ्च कारणशक्तिरूपमतीतवर्त्तमानाव्यपदेश्यधर्म्मरूपं नानाविधमिति कारणं नानाशक्तिमत्कल्पयति । तदुक्तम्—

"वैश्वरूप्यात्प्रधानस्य परिणामोऽयमद्भुतः" इति ।

"अतीतवर्त्तमानाव्यपदेश्यधर्म्मा धर्म्मी"इति, "शक्तस्य शक्यकरणात्"इति च । शक्तिश्च शक्तिमतो नान्येति कार्य्यं स्वरूपेणानिर्वचनीयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणमेव परमार्थसदिति कार्य्यकारणप्रवाहो ब्रह्मावधिकः प्रवर्त्तमानो ब्रह्म परमार्थसदिति गमयति। तथा च श्रुतिः—"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति, "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" इति च। संज्ञासंज्ञिभावोऽपि वाच्यवाचकभावाऽपरपर्य्यायः "नामरूपे व्याकरवाणि"इति, "अर्थगत्यर्थं शब्दप्रयोगः" इति, "स्वसमवतज्ज्ञानस्य परत्र सम्पिपादिषया हि शब्दः प्रयुज्यते" इति यावत्पदतदर्थं शब्दार्थयोः प्रवर्त्तमानः सम्बन्धो नित्यः कृतकश्चेति द्वैतम्। तदुक्तं जैमिनिना—"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इति। "औत्पत्तिक इति नित्यं ब्रूमः" इति शावरभाष्यम्। कात्यायनेन "सिद्धे शब्दार्थसम्बन्धे" इति। "नित्यपर्य्यायश्च सिद्धशब्दः" इति महाभाष्यम्। कणादगौतमाभ्याम् "सामयिकः शब्दार्थसम्बन्धः" इति। गदाधरेण—"ईश्वरसंकेतः शक्तिः, आधुनिकसङ्केतः परिभाषा, शक्त्या बोधकं गवादिपदं वाचकम्, परिभाषया बोधकं नदीवृद्ध्यादिपदं पारिभाषिकमिति"। "शक्तिः कारणेषु कार्य्यानुकूला पदार्थान्तरम्" इति मीमांसकाः। "इच्छैव"इति नैयायिकाः। "जनकतैव" इति वैयाकरणाः। बोधजनकत्वादेव प्रश्नोत्तरव्यवहारः शास्त्राणि चेति सर्वमुपपद्यत इति। मनस्तु नित्यमिति कारणद्रव्यप्रकरणे कणादेनोक्तम्। आयुर्वेदे चतुर्विंशतिकपुरुषीये कार्य्यं मन इत्यभिधाय पुनः प्रकरणान्तरे शारीरे तासु तासु योनिषु समुत्पत्तिराम्नाता "आयुरात्मा ज्ञानं मन इन्द्रियाणि प्राणापानौ प्रेरणं धारणमाकृतिस्वरवर्णविशेषाः सुखदुःखे इच्छाद्वेषौ चेतना धृतिबुद्धी स्मृत्यहङ्कारप्रयत्नाश्चात्मजानि"इति, "आत्मजं मनः" इति च। श्रुतौ च—"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" इति। अशितमन्नं त्रेधा विभज्यते—यः स्थविष्ठो भागः तत्पुरीषम्, यो मध्यमो भागस्तन्मांसम्, योऽणिष्ठो भागस्तन्मन इति। अन्नमयं हि सौम्य मन इति चात्मजं भौक्तिकञ्चोक्तम्। सांख्ये—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सात्त्विकमेकादशकमित्याहङ्कारिकमुक्तम् । लिङ्गशरीरघटकतया च प्रत्युत्पन्नमशक्तमिति जन्यत्वमेवोक्तम् । अन्नमयञ्चेति स्थूलमनोऽभिप्रायेण । आत्मैव गर्भाशयमनुप्रविश्य शुक्रशोणिताभ्यां षाट्कौशिकं शरीरमारभमाणो मनसा मनः सृजति । तदिदं मनोऽन्नेन परिपुष्यमाणमन्नमयमित्युच्यते । तदुक्तं तुल्ययोनीये—"रूपाद्धि रूपप्रभवः प्रसिद्धः कर्म्मात्मकानां मनसो मनस्तः" इति । "भूतानि चत्वारि तु कर्म्मजानि यान्यात्मलीनानि विशन्ति गर्भम् । सवीजधर्म्माण्यपराणि देहाद्देहान्तराण्यात्मनि याति यान्ति" इति च भूतसहभावः प्रतिपादितः । व्यासेनाप्युक्तम्—"तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" इति । आयुर्वेदे च पाञ्चभौक्तिकत्वमुक्तम् शरीरस्य—"शरीरं हि गते तस्मिन् शून्यागारमचेतनम् । पञ्चभूतावशेषत्वात् पञ्चत्वं गतमुच्यते" इति । मनोनित्यत्ववचनन्तु चिरस्थित्यभिप्रायम् । इन्द्रिये सत्यपि मनसि श्रुतौ—'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इति पृथग्वचनं धर्म्मभेदाभिप्रायम् । बाह्यानां भौतिकत्वं नियतविषयकत्वं सगुणानामिन्द्रियभावश्च । अस्य तु भौतिकत्वमनियतविषयकत्वं निर्व्यापारमपि स्वेतरेन्द्रियप्रवर्त्तकमयस्कान्त इवाय इति । श्रुत्यवधारिते मनसि जन्यत्वे तद्विरुद्धं स्मार्त्तनित्यत्ववचनं बाधितम्भवति श्रुतिविरुद्धमिव तार्तीयलिङ्गादि । तदुक्तं पूर्वतन्त्रे—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्वल्यमर्थविप्रकर्षात्" इति; "विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्" इति च । अत्राद्यन्तयोः क्रमेण बाधकत्वबाध्यत्वे मध्यानामुभयमापेक्षिकमिति । तदुक्तम्—"बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा । मध्यमानान्तु बाध्यत्वं बाधकत्वमपेक्षया" इति । तदेवं मनोविज्ञानशास्त्रं बहुविचारविषयं विषयादिसद्भावाद्धर्म्मब्रह्मविचारशास्त्रमिव समारम्भमर्हति । तदिदं मनोविज्ञानं ब्रह्मविज्ञानमिव न क्रियापरतन्त्रमिति पुरुषार्थसाधने स्वातन्त्र्यमासादयति । तथा च श्रुतिः—"अपि चैवं विदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वपते जाग्रते सर्वाणि भूतान्येतानर्म्मांश्चिन्वन्ति" इति, "यत्किञ्चेमानि भूतानि मनसा सङ्कल्पयन्ति तेषामेव सा कृतिः" इति, "सङ्कल्पादेवास्य पितरः समुपतिष्ठन्ते" इति च। सङ्कल्पश्चास्यैवासाधारणो धर्म्म इति सिद्ध्यति स्वातन्त्र्यं पुरुषार्थसाधने अस्येति । अपि चेदं मनश्चिदादिविज्ञानं मानसमपि न धर्म्मविज्ञानमिवानुष्ठानापेक्षं पुरुषार्थसाधनमपि तु शाण्डिल्यादिविज्ञानमिव स्वानुबन्धादिहेतुकमन्यानपेक्षम् । तदुक्तमपरतन्त्रे—"स्वातन्त्र्यं मनश्चिदादीनामनुबन्धादिभ्यः प्रज्ञान्तरवत्" इति । तदिदं मन आत्मेति लौकायतिकैकदेशिनः । नित्यं निरवयवमण्विति तार्क्किकाः । नैतदस्ति, मनसैवानुद्रष्टव्यमितिकरणत्वश्रुतेः । सादिद्रव्यत्वेन घटादिवत् सावयवत्वसिद्ध्या निरवयवत्वेनात्मवन्नित्यत्वानुमानं स्वरूपासिद्धिग्रस्तम् । संयोगविभागाभ्यां सावयवत्वादेव घटादिवन्नाणुपरिमाणम् । युगपत्सर्वज्ञानप्रसंगान्न परममहत् । किन्तर्हि ? शरीरपरिमाणमवयवसंकोचविकाशाभ्यां हस्तिपुतिकादिशरीरपरिमाणत्वं न विरोधमावहति । विज्ञानमेव समनन्तरप्रत्ययजायमानं मन इति मतन्तु हेतुज्ञानमिव व्याप्तिज्ञानसापेक्षं साध्यज्ञानम् । पदज्ञानमिवशक्तिज्ञानसापेक्षमर्थज्ञानम्, ज्ञानं सापेक्षमेव ज्ञानजनकमिति व्याप्तिदर्शनात् पराहतम्, विशिष्टज्ञानन्तु इन्द्रियादिजन्यमेवेति न विशेषणज्ञाने व्यभिचारः । ज्ञानं न समनन्तरप्रत्ययजन्यम्। किन्तर्हि ? तत्समर्पिताकारमित्यपि मतं विज्ञानैकान्त्येऽभेदादकारस्य निरपेक्षत्वात् पराहतमेव। मनसो जन्यत्वं बल्लभाचार्येणापि प्रतिष्ठापितमन्तराधिकरणे । "अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादितिचेन्न विशेषात्" इति सूत्रं व्याचक्षताऽणुभाष्ये अन्तरेति प्राणाकाशमध्ये—"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" इति श्रुतेः । इन्द्रियजन्यतयैव विज्ञानस्य जन्यत्वं सिद्धम्भवति । मनसो मूर्त्तत्वेऽपि द्रव्यान्तराप्रतिघातोऽबाह्यत्वात् । प्रायेण तु चक्षुरादिवदप्रतिघातो न विरुद्ध्यत इति सर्वं समञ्जसमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि चेदं मनो वाचोऽपि भूयो मुष्टिरिवामलकादियुगलं वाग्नामयुगलमनुभवद्यथा सङ्कल्पमधीयदिच्छत्कुर्व्वद्वा ब्रह्मरूपतयोपास्यमानं यावत्स्वगतं स्वातन्त्र्यं प्रयच्छतीति छन्दोगश्रुतिरपि मनोमाहात्म्यं वर्णयति। तथा हि—"मनो वाचं वाचो भूयो यथा वै द्वे आमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवति एवं वाचं नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाऽधीते कर्म्माणि कुर्व्वीयेत्यथ कुरुते पुत्रान् पशूँश्चेच्छेयेत्यथेच्छति इमञ्च लोकममुञ्च लोकमिच्छेयमितीच्छति मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्वेति स यो मनो ब्रह्मेत्युपासतेयावन्मनसो गतं तत्रास्य कामचारो भवति"इति। वृहदारण्यकेऽपि—"अथ मनोऽत्यवहत् तद्यदा मृत्युमत्यमुच्यत स चन्द्रोऽभवत् सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भाति एवं हवा एनमेव देवता मृत्युमतिवहति य एवं वेद। सत्यकामो जावालो मनो वै ब्रह्म मातृमान् पितृमान् आचार्य्यवान् ब्रूयात्तथा तज्जावालोऽब्रवीत्। मनो वै ब्रह्मेत्यमनसो हि स्यादित्यब्रवीत्तु तस्यायतनं प्रतिष्ठानं मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवायतनमाकाशः प्रतिष्ठानन्द इत्येतदुपासीत। काऽऽनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसैव वै सम्राट् स्त्रियमभिहार्य्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् परमं ब्रह्म नैनं मनो जहाति"इति। तदिदं मनो बुद्ध्यादिगुणयोगात् स्वात्मानं सगुणं प्रत्यक्षयति। परममहत्परिमाणैकत्वसंख्येऽपि तद्गते गृह्णातीति शङ्करमिश्राः, तात्पर्य्यटीकायामाचार्य्यवाचस्पतयेः, न्यायमञ्जर्यामाचार्य्यचूडामणयश्च। परात्मानं चेष्टादिलिङ्गेनानुमापयति। क्वचिदनुमानमपि प्रत्यक्षपत्त्रकं प्रत्यक्षसङ्कीर्णं जनयति। सङ्करस्य जातिबाधकत्वं स्वगोष्ठीसिद्धमेव। ब्रह्मभिन्नस्यानित्यतया समवायाऽसिद्ध्या च नित्यत्वसमवेतत्वघटितजातित्वाऽसिद्धेः। अनुगतप्रतीतिरपि घटत्त्वादिधर्म्मसत्त्वे मानं न तु तस्य जातित्वेऽपि। सुखादिसाक्षा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्कारः पटादिसाक्षात्कार इव चक्षुरादि करणं मनः कल्पयति । तत्कारणतावच्छेदकतयैव मनस्त्वजातिसिद्धिरिति नैयायिकाः ।—

वर्ण्यते च मनोमाहात्म्यं क्वचित् ।

"मनोमात्रं यदा ब्रह्मा न पृथ्व्यादिमयात्मकः ।
मनोमात्रमिदं विश्वं यद्यज्जातं तदेव हि ॥
मनोनाम्नो मनुष्यस्य विचिन्त्याकारधारिणः ।
मनोराज्यं जगदिति सत्यरूपमिवस्थितम् ॥
मनसा तन्मते सर्वमसदेवेदमाततम् ।
यथा सङ्कल्पनगरं यथा गन्धर्वपत्तनम् ॥
मन एव विरिञ्चिस्तु तद्धि सङ्कल्पनात्मकम् ।
स्ववपुः स्फारतां नीत्वा मनसैव वितन्यते ॥
विरिञ्चो मनसो रूपं विरिञ्चस्य मनो वपुः ।
पृथ्व्यादि विद्यते नात्र तेन पृथ्व्यादिकल्पनम् ॥"

परमार्थतोऽसदपि व्यवहारहेतुतया कल्पितरूपं प्रत्यक्षे पुरः सतः परोक्षे स्मृत्यादिरूपेऽसतो वाऽर्थस्य तत्तदाकारप्रतिभानं निराकारचितोऽर्थाकारप्रतिभासरूपं मनः । तदुक्तम्—

"यदर्थप्रतिभानं तन्मन इत्यभिधीयते ।
अन्यन्न किञ्चिदप्यस्ति मनो नाम कदाचन ॥
सङ्कल्पनं मनो विद्धि सङ्कल्पात्तन्न भिद्यते ।
यथा द्रवत्वात् सलिलं तथा स्पन्दो यथाऽनिलात् ॥
यत्र सङ्कल्पनं तत्र तन्मनोऽङ्गं तथा स्थितम् ।
सङ्कल्पमनसी भिन्ने न कदाचन केचन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यमस्त्वथवाऽसत्यं पदार्थप्रतिभासनम् ।
तावन्मात्रं मनो विद्धि तद्ब्रह्मैव पितामह ॥

आतिवाहिकदेहात्मा मन इत्यभिधीयते ।
अविद्या संसृतिश्चित्तं मनो बन्धो मनस्तमः ॥

मनोमननिर्म्माणमात्रमेतज्जगत्त्रयम् ।
सर्वमुत्सृज्य शान्तात्मा स्वात्मन्येव निवत्स्यति ॥

मनो हि जगतां कर्तृ मनो हि पुरुषः स्मृतः ।
यन्मनोनिश्चयकृतं तद्द्रव्यौषधिदण्डनैः ॥

शापेन मन्त्रवीर्य्येण मनोबुद्धीन्द्रियाण्यपि ।
सर्वाण्येव विमूढानि दृष्टानि किल जन्तुषु ॥

यथैतौ पवनस्पन्दौ यथा स्नेहतिलौ यथा ।
अभिन्नौ तद्वदेवैतौ मनो देहः स एव तत् ॥

यथा यथाऽसौ यतते मनो देहो हि देहिनाम् ।
तथा तथाऽसौ भवति स्वनिश्चयफलैकभाक् ॥

पतत्वम्भसि वह्नौ वा कर्दमे वा शरीरकम् ।
मनो यदनुसन्धत्ते तदेवाप्नोति तत्क्षणात् ॥

पौरुषेण मनः कृत्वा नीरागं विगतज्वरम् ।
माण्डवेन जिता लिप्सा शूलप्रान्तेऽपि तिष्ठता ॥

अन्धकूपस्थितेनापि मानसैर्यज्ञसञ्चयैः ।
ऋषिणा तीव्रतपसा सम्प्राप्तं वै बुधं पदम् ॥

मनसैव मनस्तस्मात्पौरुषेण पुमानिह ।
स्वकमेव स्वकेनैव योजयेत्पावने पथि ॥" इति ॥

मन एव सङ्कल्पितसन्निवेशं तैजसः पुरुषः सम्पद्यमानो ब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामेति । तेन परमेष्ठी मनस्तत्त्वमित्युक्तम्भवति । स मनस्तत्त्वरूपो भगवान् ब्रह्मा सङ्कल्पमयत्वाद् यदेव सङ्कल्पयति तत्करोति । तदुक्तम्—

अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः ।
सङ्कल्पशक्तिरचितं यद्रूपं तन्मनो विदुः ॥
भावः सदसतोर्मध्ये नृणां चलति पश्यतः ।
कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः ॥
नाहं वेदावभासात्म्यं कुर्व्वाणोऽस्मीति निश्चयः ।
तस्मादेकान्तकलनस्तद्रूपं मनसो विदुः ॥
कल्पनात्मिकया कर्म्मशक्त्या विरहितं मनः ।
न सम्भवति लोकेऽस्मिन् गुणहीनो गुणी यथा ॥
मनो हि जडमन्यस्य भिन्नमन्यस्य जीवतः ।
तथाऽहङ्कृतिरन्यस्य बुद्धिरन्यस्य वादिनः ॥
मनसः कर्म्मवैचित्र्यादिह नानाविधाकृतेः ।
व्याख्यायन्तेऽभिधाभेदास्तत्त्वश्चास्य विशुद्ध्यते ।
मनो हि भावनामात्रं भावनास्पन्दधर्म्मिणि ।
क्रिया तद्भाविता रूपं फलं सर्वोऽनुधावति ॥
जड़ाजड़दृशोर्मध्ये दोलारूपं स्वकल्पनम् ।
यच्चित्तोऽम्लानरूपिण्यास्तदेतन्मन उच्यते ॥
यथा गच्छति शैलूषो रूपानन्त्यं तथैव हि ।
मनो नामान्यनेकानि धत्ते कर्म्मान्तरं व्रजत् ॥
भिन्नाधिकारवशतो विचित्रा विकृताभिधाः ।
यथा याति नरः कर्म्मवशाद्याति तथा मनः ॥
एता एवान्यथा प्रोक्ता वादिभिः कल्पनाशतैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वभावाभिमतां बुद्धिमारोप्य मनसा कृताः ॥
मता बुद्धीन्द्रियादीनां विभिन्ना नामरीतयः ।
अहङ्कारमनोबुद्धिदृष्टयः सृष्टिकल्पना ॥
नैयायिकैरितरथा तादृशैः परिकल्पिताः ।
अन्यथा कल्पिताः सांख्यैश्चाऽर्वाकैरपि चान्यथा ॥
जैमिनीयैश्चार्हतैश्च बौद्धै र्वैशेषिकैस्तथा ।
अन्यैरपि विचित्रैस्तैः पाञ्चरात्रादिभिस्तथा ॥
सर्वैरपि च गन्तव्यं तत्पदं पारमार्थिकम् ।
विचित्रं देशकालोत्थैः पुरमेकमिवाऽध्वगैः ॥
अज्ञानात्परमार्थस्य विपरीताऽवबोधतः ।
केवलं विवदन्त्येते विकल्पैरारुरुत्तवः ॥
स्वमार्गमभिशंसन्ति वादिनश्चित्रया दिशा ।
विचित्रदेशकालोत्थं मार्गं स्वं पान्थका इव" ॥ इति ॥

एकमेवान्तःकरणं संशयादिवृत्तिभेदभिन्नं मनआदिसंज्ञकं भवति । तदुक्तम्—"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्वः स्मरणं विषया इमे" इति । नैयायिकास्तु—'मनः करणं बुद्धिर्ज्ञानं अहङ्कार आत्मा' इति कल्पयन्ति । सांख्याः—'मन आन्तरिन्द्रियं बुद्धिरहङ्काररश्चान्तःकरणं त्रय एते कार्य्यकारणरूपाः' इति वदन्ति । 'मनो विभु द्रव्यमन्नमयञ्च बुद्धिर्जड़ा आत्मा चिदंशः' इति जैमिनीयाः । 'शरीरपरिमाणस्य जीवास्तिकायस्य विषयाभिलाषो मनः अर्थप्रथा बुद्धिः' इत्यार्हताः । 'त्तणिकालयविज्ञानधारा आत्मा, प्रवृत्तिविज्ञानमहङ्कारोऽर्थाकारपरिणामो बुद्धिरतीतसमनन्तरप्रत्ययो मनः' इति बौद्धाः । 'अहङ्कार आत्मा, मन आन्तरिन्द्रियम्, बुद्धिः स्मृतिप्रत्यत्तानुमानतर्कविपर्य्ययविकल्पभेदभिन्ना' इति वैशेषिकाः । 'वासुदेवः परमात्मा ततोऽहङ्कारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सङ्कर्षणाख्यो जीवस्ततः प्रद्युम्नाख्यं मनस्ततोऽनिरुद्धाख्या बुद्धिः' इति पाञ्चरात्राः । एवं योगिशैवप्रभृतयः स्वस्वकल्पनाप्रतिष्ठापितपदार्थाः सर्व एव पारमार्थिकफलाय कल्पन्ते स्वस्वबुद्ध्यनुसारेणेति स्वपक्षाऽभिरुचिः परपक्षनिन्दा चामीषां जीवधर्म्मो न पर्य्यनुयोगमर्हति । मन एव च सृष्ट्यादिकारणम् । तदुक्तम्—

एकरूपे हि मनसि संसारः प्रविलीयते ।
उपाविलं कारणं वै भ्रान्त्या जगदुपस्थितम् ॥
मनः कारणमर्थानां रूपाणामिव भासनम् ।
नानाकर्म्मवशावेशान् मनो नानाभिधानभाक् ॥
एकं विचित्रनामेति कालो नाना यथर्तुभिः ।
शीतता तुहिनस्येव कज्जलस्येव कृष्णता ॥
लोलता मनसो रूपं तीव्रातीव्रैकरूपिणी ।
मनो यदनुसन्धत्ते तत्सर्वेन्द्रियवृत्तये ॥
क्षणात्सम्पादयन्त्येता राजाज्ञामिव मन्त्रिणः ।
उदेति रौति हन्त्यत्ति प्रशंसति च निन्दति ॥
मन एव शरीरेऽस्मिन्नाशरीरं कदाचन ।
सर्वेषु सुखदुःखेषु सर्वासु कलनासु च ॥
मनः कर्तृ मनो भोक्तृ मानसं विद्धि मानवम् ।

श्रुतिरपि कठोपनिषद्वर्तिनी मनोमाहात्म्यं गायति ।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः ।
न तत्पदमवाप्नोति यस्माद्भूयो न जायते ॥

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।
सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम् ॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यज्ज्ञानान्मुच्यते जन्तुरमृतत्वञ्च गच्छति ॥

न संदृशे पश्यति रूपमस्य न चक्षुषा पश्यति कश्चिदेनम् ।
हृदा मनीषी मनसाऽभिक्लृप्तो ये तद्विदुरमृतास्ते भवन्ति ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥

शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति" ॥ इति

तैत्तिरीयके च—"मनो ब्रह्मेति व्यजानात्" "मनसा ह्येव च खल्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानि भूतानि जायन्ते, मनसा जातानि जीवन्ति मनः प्रत्यभिसंविशन्ति"। मनोमन्तृमन्तव्यमननानि परस्परमविनाभावनियतानि नैकेन विना भवन्ति। शून्यं जगदिति तु पद्यमिदमधस्तनं नातिक्रामति। तद्यथा—

"बन्ध्यापुत्रेण पिष्टोऽद्रिः शशशृंगः प्रगायति।
प्रसार्य्यभुजसम्पातं शिला नृत्यति ताण्डवम्॥
स्रवन्ति सिकतास्तैलं पठन्ति शैलपुत्रिकाः।
गर्जन्ति चित्रजलदा इतीवेदं वचः प्रभो॥" इति

अस्यैव च मनसोऽन्तःकरणस्य परिणामेषु प्रधानभूता परिणतिर्बुद्धिर्नाम, यामाश्रित्य सर्वोऽपि लौकिको वैदिकश्च व्यवहारः सम्पद्यते। इयमेव च कोशेषु—"बुद्धिर्मनीषा धिषणा: धीः प्रज्ञा शेमुखी मतिः। प्रेक्षोपलब्धिश्चित्संवित् प्रतिपज्ज्ञप्तिचेतनाः॥ धीर्धारणावती मेधा" इति पर्य्यायविशेषशब्दाभ्यां निर्द्दिश्यते। अस्या एव चावान्तरो भेदः प्रत्यक्षादिनानाभेदभिन्ना—अनुभूतिः स्मृतिश्च। इमामेव च सम्पादयितुं प्रमाणसंख्याभेदेन नानाविधदर्शनानि प्रवर्त्तन्ते। तद्यथा—'प्रत्यक्षमेवैकं प्रमाणम्' इति लौकायतिकाः। 'अनुमानेन सह द्वयम्' इति बौद्धाः वैशेषिकाश्च। 'शब्देन सह त्रयम्' इति सांख्याः। 'उपमानेन सह चतुष्टयम्' इति नैयायिकाः। 'अर्थापत्त्यनुपलब्धिभ्यां षट्' इति पूर्वोत्तरमीमांसकाः। 'ऐतिह्यसम्भवाभ्यामष्टौ' इति पौराणिकाः। 'चेष्टया नव' इत्यालङ्कारिकाः। तेष्वनुमानं प्रधानमिति नैयायिकाः शब्दः प्रधानमिति शाब्दिकाः आगमिकाश्च वदन्ति। शब्दप्रमाणका वयं यदस्माकं शब्द आह तत्प्रमाणमिति। शब्दतत्त्वमेव च परमार्थभूतं ब्रह्म व्यवहाराय अर्थभावेन विवर्त्तते। तदुक्तम्—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥" इति

तदेव च परापश्यन्तीमध्यमावैखरीरूपेण मूलचक्रनाभिहृदय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कण्ठेति तत्तत्स्थानव्यवस्थितं व्यङ्ग्यव्यञ्जकरूपेण व्यवहारमनुभवति । तदुक्तम्—

"परा वाग् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥" इति

प्रधानं मन्यमाना एव च शब्दं प्रकृतिप्रत्ययादिना शाब्दिका व्युत्पादयन्ति । "नामाख्यातोपसर्गनिपाताः" इति चतुष्टयी हि शब्दानां प्रवृत्तिर्जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चेति बहुविधमन्तान्तरभेदमुपवर्णयन्ति । अनुमानञ्च स्वार्थपरार्थभेदभिन्नम्, परार्थञ्च न्यायसाध्यम्, न्यायञ्च प्रतिज्ञादिपञ्चावयवात्मकम्, पक्षसपक्षविपक्षहेतुसाध्यव्याप्तिपक्षधर्म्मतापरामर्शादिनानोपकरणं हेत्वाभासविवेकपुरःसरं नानाविधं नैयायिकाःप्रधानं मन्यमाना उपवर्णयन्ति । ऐतिह्यं प्रधानं मन्यमाना नानाविधमितिहासमुपवर्णयन्ति—ऐतिहासिकाः । उपमानं प्रधानं मन्यमाना उपमां तदुपजीविनानाविधमलङ्कारमालङ्कारिका उपवर्णयन्ति । एवमन्येषां प्राधान्यमूह्यम् । चरके शारीरके—

"अव्यक्ताज्जायते बुद्धिर्बुद्ध्याऽहमिति मन्यते ।
परं खादिन्यहङ्कार उपादत्ते यथाक्रमम् ॥" इति

अहङ्कारोद्रेकेणोपचर्य्यमाण आत्माऽविद्यावान् स्वसंयुक्तमनःक्रियोपचरितक्रियो भवति । अविद्ययैव च व्यवसायार्थमुद्रिक्तोऽहङ्कारो मनसि बुद्धिरूपेण जायते । तया च बुद्ध्या धीर्धृतिः स्मृतिरिति सात्त्विकी राजसी तामसीति च भेदभिन्नया—आत्मा बुद्धिमान् गर्व्वं कुर्व्वन्नहङ्कारः सात्त्विक्या समयोगरूपया व्यवसायात्मिकया व्यवस्यन् यागदानतपस्यादिलोकोत्तरं कर्म्म समाचरति । राजस्या च कालार्थकर्म्मणा हीनमिथ्यायोगयुक्तः सुखदुःखादिहेतुभूतोहादिविचारवान् समयोगबुद्ध्या सर्वं सांसारिकं कर्म्म सम्पादयति । बुद्धिरेव समदर्शना जीवं मनःपुरस्सरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा प्रतिवेलं हिताहितं निवेदयति। मिथ्यादर्शनरूपा मात्सर्य्येर्ष्या-द्वेषालस्यप्रमादाय कल्पते। हीनलक्षणा कार्य्याकार्य्यहिताहितमृदुपरुष-वाच्यावाच्यादि न विवेचयति। विपरीतलक्षणा धृतिर्देवगुरुपूज्यसिद्धा-चार्य्यनिन्दाद्वेषाय भवति। धृतिमिथ्यायोगाद् वाङ्मिथ्यायोगः। स्मृतिः स्मर्त्तव्यविषया भ्रान्तिप्रतिपन्ना कार्य्यादि प्रवर्त्तयन्ती विपरीताचाराय भवति। त्रिविधाऽपि बुद्धिः हीनातिमिथ्याभेदेन त्रिविधयोगयुक्ता क्रमेण सम्यगतिशयमिथ्याप्रवृत्तिनिदानम्भवति। अपि चेयं विचार-पूर्विका इन्द्रियादिप्रवृत्तिपूर्विका च भवति। तद्यथा—प्रथममिन्द्रि-येणालोच्य मनसेदमेवं नैवमिति कल्पयति। ततोऽहङ्कारेणाहमेवात्रा-धिकृत इत्यभिमन्यते। ततो बुद्ध्या कर्त्तव्यमेतन्मयेति निश्चित्य प्रवर्त्तत इति सर्वजनीनम्। तदुक्तम्—

"ऊहो विचारश्च परं ततो बुद्धिः प्रवर्त्तते।" इति

"सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥" इति

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पजम्।
बालमूकादिविज्ञानसदृशं मुग्धवस्तुजम्॥
ततः परं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया।
बुद्ध्याऽवसीयते सापि प्रत्यक्षत्वेन सम्मता॥" इति

एतेन निर्व्विकल्पकमेव ज्ञानं प्रत्यक्षम्, सन्निकर्षानन्तरं जायमान-त्वात्। जात्यादिविशिष्टज्ञानन्तु न तथेति। तदुक्तम्—"कल्पनापोढ-मभ्रान्तं ज्ञानं प्रत्यक्षम्" इति। कल्पना जात्यादि तदपोढं तदविषयकं निर्व्विकल्पकं जात्यादिवैशिष्ट्यानवगाहीति यावदित्यपि नास्तिकानां प्रवादः परास्तः। जात्यादिविशिष्टज्ञानस्यापीन्द्रियार्थसन्निकर्षसमकालं जायमानत्वेनेन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रान्तत्वात्। धीधृतिस्मृतिरूपत्रिविधबुद्धिभ्रंशरूपः प्रज्ञापराधः सर्वरोगनिदानमित्यायुर्वेदडिण्डिमः। स चात्मेन्द्रियार्थयोगकालार्थकर्म्मयोगप्रभवः। तदुक्तम्—

"विषयाभिनिवेशो यो नित्याऽनित्ये हिताऽहिते।
ज्ञेयः स बुद्धिविभ्रंशः समं बुद्धिर्हि पश्यति॥
विषयप्रवणं चित्तं धृतिभ्रंशान्न शक्यते।
नियन्तुमहितादर्थाद्धृतिर्हि नियमात्मिका॥
तत्त्वज्ञाने धृतिर्यस्य रजोमोहावृतात्मनः।
भ्रश्यते स स्मृतिभ्रंशः स्मर्त्तव्यं हि स्मृतौ स्थितम्॥

तत्सर्वम्—

बुद्ध्या विषयविज्ञानं विषयेष्वप्रवर्त्तनम्।
प्रज्ञापराधं जानीयान्मनसो गोचरं हि तत्॥" इति

वीजाङ्कुरन्यायेन प्रवर्त्तमानाभ्यां भ्रंशत्रयाशुभाचरणाभ्यां सन्निकृष्टविप्रकृष्टप्राधानिकव्यभिचारिकभेदभिन्नश्चतुर्विधो रोगो भवति। सा चेयं बुद्धिरात्मलिङ्गेषु परिगण्यते। "प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेषः" इति परिभाषितपरिशेषानुमानेन गुणतयाऽऽश्रयमात्मानं द्रव्यमनुमापयति। तदुक्तमायुर्वेदे—

"इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः"॥ इति

न्याये च—"इच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि" इति। अत्र ज्ञानकार्य्याणामात्मलिङ्गत्वाऽभिधाने ज्ञानस्यापि तत्त्वमुक्तम्भवति। तदुक्तम्—"जानाति इच्छति यतते प्रवर्तते" इति। ज्ञानादयश्च यथोत्तरं कार्य्यरूपाः। तदुक्तं न्याये—"ज्ञस्येच्छाद्वेषनिमित्तत्वात् प्रवृत्तिनिवृत्त्योः"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति । प्रवृत्तिनिवृत्ती च शुभाशुभरूपे वाग्बुद्धिशरीरारम्भानारम्भौ । तत एव च कर्म्म कायिकं वाचिकं मानसञ्चेति व्यपदिश्यत इति । अपरञ्च कर्म्मप्रपञ्चमाचक्षते योगविदः-"कर्म्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्" इति । त्रिविधं शुक्लं कृष्णं शुक्लकृष्णमिति शुक्लादिपदानि पुण्यपापतन्मिश्रवचनानि । पुण्यं सुखसाधनं स्वर्गाय, पापं दुःखसाधनं नरकाय । तदुक्तमीश्वरकृष्णेन—

"धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्म्मेण" । इति

मिश्रमेतल्लोकाय, लोकेऽस्मिन् सुखदुःखमिश्रोपलब्धेः । बुद्धीच्छादयः सेन्द्रियमनोजन्या । जागरिते केवलमनःप्रयोज्या, स्वप्ने सुषुप्तौ च तदभाव एव । तथा च श्रुतिः—"अचेतयन्नेव हि सुषुप्त इत्युच्यते" इति । तदेवमवस्थात्रयाभिमानी जीवः क्रमेण विश्व स्तैजसः प्राज्ञ इत्युच्यते । बुद्ध्यादयश्चात्मगुणत्वादात्मस्था अपीन्द्रियमनोऽन्वयव्यतिरेकाभ्यामवस्थाद्वये इन्द्रियस्था मनःस्था इति चोच्यन्ते । सा च बुद्धिरात्मतदन्यविषयभेदेन विद्याऽविद्या चेति गीयते । इष्टे तत्सहजा इच्छादयो भवन्ति । बुद्धिश्च क्वचिद्भगिनीति सम्बुद्ध्यते । तद्यथा—

"हे बुद्धे भगिनि भ्रातुरर्थितां पूरयाशु मे ।
आवयोर्दुःखमोक्षाय विचाराय मुनेर्गिरः" ॥ इति

विचारणा च—**शास्त्रसज्जनसम्पर्काद् वैराग्याभ्यासपूर्विका ।**
सदाचारप्रवृत्त्यै या प्रोच्यते सा विचारणा" इति

लक्षिता । बुद्धिविचारौ चोभावप्यनादीत्यादिश्रुतदर्शितदिशाऽनाद्यनन्तालिङ्गनित्यसर्वगतधर्म्माणाविति ह्रासवृद्धितारतम्येन वर्त्तमानाल्पज्ञत्वसर्वज्ञत्वाय कल्पते । ब्रह्मात्म्यैक्यविषया च विद्यारूपाऽविद्याविनाशेन मोक्षाय कल्पते । न च भेदग्राहिप्रत्यक्षविरोधः, पटघटादिप्रत्यक्षस्य पटत्वादिवैशिष्ट्यपर्य्यवसितत्वेन भेदानवगाहितयाऽविरोधात् । न च घटादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपमात्रम्भेदः, भेदघटादिशब्दानां पर्य्यायतापत्तेः । व्यभिचारस्मृत्यनुपपत्त्यप्रत्यक्षत्वसर्व्वविषयत्वयत्किञ्चिद्विषयकत्वविकल्पग्रासादिभिश्चेतना च शरीरेन्द्रियमनोविज्ञानानाश्रिता गुणतया द्रव्याश्रिता भवन्ती—आत्मलिङ्गमित्युक्तम् । बुद्धिरुपलब्धिश्चेतनेति समानशब्दाः समानाधिकरणा इति न बुद्धिर्जानाति आत्मा चेतयते इति वैयधिकरण्यप्रसङ्गः । अहङ्कार एव जीवबुद्ध्यादिनानासंज्ञां लभते । तदुक्तम्—

"अहङ्कारस्य तस्यास्य नामानीमानि राघव ।
जीवो बुद्धिर्मनश्चित्तं मायाप्रकृतिरिष्यते ॥" इति

ज्ञानञ्च यदिन्द्रियजन्यं तदिन्द्रियेण व्यपदिश्यते चाक्षुषं रासनमिति । तदुक्तन्तत्रैव—

"या यदिन्द्रियमाश्रित्य जन्तोः बुद्धिः प्रवर्त्तते ।
याति सा तेन निर्देशं मनसा च मनोद्भवा ॥" इति

ज्ञानं शब्दश्च स्वोत्तरवर्त्तिगुणनाश्यमन्त्यमुपान्त्येन । तदुक्तम्—"विभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वम्" इति । बुद्धिरियमिन्द्रियमनोव्यापारविचारानन्तरं जायमाना सर्वव्यवहाराय कल्पते । तदुक्तमायुर्वेदे—

"इन्द्रियाभिग्रहः कर्म मनसस्त्वस्य निग्रहः ।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते ॥
इन्द्रियाणीन्द्रियार्थस्तु समनस्केन गृह्यते ।
कल्पते मनसाऽप्यूर्द्ध्वं गुणतो दोषतो यथा ॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यते तया वक्तुं कर्त्तुं वा बुद्धिपूर्वकम् ॥" इति

बुद्धिरियमुत्पद्यमाना समुत्पन्नघटशब्दयोः स्थायित्वक्षणिकत्वदर्शनात्ताभ्यां सन्दिह्यमाना शरादिगतकर्मसन्तानग्रहणात्—शब्दबुद्धिकर्म्मणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरम्य व्यापाराभावात् प्रतिव्यक्तिविश्रान्तेः सन्तानेन प्रवर्त्तमाना क्षणिकेति निश्चीयते। "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यनर्थान्तरम्" इति नैयायिकाः। बुद्धिः प्रकृतेः प्रथमः परिणामो महत्तत्त्वम्, तद्वृत्तिर्ज्ञानम्, चित्संक्रान्तिरुपलब्धिरिति सांख्याः। समानेऽर्थे ज्ञानयोः प्रतिसन्धानलक्षणं प्रत्यभिज्ञानन्त्वात्मधर्म्म इति न बुद्धिनित्यतामापादयति। अपि चेयं बुद्धिः प्रत्यक्तत्त्वैक्यविषया विद्यारूपा "शालिवृद्धौ कोद्रवत्यागः" इतिन्यायेन इष्टविपत्त्यादिपञ्चगुणां नानार्थविषयामविद्यारूपां भेदबुद्धिमपवदति। तदुक्तम्—

"इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता।
संशयः प्रतिपत्तिश्च बुद्धेः सत्त्वगुणान् विदुः॥
अर्थादुत्थास्नवो धर्म्मा अनुमात्रादयो यथा।
तद्धीत्थमपि तद्वत्स्यादित्यर्थोऽनर्थमाविशेत्"॥ इति

शास्त्रसारांशविषया बुद्धिः केषाञ्चिदेव जायते। तदुक्तम्—

"शास्त्रसज्जनसत्कार्य्यसङ्गेनोपहतेनसाम्।
सारावलोकिनी बुद्धिर्जायते दीपिकोपमा"॥ इति

अपि चेयं शोकादिनाश्या निम्बादिमाषादिभिर्वृद्धिह्रासवती च। तदुक्तं कालिकापुराणे १८ अध्याये—

"शोकः क्रोधश्च लोभश्च कामो दम्भः पराशुता।
ईर्ष्या मानो विचिकित्सा हिंसाऽसूया जुगुप्सिता॥
द्वादशैते बुद्धिनाशहेतवो मानसा मलाः।
बुद्धिक्षयकरा एते माषकासारमृत्तिकाः॥
निम्बाटरुषट्टन्ताका बुद्धिवृद्धिकराश्च ते"। इति

साङ्ख्यमते बुद्धिवृत्तितया ज्ञानस्य तद्धर्मत्वे पुरुषः किं कर्मेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्तव्यम्? चेतयत इति चेन्न, चैतन्यं ज्ञानादनर्थान्तरम्, तेन पुरुषश्चेतयते बुद्धिर्जनातीतिकर्तृभेदः कश्चिद्यतते कश्चिदुपलभते कश्चिज्जानाति कश्चित्प्रत्येतीतिवन्न युक्तिमर्हति। एतत्तन्त्रप्रधानभूतं मनः करणतया यस्य शेषभूतं स पुरुषः सम्प्रति प्रसङ्गाद् विचारमर्हति किं स्वरूप इति। श्रुतिश्च प्रमाणेषु प्रधानमिति प्रथमं तयैव विचार्य्यते। आत्मैक्यमाश्रित्य विचाराय श्रुतिरियं प्रवर्त्तते।

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतः स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥
उतामृतत्वस्येशानो यदन्येनातिरोहति" ॥ इति

अत्र सहस्रशब्दोऽनन्तपर्य्यायः, भूमिमिति सर्वलोकमुपलक्षयति प्रत्यक्षतया लोकैक्यमभिप्रेत्य वा। दशाङ्गुलमिति संख्यासामान्येन दिग्दशकमुपलक्ष्यते व्यञ्जकतया हृदयदेशमभिप्रेत्य वा। अभिव्याप्येति शेषः। कुत एतदित्याह—पुरुष एवेदमिति सर्वं खल्विदं ब्रह्मेति समानश्रुतेः। तदनेन भोग्यविषयजातेन भोगसाधनत्वं दर्शितम्। मोक्षसाधनत्वमाह—उतामृतत्वस्येति। अमृतत्वस्य मोक्षस्य तदीशित्वेन तत्साधनत्वं दर्शितम्। यद् मोक्षसाधनत्वम् अन्ये अन्यस्मिन् 'सर्वे विधयश्छन्दसि विकल्पन्त' इति सर्वनामकार्य्याभावः। न रोहति न प्रादुर्भवतीति अमृतत्वं नान्यसाध्यं नान्यलभ्यमिति भावः। अन्नेनेति वा पाठः। यद् यस्माद् अन्नेन हेतुना फळे तृतीया कारणावस्थामपहाय कार्य्यावस्थया परिणमते। परिणामित्वेऽनित्यत्वप्रसङ्गमाशङ्क्याह-अमृतत्वस्येति। तदीशितृत्वे कथं मृतत्वमिति। अथवा यद् जीवजातम् अन्नेनातिरोहति प्रादुर्भवति तस्य चेशान इति पूर्वेण सम्बन्धः। ब्रह्मादिस्तम्बपर्य्यन्तभूतजातस्यान्नेनैव स्थितेः। "इतः प्रदानाद्धि देवा उपजीवन्ति" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतेः । अथवा सहस्रशीर्षेति छन्दसि शिरसः शीर्षन्नादेशः । अक्षपाद-शब्दौ ज्ञानेन्द्रियकर्म्मेन्द्रियलक्षकौ, समष्टिरूपस्य विराडात्मनोऽनन्त-शीर्षत्वादिसर्वभूतानां तदन्तःपातित्वात् । अत्यतिष्ठद्दशाङ्गुलमिति नाभितो दशांगुलिमतिक्रम्य हृदि स्थितः कर्म्मफलभोगाय जीवमभि-प्रेत्य नियन्तृत्वेन परमात्मानम् । "योऽयं विज्ञानमयः प्राणेषु हृद्यन्त-र्ज्योतिः" इति, "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते—तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकसीति" इति च श्रुतेः । स चाऽयं पुरुषः शय्यासनादिसंहतं परार्थं दृष्टमिति संहतेन त्रिगुणेन प्रकृत्यादिना परार्थेन भवता कल्प्यते मानसप्रत्यक्षविषयोऽपि सन् । तदु-क्तम्—"प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति । पुरुष इति पुरि शरीरे शेते पृषोदरादित्वात् । "इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः" इति श्रुतेः । तदेवं त्रिगुणपारार्थ्यादिहेतुभिः कल्पितः कश्चिदन्ध इति कश्चिद्बधिर इति कश्चिज्जात इति कश्चिन्मृत इति च जननमरणकरणप्रतिनिय-मादिहेतुभिर्नाना सिद्ध्यति । त्रिगुणादिविपर्य्ययाच्चेतनोऽत एव साक्षी द्रष्टाऽकर्तापि सन् कर्तृगुणादिसम्बन्धात् कर्तापि भवति । तत एव च चेतनोऽहं करोमीति सामानाधिकरण्यमुपपद्यते । "जानाति इच्छति यतते प्रवर्त्तते" इतीच्छाद्युपहारमुखेन सत्यपि ज्ञानप्रवृत्त्योः कार्य्य-कारणभावे सत्यपि च पुरुषो दर्शनशक्तिः प्रकृतिः प्रवृत्तिशक्तिरिति दर्शन-प्रवृत्त्योर्वैयधिकरण्ये कैवल्यदर्शनप्रयोजनाऽपेक्षया पङ्ग्वन्धप्रवृत्तिन्यायेन सृष्टिप्रवृत्तिरुपपद्यते । तदुक्तमीश्वरकृष्णेन—

"संघातपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥
जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥
तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥" इति

जननमरणे नित्यस्यात्मनः शरीरसंयोगवियोगरूपे । पुरुषबहुत्वादेव कश्चिज्जातः कश्चिन्मृत इति व्यवस्था सिद्ध्यति । चेतनत्वादेव द्रष्टृत्व-साक्षित्वे । चेतनो हि द्रष्टा भवति साक्षी च यस्मै-अर्थिप्रत्यर्थिनौ विवाद-विषयं दर्शयत इति नित्यशुद्धमुक्तस्यात्मनः प्रकृतिसंयोगवियोगकृतौ बन्धमोक्षौ । नित्यत्वव्यापकत्वाभ्यां संयुक्तयोरपि प्रकृतिपुरुषयोरपेक्षान-पेक्षाकृतौ संयोगवियोगौ । नित्यत्वञ्चात्मनो वीतरागजन्मादर्शनादिनाऽ-नादिभावत्वेन प्रधानस्य मूलकारणत्वेनानवस्थाभिया । तदुक्तं कपिलेन— "न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" इति, "मूले मूला-भावादमूलं मूलम्" इति च,—पतञ्जलिना—"द्रष्टृदृश्ययोः संयोगो हेय-हेतुः" इति, "तस्य हेतुरविद्या" इति, "विवेकख्यातिरविप्लवा हानोपायः" इति च । ईश्वरकृष्णेन—

"तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति ।
बध्यते मुच्यते संसरति च नानाश्रया प्रकृतिः ॥
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥" इति

अविद्याकारणत्वेऽविद्यैव मूलं ब्रह्मकारणत्वे च ब्रह्मैवेति नाममात्रे विवादः । अचेतनस्य च प्रधानस्य चेतनानधिष्ठितस्यापि पुरुषार्थहेतुका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षीरादिवत्स्वयं प्रवृत्तिर्न चेतनाधिष्ठानहेतुका धर्म्मादिनिमित्तिका वा येनेश्वरकारणवादः साङ्ख्यमते प्रसज्येत इति। तदुक्तम्—

"वत्सविवृद्धिनिमित्तं प्रवृत्तिरज्ञस्य यथा क्षीरस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥
पुरुषार्थ एव हेतुर्न केनचित्कार्य्यते करणम्"॥ इति

निमित्तमप्रयोजकं प्रधानस्य, वरणभेदस्तु ततः क्षेत्रियकवदिति। यथाहि क्षेत्रियकः केदारात्केदारान्तरं पिप्लावयिषुः वरणं प्रतिबन्धकमात्रं भिनत्ति अपनयति। न जलं हस्तेन बलान्नयति। स्वयमेव जलं प्रवृत्तिशीलं गच्छति। तथेहापि धर्मः सुखमयसृष्टावधर्म्मश्च दुःखमयसृष्टौ प्रतिबन्धकं धर्म्ममधर्म्मं वा विचारयति। प्रधानन्तु प्रवृत्तिशीलं स्वयमेव प्रवर्त्तत इति। दृश्यमानस्य जगतः कार्य्यस्य निमित्तकारणचिन्तायां धर्म्मविशेषविवादेऽपि धर्म्ममात्रेऽविवादः। तथोपादानकारणचिन्तायां तद्विशेषे परमाण्वादौ विवादेऽपि तत्सामान्येऽविवादः। पारम्पर्य्येऽपि क्वचित्परिनिष्ठानं सिद्ध्यति। नहि व्यवस्थायां सत्यामनवस्थायां प्रमाणमस्तीति। तदुक्तं कपिलेन— "पारम्पर्य्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम्" इति, "सामान्येन विवादाभावाद्धर्म्मवन्न साधनम्" इति च। सर्वं वा विनश्यत् पुरुषान्तं विनश्यति। पुरुषस्य विनाशित्वे जगदान्ध्यप्रसङ्गादिति। तदुक्तम्—

"पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः"। इति

यत्तु—

"यतः प्रधानपुरुषौ यतश्चैतच्चराचरम्" इति पुरुषस्योत्पत्तिश्रवणं तदुक्तयुक्तेरेव गौणमिति द्रष्टव्यमिति सर्वं समञ्जसमिति॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्सर्वमोदहितहेतुतया प्रयत्ना-
दारब्धमार्य्यमतितः प्रविचिन्त्य शास्त्रम् ॥
तस्यार्द्धमाशु जनितं कृपयेश्वरस्य
तेनापि तुष्यतु जनः परतो यतेय ॥

—o—

अस्त्येव शास्त्रनिचयं स्वपदार्थबुद्ध्यै
किन्तेन सारमतिकृत्पुनरेतदेव ॥
तत्तद्रसाय मरिचादिकमस्तु किन्तु
स्वादः प्रपाणकरसे रसनानुबन्धी ॥

—o—

❀ इति वैद्यरत्नश्रीब्रजविहारिचतुर्वेदिविरचिते मनोविज्ञानशास्त्रे ❀

[पूर्वार्द्धम्]

—o—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* श्रीगणेशाय नमः *

अथ मनोविज्ञानस्योत्तरार्द्धः ।

अथेदानीं प्रकृततन्त्रस्योत्तरार्द्धः प्रस्तूयते । तत्र आत्मप्रकरणम्, प्रकृतिप्रकरणम्, मनःप्रकरणम्, इन्द्रियप्रकरणम्, महाभूतप्रकरणम्, मोक्षप्रकरणम्, परिशिष्टप्रकरणमिति सप्तप्रकरणानि । आत्मनि भेदोऽभेदो वेति द्वैतम् । भेदवादिनो जीवेश्वरभेदो जीवानाञ्च जननमरणादिना भेद इति वर्णयन्ति । तद्यथा—नैयायिकादय आत्मनोऽणुरूपत्वे पादे मे सुखं शिरसि मे वेदनेति युगपत्सर्वाङ्गीणानुभवानुपपत्त्या मध्यमपरिमाणत्वे घटादिवद्विनाशित्वभिया-ऽऽप्नोति व्याप्नोतीति योगमर्य्यादयाऽऽत्मानं व्यापकं मन्यमाना लोकदृष्टा-न्तबलेन सेव्यसेवकभावं नियोज्यनियोजकभावं प्रवर्त्यप्रवर्त्तकभावं शक्याशक्यकार्य्यकर्त्तृभावं वा समालोच्य जीवेश्वरभेदं सुखिदुःख्यादिना जीवानाञ्च भेदं कल्पयन्तो मृते व्यभिचारत उपघाते स्मृत्यभावप्रसङ्गेन ज्ञानादनध्यक्षतापत्त्या—इदमहमद्राक्षमिति प्रत्यभिज्ञानानुपपत्त्या चात्मनः शरीरेन्द्रियमनोविज्ञानतः पार्थक्यमुपवर्णयन्ति । तदुक्तम्—

> "शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
> तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥
> मनोऽपि न तथा ज्ञानादनध्यक्षं तदा भवेत् ॥" इति

अहं सुखी दुःखी जानामीति प्रत्यात्ममनुभवबलेन सगुणमात्मानं कल्पयन्ति । व्यापकत्वेऽपि लोष्टाद्यवच्छेदेन ज्ञानाद्यननुभवेन शरीरावच्छेदेन तदनुभवेन च शरीरं कल्पयन्तः स्थूलसूक्ष्मशरीरभेदेन संसारिणो जीवान् कल्पयन्ति । ईश्वरञ्च सुखाद्यभावेन शरीरप्रयोजनाभावादसंसारिणं ग्रामे सहवसतां प्रभूणां प्रायशो वैमत्यदर्शनेन नानात्वे वैमत्यापत्त्या सृष्टिव्यवस्थानापत्त्या प्रमाणाभावेन चैकं निर्धारयन्ति । सांख्याश्च-अचेतनक्षीरजलादिस्वयंप्रवृत्तिदर्शनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रधानस्यापि स्वयंप्रवृत्तिसम्भवेन वरणभेदाभेदाभ्यां जलादेरिव व्यवस्थित-प्रवृत्त्या चेश्वरमकल्पयन्तोऽपि जननमरणादिप्रतिनियमेन जीवान् नाना कल्पयन्ति। पातञ्जलाश्च-सातिशयाणुविभुपरिमाणस्य परमाण्वाकाशादौ निरतिशय-भावदर्शनेन 'यद्यत्सातिशयं तत्कचिन्निरतिशयम्' इति व्याप्तिबलेन ज्ञानञ्च अयमिदं जानाति अयमितोऽधिकमयञ्चातोऽप्यधिकमिति सातिशयं क्वचिन्निरतिशयमिति सर्वज्ञमीश्वरं कल्पयन्ति। तदुक्तम्-"ईश्वरप्रणिधानाद्वा" इति, "तत्र निरतिशयं सार्वज्ञबीजम्" इति च। एवं सर्वेऽपि द्वैतिनः उपास्योपासकभावेन मोक्षमिच्छन्तो जीवेश्वरभेदं कल्पयन्ति। अद्वैतिनस्तु—एकस्याप्यात्मनोऽन्तः-करणाद्युपाधिभावाभावाभ्यामाकाशस्येव घटाद्युपाधिभावाभावाभ्यां घटाद्याकाश-महाकाशादिव्यवस्थावज्जीवेश्वरादिव्यवस्थासम्भवान्न वास्तविकभेदकल्पनं ज्यायः। गुणगुणिभावकल्पनमपि सत्यं ज्ञानमानन्दं ब्रह्मेतिश्रुतिसिद्धज्ञानरूपेऽप्यात्मनि वृत्तिसाक्षितादशायां कुसुममणिदृष्टान्तेन साक्ष्यारूढवृत्तिमाश्रित्य जानामीत्यादि-प्रतीत्युपपत्त्या गौरवाधायकतया च न वास्तविकमिति। सूर्य्यस्येव चैतन्यस्यापि क्वचिदवच्छेदप्रतिबिम्बाभासमात्रेण जीवेऽवच्छेदाभासप्रतिबिम्बवाद इति च वर्णयन्ति। अहमनुभवस्य तु व्यापकस्याप्यात्मनोऽहमिहैवाऽस्मि सदने जानान इति प्रादेशिकत्वमापादयतः पूतिकुष्माण्डीकृततया भगवती श्रुतिरेवात्मस्वरूपाव-धारणे प्रमाणमित्यात्मन औपनिषदत्वं वर्णयन्ति। दिने सूर्य्यज्योतिषा रात्रौ किञ्चित्कालं चन्द्रज्योतिषा-अग्निज्योतिषा वाग्ज्योतिषा-एवं पूर्वशान्तौ परेण प्रवर्त्तमानस्य सर्वशान्तौ स्वयमूहेन प्रवृत्त्याऽत्रायं पुरुषः स्वयं ज्योतिरिति-श्रुत्या च स्वयं प्रकाशत्वमुपपादयन्ति। इममेव—ईश्वररूपमात्मानमाश्रित्य 'शिवः' इति शैवाः, 'ब्रह्म' इति वेदान्तिनः, 'जगत्कर्त्ता' इति नैयायिकाः, 'बुद्धः' इति बौद्धाः, 'अर्हन्' इति जैनाः, 'कर्म्म' इति मीमांसकाः, 'विश्वकर्मा' इति कारवः, 'कपिलः' इति कापिलाः कथयन्ति। 'क्लेशाद्यपरामृष्टशुद्धसत्त्वो-पाधिकः' इति पातञ्जला वर्णयन्ति। जीवरूपमाश्रित्याऽहंप्रत्ययगोच-रोऽहं स्थूल इति प्रतीत्या शरीरमिति लौकायतिकाः। अहं काणोऽन्ध इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीत्या—इन्द्रियमिति—इन्द्रियचैतन्यवादिनः। शरीरादिभिन्नो व्यापक इति नैयायिकाः। क्षणिकविज्ञानमिति योगाचाराः। शून्यमिति माध्यमिकाः। अणुपरिमाण इति वाल्लभाः। शरीरपरिमाण इत्यार्हताः। इत्येवं सर्ववादिसिद्ध आत्मा भेदस्याभेदमूलकत्वादद्वितीयः स्वकल्पितमायया जगन्मूलकारणभूतः सर्वपदार्थसारतामाश्रयति। स चायमात्मा सर्ववादिसिद्धः प्रकृतिसंयोगेन सृष्ट्यै कल्पते। तदुक्तम्—"द्रष्टृदृश्ययोः संयोगो हेयहेतुः" इति, "पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" इति च। अयञ्च संयोगः पृथगेव नित्यसंयोगतोऽपेक्षाकृतोऽपेक्षा चोक्ता—'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य' इति। यत्तु—द्रष्टृत्वदृश्यत्वयोग्यतैव संयोग इति तन्न, योग्यताया नित्यतया सृष्टिनित्यत्वप्रसङ्गादनित्यविलक्षणयोग्यतास्वीकारे किमपराद्धं विलक्षणसंयोगेनेति। आत्मधर्माश्च द्रष्टृत्वादयः सान्निध्याख्यसंयोगेन चक्षुरादिकरणप्रेरकत्वादयस्कान्तस्येवायसो राज्ञ इव योद्धप्रेरकत्वाद्योद्धृत्वम्। एतेन कर्तृत्वं क्रिया कथमक्रिये आत्मनीति परास्तम्, सान्निध्यमात्रेण राज्ञ इवायस्कान्तस्येवेत्युक्तेः। कर्तृत्वं कारकचक्रप्रयोक्तृत्वम्, क्रियास्वातन्त्र्यं वा। करणत्वं क्रियाहेतुव्यापारवत्त्वं तत्साधकतमत्वं वा। अयमात्मा वस्तुतोऽकर्त्ता कर्तृप्रकृतिसन्निधिमात्रेण कर्त्ताऽपि भवति। बुद्धिरचेतनाऽपि चित्सान्निध्याच्चेतना भवति। तदुक्तमत्रात्मनि—

"कर्त्तृत्वमकर्त्तृत्वञ्च संस्थितत्वञ्च संस्थितम्।
निरीहत्वादकर्त्ताऽसौ कर्त्ता सन्निधिमात्रतः॥" इति
"तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीनः॥" इति च

करणं मनआदि तत्कर्म्मार्जितं तदर्थमभिचेष्टते लोकवत्। कर्म्मणस्तदीयत्वं पूर्वतत्कर्म्मप्रयुक्तमेव। एवं तस्य तस्येति अनादित्वाद्बीजाङ्कुरवन्नानवस्थादोषमावहति। यद्यपि पुरुषः कूटस्थ इति न तस्य कर्म्म, तथापि तद्भोगसाधनतया तदीयमित्युच्यते योद्धजय इव राज्ञः। तदुक्तम्—"तत्कर्म्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्जितत्वात्तदर्थमभिचेष्टा लोकवत्" इति। सर्वश्च प्रकृत्यादिव्यापारो विवेकख्यातिपर्य्यन्त एव। तदुक्तम्-"विवेकख्यातिपर्य्यन्तञ्च चित्तचेष्टितम्" इति, "अविवेकाच्च प्रवर्त्तनमविशेषाणाम्" इति च। विवेकरहितानां विवेकख्यातिपर्य्यन्तं प्रवर्त्तनमिति तदर्थः। संसरणञ्च लिङ्गशरीरायत्तम्। लिङ्गशरीरञ्च—इन्द्रियदशकम्, तन्मात्रपञ्चकम्, मतभेदेन प्राणादिपञ्चकम्, मनोबुद्ध्यहङ्कार इत्यष्टादशकम्। तदुक्तम्—"सप्तदशैकं लिङ्गम्" इति।

"प्रत्युत्पन्नमशक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥" इति
"अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते॥
सृजते च गुणान्त्सर्वान् क्षेत्रज्ञस्त्वनुपश्यति।
गुणान् विकुरुते सर्वानुदासीनवदीश्वरः॥" इति च

अङ्गुष्ठेति सूक्ष्मत्वमुपलक्ष्यते। एतेन सर्वस्रष्टृत्वमात्मन उपपादितम्भवति। तदुक्तं व्यासेनापि—"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति। प्रत्युत्पन्नमादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम्, असक्तम् अप्रतिहतं शिलामप्यनुप्रविशति, निरुपभोगम् अभोगं पूर्वमभोगं सत् पश्चाद्भोगसम्पादि पुरुषार्थं प्रवृत्तेः। तदुक्तम्,—"पुरुषार्थ एव हेतुर्न केनचित् कार्य्यते करणम्" इति। भावैर्धर्म्मादिभिरधिवासितं सुरभिचम्पकयुक्तपटवत् धर्म्मादियुक्तबुद्धियुक्तत्वात्। संसरति लिङ्गमेव शरीरं धर्म्मादिसहायं संसरति। तदुक्तम्—

"धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्म्मेण।
ज्ञानेन चापवर्गो विपर्य्ययादिष्यते बन्धः॥" इति

इदमेव च लिङ्गशरीरं पुरि स्थूलशरीरे शयनात्पुरुष इत्युच्यमानं स्थूलशरीरान्निष्कर्षाय कल्पते। तदुक्तम्—

"ततः सत्यवतः कायात्पाशबद्धं वशं गतम्।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तान्मात्रिकशरीरसंयुक्तं संसरति नटवन्नानारूपभाग् भवति । तदुक्तम्—

“चित्रं यथाश्रयमृते स्थाणवादिभ्यो विना यथाच्छाया ।
तद्वद्विनाविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥” इति

“पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥” इति च

निमित्तं धर्म्मादि, नैमित्तिकं शरीरादि । नटो यथा तत्तद्भूमिकामादाय रामो वा वत्सराजो वा भवति, तद्वल्लिङ्गशरीरमपि नानाशरीरम्प्राप्य देवमनुष्यादिभावाय कल्पत इति ।

स चायमात्मा परिणामिसंहतशरीरादिव्यतिरिक्तोऽसंहतत्वात् अपरिणामित्वाच्च । तदुक्तम्—“देहादिव्यतिरिक्तोऽसौ वैचित्र्यात्” इति । सङ्घातपरार्थत्वादिति च । सदा ज्ञाता हि तद्वृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति सर्वमपि वस्तु वृत्तिरूपतयैव पुरुषस्य विषयो भवति वृत्तिविषयकत्वात्पुरुषस्य, सत्यपि सान्निध्याविशेषे रूपादिरिव चक्षुरादीनाम् । ज्ञानरूपत्वञ्चास्य लाघवतर्कसहकृतसत्यं ज्ञानमनन्तं ब्रह्मेतिश्रुतिमूलकम् । लाघवञ्च स्वमते अन्तःकरणं वृत्तिस्तत्साक्षीरूप आत्मेति त्रयम् । परमते अन्तःकरणं, व्यवसायरूपा वृत्तिः, अनुव्यवसायः, आत्मेति चतुष्टयमिति । शरीरञ्चास्य त्रयम्—षाटकौशिकं मातापितृजं स्थूलशरीरमुपभोगसाधनम्, परलोकयात्रानिर्वाहकं लिङ्गशरीरम्, जन्ममरणान्तरालवर्त्ति यातनासाधनं सूक्ष्मशरीरम्, तदुक्तम्—“चित्रं यथाश्रयमृते” इत्यादि ।

अवस्था च त्रयी । इन्द्रियप्रणालिकयाऽन्तःकरणवृत्त्यवस्था जाग्रत् । निरिन्द्रियान्तःकरणवृत्त्यवस्था स्वप्नः । प्रलीनेन्द्रियान्तःकरणतमोवृत्त्यवस्था सुषुप्तिः । तदुक्तम्—“अभावप्रत्ययालम्बनावृत्तिर्निद्रा” इति । पूर्ववृत्त्यभावस्य प्रत्ययः कारणं तमोऽविद्याऽज्ञानं तद्विषया तद्वृत्तिर्निद्रेति । वृत्तिपदं निद्राया वृत्तित्वोपपादनाय । अत एव च “सुखमहमस्वाप्सं न किञ्चिदवेदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षम्" इति प्रबोधे परामर्शः । अयञ्चात्मा अविद्यानिमित्तं दुःखमनुभवति । तदुक्तं–"हेयं दुःखमनागतम्" इति, "तस्य हेतुरविद्या" इति च । स चायं संसारः प्रधानात्मनोः स्वस्वामिभावलक्षणः कर्म्मनिमित्तोऽविवेकनिमित्तो वा भवतु सर्वथा तदुच्छित्तिः पुरुषार्थः । तदुक्तम्–"यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः" इति, "त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तः पुरुषार्थः" इति च । सुखदुःखसाधारणभोगनिवृत्तिः पुरुषार्थ इति तु दुःखनिवृत्तेरेव शब्दान्तरेणाभिधानम् । सुखस्यापि दुःखसंसृष्टस्य दुःखपक्षेनिक्षेपात्, विषसम्पृक्तान्नस्येव विषपक्षे । तदुक्तं–"परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" इति । अत एव साधनाश्रयसम्पर्कस्वरूपैः सर्वस्य दुःखरूपत्वात् 'एकविंशतिदुःखोच्छेदो मोक्षः" इति नैयायिकाः । सुखदुःखभोगश्चात्मनस्तत्तदाकारपरिणतान्तःकरणप्रतिबिम्ब एव स्वतो निर्दुःखस्य । तदुक्तं वाशिष्ठे–

"यच्च चेतश्चिदाकाशे स्वयं कचक्चायते ।
तदेतज्जगदित्येवं तेनैवात्माऽनुभूयते ॥
विराडात्मैवमाकाशं भाति चिन्मयमाततम् ।
स्वभावस्वप्ननगरं नगनागमयात्मकम् ॥
अनुभवितैवानुभवं सत्यं स्वात्मानमप्यसन्तमिव ।
अनुभवतीयत्वेन स्वप्ननरः स्वप्नदेशमिव ॥
वेदान्तार्हतसांख्यसौगतगुरुस्त्र्यक्षादिसूक्तादृशो
ब्रह्मैव स्फुरितं तथात्मकलया तादात्म्यमेवं यतः ।
तेषाञ्चात्मविदोऽनुरूपमखिलं स्वर्गं फलन्तद्भवेत्
अस्य ब्रह्मण ईदृगेव महिमा सर्वञ्च यत्तद्वपुः ॥" इति

सर्वञ्चैतदस्यैवात्मनो ब्रह्माद्वैतभावरूपं मोक्षं प्रतिपादयति । स चायं मोक्षः सर्ववादिनां सर्वतन्त्रसिद्धान्तसिद्धः तदुक्तं वेदान्तेति । वेदान्ताः शुद्धब्रह्मपराः सर्वज्ञेश्वपरा उपासनपराश्च । आर्हताः जैनाः, साङ्ख्याः कापिलाः पात-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ञ्जलाश्च, सौगताः सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकाः, गुरवः मीमांसकाः, त्र्यक्षः पशुपतिः आगमशास्त्रनिर्म्माता, आदिपदाद् वैष्णवादिशास्त्रनिर्म्मातारस्तैः सूक्तादृशो ज्ञानानि ब्रह्मरूपमेव । ब्रह्मण एव सर्वतादात्म्येन स्फुरणात् । सर्वं खल्विदं ब्रह्मेति श्रुतेरिति वस्तुस्थितिः । परन्तु तेषां स्वस्वज्ञानानुरूपं स्वर्गादिफलम्भवतु किन्तु ब्रह्मभावरूपफलान्नातिरिच्यते । तदेष ब्रह्मण एव महिमा यत्सर्वं तद्वपुरिति । स चायमात्मा पुरि स्थूलशरीरे शयनाद्वा स्वभावनाभावितदेहे पुरोगमनाद्वा 'पुरः अग्रगमने' धातोः पुकन् प्रत्यये योगतः पुरुष इत्युच्यमानश्चतुर्विंशतितत्त्वमये शरीरे साङ्ख्यमते, सुश्रुतमते पञ्चभूतादिमये वसति । अयञ्च क्वचित्सर्वगतो नित्यः प्रतिपादितः । क्वचिदसर्वगतोऽपि सदकारणवन्नित्यमिति नित्यः प्रतिपादितः । कर्म्मपुरुषः कर्म्मण्यधिकृतोऽधर्म्मनिमित्तस्तिर्य्यग्योनिषु जायते, धर्म्माधर्म्मनिमित्तो मनुष्येषु, धर्म्मनिमित्तो देवेषु । तदुक्तं भोजराजेन—

"शुभाशुभाभ्यां कर्मभ्यां प्रेरणान्मनसो गतेः ।
देहाद्देहान्तरं याति कृमिवच्छाश्वतोऽव्ययः ।।" इति

अयञ्चात्मा सुखदुःखादिलिङ्गेनानुमीयते अहमिति प्रत्यक्षेण च गृह्यते । सुखादिविषयोपलब्धिपर्य्यन्तगुणकश्चायुर्वेदे प्रतिपादितः । संसारदशायां देहेन्द्रियादिसङ्घातः पुरुषशब्देनोच्यते । तेन च जरायुजाण्डजस्वेदजोद्भिज्जेति चतुर्विधप्राणिनां ग्रहणम् । स चायं प्रधानभूत उपकार्य्यः, सर्वमन्यदप्रधानमुपकारकम् । तस्य च विविधं दुःखमादधद्व्याधिरुच्यते । दुःखं कायवाङ्मानसी पीड़ा । सरुजो नैरुज्यं नाम परिणामभेद एव । परिणामो नामावस्थान्तरतापत्तिः, क्षीरस्येव दधिभावः । तदुक्तम्—

"अवस्थान्तरतापत्तिरेकस्य परिणामिता ।
स्यात् क्षीरं दधि मृत्कुम्भः सुवर्णं कुण्डलं यथा ।।" इति

अथेदानीं प्रकृतिस्वरूपमुच्यते । प्रकरोतीति प्रकृतिः सर्वजगत्समवायिकारणम् । प्रेति प्रकर्षे, प्रकर्षश्च सर्वजगत्कर्तृत्वमेव । स्वयञ्च सत्त्वरज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तमःस्वरूपा । इयमेव च सत्त्वप्रधाना मायेत्युच्यते, तमःप्रधानाऽविद्येति । अविद्या नामाज्ञानं भावभूतमिति केचित् । अतस्मिन् तद्बुद्धिरित्यन्ये । एतदेव भ्रम इत्युच्यते । तदुक्तम्—"अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति । अविद्या मूलकमेवास्मितादिचतुष्टयम्भवति । तदुक्तम्—'पञ्चपर्वाऽविद्या' इति । अविद्यादिपञ्चकमेव योगे क्लेश इत्युच्यते । तदुक्तं पतञ्जलिना—"अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इति । क्लेशश्च कर्म्माशयस्य पुण्यादेः तुषस्थानीयः । एतन्मूलक एव कर्म्माशयो जात्यादित्रिविधविपाकाय कल्पते । तदुक्तम्—"क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः" इति, "सति मूले तद्विपाको जात्यायुर्भोगाः" इति च । इयमेव च प्रकृतिरव्यक्तमित्युच्यते कारणरूपेण महदादिकार्य्यरूपेण व्यक्तम्भवदपि । इदञ्चाव्यक्तं सर्वजगत्कारणम्, नत्वस्य कारणान्तरमस्ति । तदुक्तम्-"मूलप्रकृतिरविकृतिः" इति । 'मूले मूलाभावादमूलं मूलम्' इति सर्वजगतो मूलस्यास्य मूलान्तरकल्पनेऽनवस्थापातात् । नहि व्यवस्थायां सत्यामनवस्थायां प्रमाणमस्तीति । सत्त्वरजस्तमःस्वरूपत्वञ्चास्य सुखदुःखमोहात्मकतया । सुखदुःखमोहात्मकता चास्य—"एकैव स्त्री स्वामिनं सुखाकरोति । तत्कस्य हेतोः? तम्प्रति सुखरूपसत्त्वाविर्भावात् । सैव सपत्नीर्दुःखाकरोति । तत्कस्य हेतोः ? ताः प्रति दुःखरूपरजस आविर्भावात् । सैव स्वामविन्दमानं पुरुषान्तरं मोहयति । तत्कस्य हेतोः ? तम्प्रति मोहरूपतमस आविर्भावात् । अनयैव स्त्रिया सर्वे भावा व्याख्याता इत्युक्तदिशा ।" तत एवाऽव्यक्तात्सुखदुःखमोहलक्षणात्तल्लक्षणं महदुत्पद्यते । तत एव तादृगहङ्कारः । स चाहङ्कारस्त्रिगुणत्वादेव सत्त्वप्रधानो वैकारिक इत्युच्यते, रजःप्रधानस्तैजसः, तमःप्रधानो भूतादिरिति । वैकारिकादेकादशेन्द्रियाणि । भूतादेस्तन्मात्राणि । तानि च शब्दस्पर्शरूपरसगन्धतंन्मात्राणीति व्यपदिश्यन्ते । तैजसाच्चोभयम्, सत्त्वतमःप्रवर्त्तकरजःप्रधानत्वात्तैजसस्य । तदुक्तम्—

"सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥" इति

तन्मात्रेभ्यश्च पञ्चमहाभूतानि, तेभ्यश्चतुर्विधभौतिकशरीरं लोष्टपाषाणादि च। महत्तत्त्वरूपा बुद्धिरध्यवसायलक्षणा, अहङ्कारोऽभिमानलक्षणः, सङ्कल्पलक्षणं मनः । शुद्धसत्त्वस्यैव परिणामरूपा बुद्धिः विद्यारूपाऽविद्यां तिरस्कृत्यात्मनो मोक्षाय कल्पते । यदुक्तम्—

"शुद्धसत्त्वस्य या शुद्धा सत्या बुद्धिः प्रवर्त्तते ।
यया भिनत्त्यतिबलं महामोहमयं तमः ॥
सर्वभावस्वभावज्ञो यया भवति निस्पृहः ।
यया नोपैत्यहङ्कारं नोपास्ते कारणं यया ॥" इति

इन्द्रियाणां मध्ये पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि । आद्यानां शब्दादयो विषयाः, परेषां वचनादीनि। पञ्चविंशतितत्त्वेषु कश्चित्प्रकृतिरेव, कश्चिद्विकृतिरेव, कश्चित्प्रकृतिविकृतिः, कश्चिदनुभयरूपः । तदुक्तम्—

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥" इति

पुरुषभिन्नः सर्व एवाचेतनः। पुरुषश्च पञ्चविंशतितमश्चेतनः, तस्य च मोक्षाय प्रधानस्य प्रवृत्तिः । अचेतनस्यापि प्रवृत्तिः क्षीरस्येव वत्सविवृद्ध्यर्थम्, रेतस इव चैकान्तसङ्गतकमनीयकामिनीसन्तोषार्थम् । विवेकज्ञानाय व्यक्ताव्यक्तपुरुषाणां साधर्म्य-वैधर्म्ये प्रस्तूयेते। अनादित्वानन्तत्वनित्यत्वानि प्रकृतिपुरुषोभयमधिकृत्य, कारणावस्थाकार्यावस्थयोः क्रमशो बीजधर्म्मित्वप्रसवधर्म्मित्वे प्रकृतिम्, माध्यस्थ्यामाध्यस्थ्ये क्रमशः पुरुषप्रकृती, त्रिगुणत्वादि व्यक्ताऽव्यक्ते, हेतुमत्त्वादि व्यक्तम्, तद्वैपरीत्यं प्रकृतिपुरुषौ, द्रष्टृत्वसाक्षित्वादि पुरुषमिति । तदुक्तम्—

"साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्श्रेयसाधिगमः ।" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्म्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥
हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥
तस्माच्च विपर्य्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥" इति च

अयमात्मा स्वयं चिद्रूपोऽपि कूटस्थोऽपि सुखादिपरिणामिसत्त्वादिरूपप्रकृतिसम्बन्धात् सुखादिमानिव भवति सकम्पजलसम्बन्धाच्चन्द्र इव सकम्पः । सम्बन्धश्च प्रतिबिम्बनमेव सन्ध्याकालीनारुणकिरणसम्पर्कादाकाश इव मेघ इव चाऽरुणः । मूलकारणञ्च जगतां सुखादिमयसंसारदर्शनात्सुखादिस्वरूपसत्त्वादिरूपप्रकृतिकृतं जगदिति मन्वानाः प्रकृतिमित्याचक्षते । मायिकवस्तुवत्क्षणिकविनाशदर्शनान्मायिकं मन्वाना मायामिति । शुक्त्याद्यविद्याकृतरजतादिवत्क्षणप्रतिभासदर्शनादूब्रह्माऽविद्याकृतमिति मन्वाना अविद्यामिति । अल्पपरिमाणारब्धमहत्परिमाणवस्तुदर्शनादल्पपरिमाणतारतम्यकाष्ठाप्राप्तपरमाणुमिति । स्वाभाविककण्टकचित्रमृगादितैक्ष्ण्यचित्रतादर्शनात् स्वाभाविकमेव नानासन्निवेशविशेषं जगदिति मन्यमानाः स्वभावमिति । तदुक्तम्—

"कः कण्टकानां प्रकरोति तैक्ष्ण्यं
चित्रं विचित्रं मृगपक्षिणश्च ।
माधुर्य्यमिक्षौ कटुता मरीचे
स्वभावतः सर्वमिदं प्रवृत्तम् ॥" इति

ईश्वरमेव सर्वकारणमिति मन्वाना ईश्वरमिति । तदुक्तम्—

"अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाकालं सर्ववस्तुजननदर्शनात् कालकृतं जगदिति मन्वानाः काल-मिति । तदुक्तम्—

"प्रभवविरतिमध्यज्ञानवन्धा नितान्तम्
विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययाना-
मनुमितमभिवन्दे प्रग्रहं कालमीशम् ॥" इति

यदृच्छयैव लतागुल्माद्युद्भवदर्शनात् यादृच्छिकमिति मन्वाना यदृच्छामिति । कर्मकारणिनः कर्मेति । सर्वञ्चैतद्दृष्टान्तविधया प्रतिपादितमायुर्वेदे—

"अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
सन्निवेशशरीराणां दन्तानां पतनोद्भवौ ॥
तलेष्वसम्भवो यश्च रोम्णामेतत्स्वभावतः ।
धातुषु क्षीयमाणेषु वर्धेते द्वाविमौ सदा ॥
स्वभावं प्रकृतिं कृत्वा रसकेशाविति स्थितिः ।
निद्राहेतु तमः सत्त्वं बोधने हेतुरुच्यते ॥
स्वभाव एव वा हेतुर्गरीयानपि कीर्त्यते ।
स्वभावाल्लघवो मुद्गास्तथा कावकपिञ्जलाः ॥
स्वभावाद्गुरवो माषा वराहमहिषादयः ।
ईश्वरो वह्निरूपो हि जीवने हेतुरुच्यते ॥
जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।" इति

यदृच्छानामाकस्मिकपदार्थोत्पत्तिः । कुष्ठादिः पापकर्मणां विपाकः । विपाको नाम परिणामः । यदुक्तम्—

"जाठराग्नेस्तु संयोगाद्यदुदेति रसान्तरम् ।
रसानां परिणामो यः सुखपाकः प्रकीर्त्तितः ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नच स्वाभावादिकारणभेदेन जगतः कार्य्यस्य भेदः, प्रकृतिपर्य्याय-त्वादेतेषां मतभेदेन प्रकृतेरेव संज्ञास्वभावादिः । तदुक्तम्—

"स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा ।
परिणामश्च मन्यन्ते प्रकृतिं पृथुदर्शिनः ॥" इति

मनस्तु समुद्भवत्सर्वसंसारशुक्रसम्बद्धषड्धातुजशरीरसम्बन्धात् शरीरीति पुरुष इत्युच्यते । मन एव सर्वजगत्कारणम् । तदेतद्विस्तरेण प्रतिपादितं वशिष्ठादौ । तदुक्तम्—

"स्रवन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम् ।
शरीरयोगाज्जीवोऽपि शरीरीत्युच्यते बुधैः ॥
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया ।" इति

मनश्च ब्रह्मकार्य्यं ब्रह्मैव । ब्रह्म च जगत्कारणं प्रसिद्धं वेदे । ब्रह्मपदश्च बृंहतेर्व्यापकार्थकान्मनिना व्युत्पन्नं सर्वकारणं व्यापकमाह । ब्रह्म च जगज्जन्मादिकारणत्वादितटस्थलक्षणकम्, सच्चिदानन्दादिस्वरूपलक्षणकम् । स्वरूपतटस्थ-लक्षणे—लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिरूपे । सत्स्वरूपत्वादिकन्तु न भावरूपो धर्म्मो येनाद्वैतभङ्गः । किन्तु मिथ्यात्वाभावरूपं सत्स्वरूपत्वम्, जडत्वाभावरूपं चित्स्वरूपत्वम्, दुःखाभावरूपमानन्दस्वरूपत्वम्, अभावश्चाधिकरणात्मक इति । सर्वं खल्विदं जगदविद्याकल्पित-नामरूपात्मकं संसारदशायाम् । परमार्थतो विद्यया ब्रह्मभावे नामरूपहानाद् ब्रह्मैव, नद्य इव समुद्रभावः नामहानात् । तथा च श्रुतिः-"यथा नद्यः स्पन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इति । ब्रह्म च—अशेषविशेषप्रत्यनीकं चिन्मात्रं सर्वात्मकञ्चेति ब्रह्मविदो वर्णयन्ति । तदुक्तम्—

"पत्रे पुष्पे फले स्तम्भे तरुरेव यथा ततः ।
सर्वं सर्वत्र सर्वात्मपरमेव तथा ततम् ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमार्थाम्बराम्भोधावापः सर्गपरम्परा ।
परमार्थमहाकाशे शून्यता सर्गसम्विदः ॥
परमार्थश्च सर्गश्च पर्य्यायौ तरुष्टत्तवत् ।
बोधादेतदबोधात्तु द्वैतं दुःखाय केवलम् ॥
परमार्थो जगच्चेदमेकमेवेति निश्चयः ।
अध्यात्मशास्त्रबोधेन भवेत्सैषा हि मुक्तता ॥

सङ्कल्पस्य वपुर्ब्रह्म सङ्कल्पकचिदाकृतेः ।
तदेव जगतो रूपं तस्माद्ब्रह्मात्मकं जगत् ॥
यतो वाचो निवर्त्तन्ते अतिवर्त्तन्त एव वा ।
विधयः प्रतिषेधाश्च भावाभावदृशस्तथा ॥
अमौनमौनं जीवानां यत्पाषाणवदासनम् ।
यत्सदेवासदाभासं तद्ब्रह्माभिधमुच्यते ॥
यस्मिन् यतः सदा सर्वं यत् सर्वं सर्वतश्च यत् ।
सर्वं सर्वतया सर्वं तत्सर्वं सर्वदा स्थितम् ॥
शिवं शान्तमजं मौनममौनमजरं ततम् ।
सशून्याशून्यमभवदनादिनिधनं ध्रुवम् ॥
यस्या यस्या अवस्थायाः क्रियते सम्विदो भरः ।
सा सा सहस्रशाखात्वमेति सेकैर्यथा लता ॥
परो ब्रह्माण्डमेवाणुश्चिद्व्योमोऽन्तःस्थितो यतः ।
परमाणुरेव ब्रह्माण्डमन्तःस्थितजगद्यतः ॥

तस्माच्चिदाकाशमनादिदृश्यमखण्डितं सौम्यमिदं समस्तम् ।
निर्वाणमस्तं गजजातिबन्धो यथास्थितं तिष्ठ निरामयात्मा ॥

स्वयं दृश्यं स्वयं द्रष्टृ स्वयं चित्तं स्वयं जडम् ।
स्वयं किञ्चिन्न किञ्चिच्च ब्रह्मात्मन्येव संस्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा यत्र जगत्येतत्स्वयं ब्रह्म स्वमात्मनि ।
स्वरूपमजहच्छान्तं यत्र सम्पद्यते तथा ॥
ब्रह्म दृश्यमिति द्वैतं न कदाचिद्यथास्थितम् ।
एकत्वमेतयोर्विद्धि शून्यत्वाकाशयोरिव ॥

दृश्यमेव परं ब्रह्म परब्रह्मैव दृश्यता ।
एतन्न शान्तं नाशान्तं नानाकारं न चाकृतिः ॥
चित्तावेदनवेत्तारं स्थावरं क्रियते वपुः ।
चित्तावेदनवेत्तारं जङ्गमं क्रियते वपुः ॥

यथा पुंसो नखाः पादावेकमेव शरीरकम् ।
तथैकमेवाप्रतिघं चित्तं स्थावरजङ्गमम् ॥
आदिसर्गे स्वप्न इव यत्प्रथामागतं स्थितम् ।
चितोरूपं जगदिति तथैवानन्त उच्यते ॥

अयमादिरयञ्चान्तः सर्गस्येव हि भासते ।
चितः सुघननिद्रायाः सुषुप्तस्वप्नकोष्ठतः ॥
प्रलयस्थितिसर्गादि दृश्यमानं न विद्यते ।
एतन्न चात्मनश्चान्यच्चित्रे चित्रे वधूर्यथा ॥

एष एव परिज्ञातः सुषुप्तिर्भवति स्वयम् ।
यदा तदा मोक्ष इति प्रोच्यते मोक्षकाङ्क्षिभिः ॥
विद्धि चित्तं नरं दैवमसुरं स्थावरं स्त्रियम् ।
नागं नगं पिशाचादि खगकीटादिराक्षसम् ॥

प्रमाणं तस्य चानन्तं विद्धि तद्यन्न रेणुताम् ।
आब्रह्मस्तम्बपर्य्यन्तं जगद्याति सहस्रशः ॥
ब्रह्म वेत्ति यदात्मानं स ब्रह्माऽयं प्रजापतिः ।
स च नो ब्रह्मणो भिन्नो द्रवत्वमिव वारिणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाय्वङ्गजस्पन्दनवत्—जलाङ्गद्रवभासवत् ।
यथा ब्रह्मणि ब्रह्मत्वं तथाऽजस्याङ्गजं जगत् ॥
ब्रह्मैवाऽहं विराडात्मा विराडात्मवपुर्जगत् ।
भेदो न ब्रह्मजगतोः शून्यत्वाम्बरयोरिव ॥
यथा प्रयान्ति पयसो विचित्राः कणपङ्क्तयः ।
विचित्रदेशकालान्ता निपतन्त्युत्पतन्ति च ॥
नियत्यैवैकया कल्प्यं मनोबुद्ध्यादिवर्ज्जिताः ।
आत्मन्येवात्मनो भान्ति तथा या ब्रह्मसम्विदः ॥" इति

यथा विभक्ताः कणसहस्रकोटयः एकया धारया प्रवाहात्मना एकरूपेण भान्ति, एवं ब्रह्मसंविदो जगद्भेदा ब्रह्मरूपेणेति, "सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन" इति श्रुतेः । एतेन सर्वं ब्रह्मात्मकमिति वेदान्तसिद्धान्तः समायाति—अद्वैतमिति । स चायं वेदान्ती—अद्वैतत्यागद्वैतोपादानाभ्यामपसिद्धान्तदोषमासादयेत् । अपसिद्धान्तो नाम स्वपक्षत्यागः परपक्षोपादानञ्चेति । प्रकृते प्रमाणप्रमेयादिभेदस्वीकारे—अपसिद्धान्त आपद्यत इति नैयायिकादिभिः कृतेऽभियोगे स्वसिद्धान्तपरित्याग इति तल्लक्षणे स्वेत्यसाधारणविशेषणोपादानात्तत्तत्सिद्धान्तसम्बन्धी स्वेति वक्तव्यम् । यस्य यः सिद्धान्तस्तस्य तत्परित्यागोऽपसिद्धान्त इति समायाति । तदेवं स्वसिद्धान्तपरित्याग इत्यस्य तत्सिद्धान्तसम्बन्धिनः सिद्धान्तपरित्याग इति पर्य्यवसानमायाति । तत्र सिद्धान्तपदयोरेकार्थत्वे पुनरुक्तता, भिन्नार्थत्वे—तत्सिद्धान्तसम्बन्धिनः परसिद्धान्तपरित्यागे दोषाभाव इति नैव भवान् दोषमापादयितुं प्रभवतीति—अपसिद्धान्तापादनरूपस्वसिद्धान्तपरित्यागाद्भवानेवापसिद्धान्तभागीति महत्ते पाण्डित्यमिति वेदान्तिनामेव विजयः । तदेवमेषां ब्रह्मजिज्ञासासूत्रे—ब्रह्मेति वक्ष्यमाणलक्षणमिति न जातिकार्य्यब्रह्मवेदार्थकता ब्रह्मपदस्याश्रयितव्येति । कर्म्मतया कर्तृतया वा जिज्ञासायामन्वयाभावात्, जातेः प्रसिद्धत्वात्, त्रैवर्णिकाधिकाराच्च । नापि कार्य्यब्रह्मणः; परविद्यार्थं प्रवृत्तेः, ज्ञानेन सह जात-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाच्च। नापि वेदराशेः, पूर्वतन्त्रेणैव सार्थकत्वप्रमाणत्वसिद्धेः। नापि जीवात्मनः, अहंप्रत्यक्षसिद्धत्वात्। वस्तुतस्तु स्वयमेव जिज्ञास्यब्रह्मलक्षणान्न जात्यादिशङ्कासम्भवः। ब्रह्मण इति कर्म्मणि षष्ठी; "तद्विजिज्ञासस्व" इति श्रुत्या ब्रह्मणो जिज्ञासाकर्म्मत्वसमर्प्पणात्, यावता विना तज्जिज्ञासा न सम्भवति तत्सर्वं जिज्ञास्यमिति प्रमाणाद्यवरोधसम्भवात्, राजाऽसौ गच्छतीत्युक्तेस्तत्सेवकगमनप्रतीतेः। शेषषष्ठ्यान्तु तत्सम्बन्धिप्रमाणादेरेव मुख्यतो जिज्ञास्यत्वप्रतीतेर्ब्रह्मणो जिज्ञास्यत्वं गौणं स्यात्। सोऽयं शिरोवेष्टनेन नासिकास्पर्शन्यायमनुसरति, प्रथमश्च जघन्यो जघन्यश्च प्रथम इति चापतति। ज्ञानमवगतिपर्य्यवसायि फलरूपमिच्छाविषयस्तदनुबन्धेन ब्रह्मापि तद्विषयः। ब्रह्मणः प्रसिद्धाप्रसिद्धविकल्पे जिज्ञासाविषयत्वानुपपत्तिस्तु—जगत्कारणतया परोक्षज्ञानविषयत्वेऽपि-अपरोक्षजिज्ञास्यत्वोपपत्त्या समाधेया। 'ज्ञानं प्रमाणफलं सम्वेदनम्' इति सुगतप्राभाकरवैशेषिकनैयायिकाः। 'सम्विज्जनकप्रमातृव्यापारः' इति वार्त्तिककाराः। 'आत्मचैतन्यम्' इति क्षपणकलौकायतिकाः। 'करणभावव्युत्पत्त्या वृत्तिरुपलब्धिश्च' इति साङ्ख्यवेदान्तिनः। तत्र 'विमतं कर्तृव्यापारपूर्वकम्, फलत्वात्, ग्रामप्राप्तिवत्' इत्यनुमित्या फलभूतज्ञानस्य व्यापारपूर्वकत्वसिद्धेः। तदितरपक्षव्युदासः। व्यापारस्तु—अध्यस्तकार्य्यकरणसंघातरूपस्यात्मनः परिणामरूपो नानुपपन्नः। एतेन कूटस्थनित्यस्यात्मनः कथं परिणामरूपो व्यापार इत्यपास्तम्। विषयप्रयोजनसम्बन्धाधिकारिरूपप्रवृत्तिहेत्वनुबन्धचतुष्टयानुपलब्धेः कथं प्रवृत्तिरिति तु ब्रह्मणो विषयतया ज्ञानस्य चेष्यमाणत्वेन यमुद्दिश्य प्रवर्त्तते तत्प्रयोजनमिति प्रयोजनत्वोपपत्तेः प्रयोजनतया परस्परं विषयविषयिभावस्य शास्त्रेण प्रतिपाद्यप्रतिपादकभावस्य जन्यजनकभावस्य च सम्बन्धस्य क्रमशः साधनचतुष्टयसम्पन्नस्य जिज्ञासोरधिकारिणो लाभेनानुबन्धचतुष्टयस्य प्रवृत्तिहेतोर्लाभान्न शङ्कामर्हति। अथवा शास्त्रप्रणेतृगौरवेण विषयादिकल्पनया प्रवृत्त्युपपत्तिः। ब्रह्मणो विचारशास्त्रविषयत्वं वेदान्तेतिकर्त्तव्यतात्वेन, स्वर्गस्येव दर्शपूर्णमासेतिकर्त्तव्यतात्वेन प्रयाजफलत्वम्, काष्ठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यैव हस्तद्वाराछेत्तृव्यापारविषयत्वम् । आत्मनस्तु कामायेति वाक्ये विरक्त्युपलक्षितसाधनचतुष्टयसम्पन्नस्याधिकारित्वप्रतीतेः, अमृतत्वस्य च नाशास्ति वित्तेनेति वाक्ये वित्तोपलक्षितस्य ज्ञानभिन्नस्यामृतत्वाहेतुत्वप्रतीतेः, द्वयमेतत्क्रमशोऽथातः शब्देनोच्यते । आत्मनि वा अरे ज्ञाते सर्वं विज्ञातमिति वाक्येनामृतत्वसाधनात्मदर्शनफलकं वेदान्तवाक्यविचाररूपं श्रवणं कर्त्तव्यतया—उक्तं जिज्ञासापदेन प्रतिपाद्यते । ब्रह्मविचारादेवावगतिपर्य्यन्तादमृतत्वं नान्यतः, "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था: विद्यतेऽयनाय" इति श्रुतेः । "तयोदूर्ध्वमायन्नमृतत्वमेति" इति मूर्द्धन्यया नाड्या गमनहेतुकममृतत्वं चिरावस्थानरूपम्, "आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते" इत्युक्तेरिति न प्रतीकोपासकानां मोक्षप्रसङ्गः, तेषां विद्युल्लोकादिना ब्रह्मलोकप्राप्तिमात्रश्रुतेः ; "अमानवः पुरुषो ब्रह्म गमयति" इत्युक्तेः । ब्रह्म, प्रधानं, परमाणुः, स्वभावः, कालः, यदृच्छा वा जगत्कारणमिति विप्रतिपत्तेः—जिज्ञासालक्षणसूत्राभ्यां यज्जगज्जन्मादिकारणं तद्ब्रह्मेति प्रतिपाद्यते । जगच्च ब्रह्माबोधनिमित्तं ब्रह्मविवर्त्तमिति । तदुक्तम्—

"अबोधेन जगत्सर्वं मायामयमिव स्थितम् ।
बीजेन सकलं ब्रह्मरूपं सम्पद्यते सदा ॥
शुद्धचिन्मात्रमात्माऽयमाकाशादप्यणोरणुः ।
जगद्विवर्त्तरूपेण केवलं ब्रह्म जृम्भते ॥" इति

सर्वं ब्रह्मात्मकमिति सकलवेदान्तमर्य्यादा । क्वचित् "अयमात्मा ब्रह्म, अन्नं ब्रह्म, प्राणो ब्रह्म, कं ब्रह्म, खं ब्रह्म" इति मुण्डके, भृगुवल्ल्याम् "अधीहि भगवो ब्रह्मेति अन्नं ब्रह्म, प्राणो ब्रह्म, तमो ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आनन्दं ब्रह्म" इति निर्धर्म्मकतया ब्रह्मानन्दादिपदलक्ष्यतयैव प्रतिपाद्यते । परमाणुपरिसंख्यानं सुकरम्, ब्रह्मविचिन्तनन्तु तैलपीडनयन्त्रवदसीमानवध्यातमिति न कर्त्तुमर्हम् । यदाहुः—"ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते—किमुतद्ब्रह्मावेद्यस्मात्तत्सर्वमभवत्" इति । तदुक्तं कठवल्ल्याम्——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥" इति

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति च। आत्मनः प्राधान्यं श्रुत्यापि प्रतीयते । तद्यथा–

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥
यथाग्निवायू भुवनं प्रविष्टौ
रूपं रूपं प्रतिरूपौ बभूवतुः ॥
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बभूव ॥
यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके यथाप्सु ।
परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयमात्मा जात्याद्यभावान्न वाग्विषयः । तदुक्तम्—

"दृष्टा गुणक्रियाजातिसम्बन्धाः शब्दहेतवः ।
नात्मन्यन्यतमोऽप्येषां तेनात्मा नाभिधीयते"।। इति

अयञ्चैकदेशस्थितोऽपि सर्वं शरीरं सचेतनं करोति, चन्दनविन्दुरिव सर्वशरीरसंह्लादम्, हृदयावच्छेदेऽपि—आत्मनस्त्वक्सम्बन्धात्त्वचश्च सर्वशरीरसम्बन्धादिति । इच्छादिकञ्चास्य लिङ्गम् । तदुक्तं गौतमेन—"इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" इति । अयञ्चात्मा शरीरादिसङ्घातव्यतिरिक्तः । शरीरादिरूपत्वे शरीरदाहे पातकाभावप्रसङ्गात् । अवयवोपचयापचयैः प्रतिक्षणविनाशाद्दाहकस्य भोगकालेऽभावाद्भोगाभावे पातकाभावः । नह्यन्यकृतमन्यो भुंक्ते, अतिप्रसङ्गात् । प्रत्यभिज्ञानञ्चातिरिक्तात्मनि प्रमाणम् । एकस्यानेकदर्शिनो दर्शनप्रतिसन्धानाद्भवति प्रत्यभिज्ञानम्—इदमहमद्राक्षमिति । नहि प्रतिक्षणमुत्पादविनाशशालिशरीररूपत्वे एतद्घटत इति । शरीरेन्द्रियवुद्धिवेदनासङ्घातरूपं प्राणिभूतं गृह्यते सूत्रे शरीरपदेन । शरीरमात्रस्य दाहे पातकाभावस्येष्टत्वादिति । जीवात्मचैतन्यं मुक्तौ ब्रह्मलीनं ब्रह्मरूपं भवति । तथा च श्रुतिः—"अयमात्मा अपहतपाप्मा विरजो विमृत्युः" इति । "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति—एवं मुनेर्विजानत आत्मा भवति गौतम" इति,

"इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्त्वा धीरो न शोचति ॥
इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥
न सन्दृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनम् ।
हृदा मनीषी मनसाऽभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति" ।। इति च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतावता ब्रह्मज्ञानान्मोक्ष इति सिद्धयति । लक्षणेन हि वस्तु ज्ञायते– गौरिव सास्नया, क्षितिरिव गन्धेन। तदिदं ब्रह्म जगज्जन्मादिलक्षणेन ज्ञानमर्हति। प्रदर्शयति लक्षणतात्पर्य्येण ब्रह्मणो जगज्जन्मादिश्रुतिः। तद्यथा तैत्तिरीये– "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति, "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चिनमिषत् स ऐक्षत् लोकान्नु सृजा इति स इमान् लोकानसृजत अम्भो मरीचिर्मरमापः अम्भो द्यौः अन्तरिक्षं मरीचिः मरं पृथ्वी" इति, "सदेव सौम्येदमग्र आसीत् एकमेवाऽद्वितीयं तदैक्षद्‌बहुस्यां प्रजायेय, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति। क्वचिदात्मन एव मुखादिनिर्भेदेन वागग्न्यादिप्रादुर्भावं श्रावयित्वा प्रवेशं श्रावयति । तद्यथा–"मुखं निरभिद्यत यथाऽण्डं मुखाद् वाग्वाचोऽग्निरिति । अग्निर्वाग्भूत्वा मुखं प्राविशत्" इति । क्वचिदयमात्मा–"कतरः स आत्मा येन वा पश्यति येन वा शृणोति" इति प्रश्नोत्तररूपेण ; क्वचित्–"एष मे अन्तर्हृदयेऽणीयान् ब्रीहेर्वा यवाद्वा" इति, "एष मे आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षात्" इति चाणुमहद्भावप्रदर्शनेनोपदिश्यते । क्वचिन्निर्गुणत्वसगुणत्वादिना "अशब्दमस्पर्शमरूपमव्ययम्" इति, "यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः" इति च। क्वचिदयमात्मा चक्षुरादिकरणनिर्देशेन, जायाद्याशासनमुखेन श्रवणादिकर्म्मत्वेन, अन्नमयत्वादिना सर्वात्मभावेन च। तद्यथा–"यो वेद पश्यानीति स आत्मा दर्शनायास्य चक्षुः" इत्यादि, "जाया मे स्यात्" इति, "अयमात्मा अन्नमयः प्राणमयः" इति, "आत्मावारे द्रष्टव्यः श्रोतव्यः" इति, "आत्मनि अरे विज्ञाते सर्वं विज्ञातम्" इति । "तिलेषु तैलं दधनीव सर्पिरापः स्रोतस्वरणीषु चाग्निः एवमात्मात्मनि गृह्यतेऽसौ सत्येनैवं तपसा योऽनुपश्यति" इति,

"सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवाततम् ।
आत्मविद्या तपोमूलं तद्ब्रह्मोपनिषत्परम् ॥
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदा मनीषी मनसाऽभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥

स एव सर्वं यद्भूतं यच्च भाव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
सम्पश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥" इति च

सुषुप्त्यादौ सुखाद्यननुवृत्तिचैतन्यानुवृत्तिभ्यां सुखाद्यननुषङ्गी आत्मा । तदेवं सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहमित्यात्मानुभवः । न चैवमनुभवतः किञ्चित्कृत्यमवशिष्यते । तदुक्तम्—"किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" इति ।

"यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥" इति च

यस्य तु—अहं कर्त्ता ममेदं कर्त्तव्यमिति विपरीतप्रत्यय उत्पद्यते ; तस्य अहं ब्रह्मास्मीति प्रकृतवाक्यार्थे दृढीकरणायाऽऽवृत्तिरुपदिश्यते श्रोतव्यो मन्तव्य इति । तदुक्तम्—"आवृत्तिरसकृदुपदेशात्" इति । अयञ्चात्मा महानपि एकोऽपि सूक्ष्मत्वाभिप्रायेण—अन्तःकरणावच्छेदेन चाऽणुरनेकश्चोपदिश्यते । तथा च श्रुतिः—"स एष महानज आत्मा अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यञ्च पापञ्च" इति,

"बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥" इति च

अयञ्चैक एव सन्नुपाधिभिर्न्नाना भासते सुखदुःखादिमान् चन्द्र इव नानाजलोपाधिको नानासकम्पादिभेदभिन्नः । तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥" इति

तदेवं भ्रान्तिप्रतिपन्नभेदनिषेधेन नेह नानास्ति किञ्चनेति निषेधवाक्यस्याज्ञातज्ञापकत्वरूपप्रामाण्यं निर्वहतीति । एकत्वं ज्ञाननिबन्धनम्, नानात्वमज्ञाननिबन्धनम् । तदुक्तम्—

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥" इति

तदेवमात्मैकत्वविज्ञानमासाद्य निवृत्तसंसारः श्रेयसे कल्पताम् । एतत्त्यागश्चाब्धौ लब्धचिन्तामणित्यागमनुहरति । तदुक्तम्—

"धीधनाबाधनायास्य तदा प्रज्ञां प्रयच्छथ ।
क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौ यदिच्छथ ॥" इति

तदेवं सिद्धेऽद्वैते आत्मनानात्वव्युत्पादनं नैयायिकादीनां भ्रममूलकमेव । 'आत्मत्वं नानावृत्ति जातित्वात्' इत्यनुमानन्तु—आत्मत्वस्य जातित्वाऽसिद्धया स्वरूपासिद्धम्, 'आत्मत्वमेकमात्रवृत्ति, विभुमात्रवृत्तिधर्म्मत्वादाकाशत्ववत्' इति सप्रतिरोधञ्चेति । अयञ्चात्मा संसारदशायां महानणुरूपो मतभेदेन, स्वात्मा स्वप्रत्यक्षसिद्धः, परात्मा चेष्टादिनाऽनुमीयते । चेष्टा नामेच्छाद्वेषजनितप्रयत्नजन्या प्रवृत्तिनिवृत्तिः । स्वेच्छायत्नप्रवृत्तीनां ज्ञानेच्छाप्रयत्नजन्यत्वप्रत्यक्षेण परत्र तथानुमानेन परात्माऽनुमीयते । तद्यथा—'इयं प्रवृत्तिः प्रयत्नजन्या प्रवृत्तित्वान्मदीयप्रवृत्तिवत्' इति । एवं यत्नेच्छयोरिच्छाज्ञानजन्यत्वानुमानम् । तदुक्तम्—"जानाति इच्छति यतते प्रवर्त्तते" इति । अत्र यथापूर्वोत्तरं कारणकार्य्यभाव इति, प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिरिति च । परमात्मा तु जगत्कारणतयाऽनुमीयते श्रुत्या प्रतिपाद्यते च । एतदुपासनादेव परापरमुक्तिसिद्धिः । यदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा विचिन्त्यते ॥" इति

स्वर्गेति जीवन्मुक्तिः। परमात्मोपासना चादृष्टद्वारा स्वात्मसाक्षात्कारद्वारा वा मुक्तिकारणम् । आद्ये प्रमाणम्—"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति, अन्त्ये—"आत्मानञ्चेद्विजानीयादयमस्मीति पुरुषः, किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्" इति । परमात्मा शक्त्या सर्वं सम्पादयन् शिव एव शक्तिमान्। तदुत्थं जगत्—शाक्तं शैवमिति च भवति । शक्तेर्विन्दुः, विन्दोः प्रणवः ओंकाररूपः परमात्मनो वाचकतामुपैति । तदुक्तम्—"तस्य वाचकः प्रणवः" इति । विन्दुनादाभ्यां युक्तमकारोकारमकाररूपं वर्णत्रयं प्रणव इत्युच्यते । माहेश्वरीशक्तिः शिवाख्या नागेश्वरीति—उच्यते । वाग्देवीशक्तिः कामन्दकाख्या गोलोकवासिनः पार्श्वस्था । ब्राह्मीशक्तिः सरस्वतीसमाख्या सह ब्रह्मणा समुद्भूता । चैतन्यमेकमेव शक्तित्रययोगाद्ब्रह्मविष्णुमहेश्वरशब्दप्रतिपन्नम्भवति । तत्संक्षोभात्—सत्त्वरजस्तमःस्वरूपमव्यक्तं महदहङ्कारादिपरिणामाय कल्पते । तदिदं चैतन्यं महदादिसप्तप्रकृत्त्या युक्तं सप्ताङ्गम्, षोडशविकारेण षोडशकलम्, सह च महदहङ्कारमनोभिः षोडशविकारेणैकोनविंशमुखमिति चोच्यते । समस्तं व्यस्तञ्च विष्ण्वाख्यं विराड्रूपं व्याप्तं प्रतिशरीरं चैतन्यम्,—एतत्कृतमेव सर्वं जगदिति । तथा च मनुः—

"योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥
सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता यदस्यायतनं तेन नारायणः स्मृतः ॥
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते ॥
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् ।
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥
ताभ्याञ्च शकलाभ्याञ्च दिवं भूमिञ्च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां स्थानञ्च शाश्वतम् ॥
उदवर्हात्मनश्चैव मनः सदसदात्मकम् ।
मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥
महान्तमपि चात्मानं सर्वाणि त्रिगुणानि च ।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥
तेषान्त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम् ।
सन्निवेश्यात्ममात्रैस्तु सर्वभूतानि निर्ममे ॥
यन्मूर्त्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥
तदा विशन्ति भूतानि महान्ति सह कर्म्मभिः ।
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ॥
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ।" इति

—लिङ्गपुराणे च लोककल्पनम्—

"भूर्लोकः प्रथमे पादे भुवर्लोकस्ततः परम् ।
स्वर्लोकश्च महर्जनतपःसत्यास्ततः परम् ॥
विष्णुलोकस्ततश्चोर्द्ध्वं पुनरावृत्तिदुर्ल्लभः ।
ऊर्द्ध्वं कौमारलोकश्च सर्वऋद्धिसमन्वितः ॥
रुद्रलोकस्ततश्चोर्द्ध्वं कैवल्यस्थानमुत्तमम् ।
इत्थं—भूर्लोकादिरुद्रलोकान्तं त्रिपात्कल्पनया क्रियात् ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषः सहस्रशीर्षः सहस्राक्षः सहस्रपात् । तस्य स्वाङ्गुलीयमानेन चतुरशीत्यङ्गुलं व्याकृतं वपुः । अधस्तात्पञ्चाशदङ्गुलिमितं भूलोकसहितं सर्वतोऽधः उद्र्ध्वं पूर्वतः पश्चिमतो दक्षिणतः उत्तरतोऽभ्यन्तरतो बाह्यतश्चावृत्त्य । तत ऊद्र्ध्वं दशाङ्गुलिमितः स्वर्गलोकशिरोग्रीवामयः । तदेवं ब्रह्मैव सर्वलोकमयं सर्वकारणं, नान्यत् । तदुक्तं व्यासेन—"प्रतिषेधाच्च" इति । यतश्चेतनादन्यं प्रतिषेधति शास्त्रम्—"नान्योऽतोऽस्ति द्रष्टा", "एकमेवाद्वितीयं नेह नानास्ति किञ्चन", "अथात आदेशो नेति नेति" इति । बन्धस्याविद्याकृतत्वे विद्यया मोक्ष उपपद्यते । अहिकुण्डलन्यायेन परमात्मसंस्थानभूतः, प्रकाशाश्रयन्यायेन एकदेशभूतो वा बन्धोयद्यभ्युपगम्येत; ततश्च पारमार्थिकस्य त्यागायोगान्मोक्षोपदेशोऽनर्थकः प्रसज्येत । भेदाभेदमुपदिशत्—शास्त्रं भेदांशे लोकसिद्धानुवादकमात्रम् । अभेदांशे त्वज्ञातज्ञापकम्प्रमाणम्भवति । परमात्मा च वादिविप्रतिपत्त्या सन्दिग्धो विचारमर्हति । यदुक्तं व्यासेन—"अथातो ब्रह्म जिज्ञासा" इति । विप्रतिपत्तिश्च प्रादर्शि श्रीमदुदयनेन—"इह यं कमपि पुरुषार्थमर्थयमानाः-'शुद्धबुद्धमुक्तस्वभावः'इत्यौपनिषदाः, 'आदिविद्वान् सिद्धः'इति कापिलाः, 'क्लेशकर्म्मविपाकाशयैरपरामृष्टः'इति पातञ्जलाः,'लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्च'इति पाशुपताः, 'शिवः' इति शैवाः, 'पुरुषोत्तमः' इति वैष्णवाः, 'पितामहः' इति पौराणिकाः, 'यज्ञपुरुषः' इति याज्ञिकाः, 'निरावरणः' इति दिगम्बराः, 'उपास्यत्वेन देशितः' इति मीमांसकाः, 'सर्वज्ञः' इति सौगताः, 'लोकव्यवहारसिद्धः' इति चार्व्वाकाः, 'यावदुक्तोपपन्नः' इति नैयायिकाः,—किम्बहुना यं कारवोऽपि 'विश्वकर्म्मे'त्युपासत" इति । इदञ्च स्वमहिम्नि स्थितम् । तदुक्तम्—

"ब्रह्मण्येव परं ब्रह्म जगद्दृष्टचैव संस्थितम् ।
शुद्धाकाशमिवाकाशे जले जलमिवाऽमलम् ॥" इति

ब्रह्मस्वरूपञ्च ब्रह्मखण्डे निरूपितम्—तद्यथा—

"साकारञ्च निराकारं सगुणं निर्गुणं पृथक् ।
परमाह्लादकं शश्वत्परमानन्दकारकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यायेत योगिनो नित्यं योगेन ज्ञानचक्षुषा ।
तदेवानन्दजनकं निराकारपरात्परम् ।
तज्ज्योतिरान्तरं रूपमतीव सुमनोहरम् ॥

तदेव परमं ब्रह्म भगवन्तं सनातनम् ।
स्वेच्छामयं सर्वबीजं सर्वाधारं परात्परम् ॥

परमानन्दबीजञ्च सत्यमक्षरमव्ययम् ।
प्रकृतेः परमीशानं निर्गुणं नित्यविग्रहम् ॥

आद्यं पुरुषमव्यक्तं पुरुहूतं पुरुष्टुतम् ।
सत्यं स्वरूपमेकञ्च परमात्मस्वरूपकम् ॥" इति

परात्मचिदेव लूतातन्तुन्यायेन स्वात्मनि प्राणादिकल्पनया तदधीन-स्पन्दरूपिणी जीवभावं गताऽऽत्मनि देहाकारसम्भ्रमकारिणी विलुठति। तदेवं भ्रान्त्या जीवभावादिकल्पना। परमार्थतस्तु चिदेवैका। अध्याससहस्रेऽपि-अधिष्ठानत्यागायोगात्। मोक्षफलमेव जीवब्रह्मैक्यं दृढीकरोति। भेदे—'द्वितीयाद्वै भयम्भवति' इति मोक्षानुपपत्तेः। भेदभानन्तूपाध्याऽपि भवन्न पारमार्थिकमभेदं बाधते, स्फटिकस्येवारुण्यं शुक्तिमानमिति। तथा च श्रुतिः— "स एष इह प्रविष्ट आनखाग्रेभ्यः प्राणो नाम भवति, वदन् वाक्, पश्यन् चक्षुः, शृण्वन् श्रोत्रम्, मन्वानो मन इति तान्येतस्य कर्म्मनामानि" इति। एवमैक्यदर्शने व्यवहारदृष्ट्यैव ब्रह्म ब्रह्मण्येव संस्थितं किम्पुनर्ब्रह्मदृष्ट्योपाधिबाधे। अपि च मुखतोऽत्यन्तभिन्ने दर्पणे प्रतिविम्बे भेदभ्रमेऽपि न ब्रह्माभिन्ने जगति जीवादिभेदभ्रमसम्भावनाऽपि। अन्यताभ्रमे तथा बुद्धिवृत्तिरेव हेतुः। तस्यां समाधिनिवृत्तायां ब्रह्मचरमसाक्षात्कारेणाग्नौ समिद्धे हुतं घृतमिव वृत्त्या समं सर्वं ब्रह्मणि लीयते। तदुक्तम्—

"चिच्चन्द्रविम्बे सङ्कल्पकलङ्कः स्फुरतीव यः ।
नासौ कलङ्कस्तद्विद्धि चिद्घताऽस्य घनं वपुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैतैक्यविकलारूपसङ्कल्पश्चिद्भावनात् ।
स च भावनमात्रेण गतो ब्रह्मैव शिष्यते ॥
चिच्चन्द्रबिम्बसङ्कल्पकलङ्कामृतविग्रहः ।
त्वया भाव्येन संस्पृष्टो भावाभावद्वयात्मना ॥

अहङ्कारस्य तस्यास्य नामानीमानि राघव ।
जीवो बुद्धिर्मनश्चित्तं माया प्रकृतिरित्यपि ॥
सङ्कल्पकलना कालः कलाचेत्यपि विश्रुतैः ।
सहस्ररूपोऽहङ्कारः कल्पितार्थैर्विजृम्भते ॥

व्यर्थं भूतानि शोचन्ति नष्ट आत्मेति शङ्कया ।
घटादिषु प्रनष्टेषु यथाकाशाद्यखण्डितम् ॥
जगद्विवर्त्तरूपेण केवलं ब्रह्म जृम्भते ।
सत्यमेकं परं शान्तमादिमध्यान्तवर्जितम् ॥

भावाभावविनिर्मुक्तमिति मत्वा सुखी भव ।
ब्रह्मण्यस्मिन् जगद्रूपे न किञ्चिदपि जायते ॥
जातमप्यथ नष्टञ्च न नश्यत्यम्बुवीचिवत् ।
सत्यं ब्रह्म जगच्चैकं स्थितमेकमनेकवत् ॥

सर्वञ्चासर्ववद्भाति शुद्धं वाऽशुद्धवत्ततम् ।
अशून्यं शून्यमिव च शून्यं वा शून्यवत्स्फुटम् ॥
स्फारमस्फारमिव तदस्फारं स्फारसन्निभम् ।
अविकारं विकारीव समं शान्तमशान्तवत् ॥

सदेवासदिवादृश्यं तदेवातदिवोदितम् ।
निर्मायमपि मायांशुमण्डलीमस्तभास्कराम् ॥
ब्रह्म विद्धि विदान्नाथमपामिव महोदधिम् ।
अनन्तमपि निष्पारं न च क्वचिदवस्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतस्मिन् विकसन्तीमा त्रिपुलाकाशकानने ।
जगज्जठरमञ्जर्य्यः प्रसरन्त्यत्र पञ्चकाः ॥

इदमेव जगत्सर्वं शुक्लत्वं तुहिने यथा ।
अत एताः प्रवर्त्तन्ते विद इन्दोरिवांशवः ॥

अस्मिन् व्योमात्मके रङ्गे भुवनाभिनयभ्रमैः ।
नृत्यत्यविताररम्भं वारैर्नियतिनर्त्तकी ॥

सर्वदर्शनसिद्धान्ते नास्ति भेदो न वस्तुनि ।
परमार्थमये तेन विवादेन किमत्र नः ॥

आकाशकालपवनादिपदार्थजात-
मस्याङ्गसङ्गरहितस्य तदप्यनङ्गम् ॥
सर्वात्मकं सकलभावविकारशून्य-
मप्येतदाहुरजरं परमार्थतत्त्वम् ॥

विद्यते वटबीजान्तर्य्यथा भावो महाद्रुमः ।
परमाणौ तथा सर्गो ब्रह्मन् कस्मान्न विद्यते ॥

यत्रास्ति बीजं तत्र च शाखा चित्तस्वरूपिणी ।
जायते कारणैः सा च वितता सहकारिभिः ॥

यथा शून्यत्वमाकाशे द्रवत्वञ्च यथा जले ।
अन्यतात्ममयी शुद्धा सर्गतेयं तथात्मनि ॥

भारूपमिदमाशान्तं जगद्ब्रह्मैव नस्ततम् ।
अनादिनिधनं सत्यं नोदेति न च शाम्यति ॥

यथा स्पन्दोऽनिले तोये द्रवत्वं व्योम्नि शून्यता ।
तथा जगदिदं भातमनन्यश्लेषमात्मनि ॥

सर्वमात्मा परं ब्रह्म सकृत्प्रकटमाततम् ।
द्वित्वैकत्वे न विद्येते न भ्रान्तिर्न च सम्भ्रमः ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मैवाहं विराडात्मा विराडात्मवपुर्जगत् ।
भेदो न ब्रह्मजगतोः शून्यत्वाम्बरयोरिव ॥

कैश्चिद् ब्रह्मेति कथितः स्मृतः कैश्चिद् विराडिति।
कश्चित्सनातनाभिख्यः कश्चिन्नारायणाभिधः ॥

कश्चिदीश इतिख्यातः कश्चिदुक्तः प्रजापतिः ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

क्षितिजलगगनदिवाकर-
जनतान्यवहानगरशिखरात्मा ।
स्वाधाराधेयमयं
पश्यति वपुषः पुरातनः पुरुषः ॥

असत्ये सत्यबुद्ध्यैव बद्धो भवति भावनात् ।
बहुशो भावयत्यन्तर्नानात्वमनुपश्यति ॥

यो हि यन्मयमेवासौ स न पश्यति तत्कथम् ।
असत्येव जगद्भ्रान्तिरेवं प्रौढिमुपागता ॥

आब्रह्मणो मुधा भाति चिरस्वप्नेन्द्रजालवत् ।
मोहो ब्रह्मण एवायमित्यप्येष महात्मनाम् ॥

भ्रान्तिरेवेदमखिलं ब्रह्मैवाभातमेव वा ।
पवनस्पन्दनं चन्द्रशैत्यं शून्यत्वमम्बरम् ॥

ब्रह्माहं त्वमनन्यात्मा न कदाचिन्न चेतति ।
सर्वदैवेदृशी सत्ता न कदाचिदनीदृशी ॥

जगद्यस्मादनाद्यन्तं ब्रह्मात्मैव निरामयम् ।
इदं त्रिभुवनाभासमीदृशं भाति सर्वदा ॥

शान्तं राम क्षमं ब्रह्म नेह नानास्ति किञ्चन ।
न कदाचन जायन्ते नभसः पादपाद्रयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मणश्च जगन्तीति मत्वा शान्तिं परां व्रज ।
अहन्त्वसत्यथैतस्मिन् ब्रह्मसत्ता प्रवर्त्तते ॥
दिक्सत्ता कालसत्ता च भेदसत्ताऽभ्युपैति च ॥" इति

सर्वेषां वचनानामद्वैतमेव पारमार्थिकम्, द्वैतं मायिकमिति परमार्थः। ईश्वरादिस्वरूपे मतभेदस्तु—वादिनामाकाङ्क्षामात्रमनुसरति, न श्रुतितात्पर्य्यम् । श्रुतीनान्तूपक्रमादिलिङ्गैरद्वैते एव तात्पर्य्यपर्य्यवसानमायाति । विरुद्धांशस्तु तत्तदाकाङ्क्षानुसारेण लोकसिद्ध एवानूद्यते। तदुक्तम्—

"ईश्वरस्य स्वरूपे च बन्धहेतौ तथैव च ।
जगतः कारणे मुक्तौ यागादौ च तथैव च ॥
मार्गाणां ये विरुद्धांशा वेदान्ते च विचक्षणाः ।
तेऽपि मन्दमतीनाञ्च महामोहावृतात्मनाम् ॥
वाञ्छामात्रानुसारेण प्रवृत्ता न यथार्थतः ।" इति

तद्यथा वादिनां मार्गभेदः—'ईश्वर एव नास्तीति' साङ्ख्या मीमांसकाश्च। 'अस्ति क्लेशाद्यपरामृष्टः' इति पातञ्जलाः। 'नित्यज्ञानादिगुणवान्'इति तार्किकाः। 'प्रकृतिपुरुषविवेकस्याज्ञानज्ञानाभ्यां बन्धमोक्षौ'इति साङ्ख्याः। 'एकविंशतिदुःखोच्छेदो मोक्षः, अनादिः सान्तः संसारः, सादिरनन्तोऽपवर्गः,'इति नैयायिकाः। 'आत्मनः सततमूद्र्ध्वगमनं मोक्षः' इति-आर्हताः। 'क्षणिकसाकारज्ञानानामन्ते निराकारतयाऽवस्थानम्'इति बौद्धाः। 'दीपशिखोच्छेदवच्चैतन्योच्छेदः' इति चार्व्वाकाः। इत्येवं मार्गभेदोऽज्ञानकल्पित एव, वस्तुनि विकल्पानुपपत्तेः, श्रुतिविरुद्धत्वाच्च। श्रुतौ सृष्टिस्थित्यादिचिन्तनमद्वैतप्रतिपत्तये, भेदप्रतिपादनं निषेधापेक्षितप्रतियोगिज्ञानाय। ब्रह्मण्येव स्थितिप्रतिपादनन्तु तत्रैव निषेधेनान्यत्रावस्थानासम्भवान्मिथ्यात्वप्रतिपत्तये। स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वरूपत्वान्मिथ्यात्वस्य। तदुक्तम्—

"सर्वेषामेव भावानां स्वाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावम्प्रति मृषात्मता ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैतशास्त्रोपदेशस्तु मन्दाधिकारिणां तत्तत्फलप्रदर्शनेन निःश्रेयसफलाद्वैते प्रवृत्तये। तृणप्रदर्शनेनेवाभिमतकार्य्ये गोः प्रवृत्तये। तदेवं सर्वशास्त्रलोकवेदाऽविरुद्धः प्रतिपादितो भवति।

"द्वे ब्रह्मणी वेदितव्ये परमपरञ्च" इति, "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" इति च न श्रुतौ भेदप्रतिपादनम्, तद्वाचकशब्दाभावात्। द्वित्वस्य चन्द्रद्वित्वबद्भ्रान्त्यापि—उपाधिभेदादुपपत्तेः। लोकसिद्धभेदानुवादेन श्रुतितात्पर्य्याभावात्। तदुक्तम्—

"अतात्त्विकाच्छरीरादेर्मिथ्याभेदमजानताम्।
सत्यात्मनि मुमुक्षूणां कृतेऽभेदो निरूप्यते॥
न सा धीः क्वचिदप्यस्ति यत्राभेदो न भासते।
अत एव न तन्मात्रं यन्नाभेदप्रमापकम्॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥" इति

सुखदुःखव्यवस्था चान्तःकरणौपाधिकी—एकस्याप्युपपद्यते। मलिनामलिनव्यवस्थेव घटाद्युपाधिभेदेनैकस्याकाशस्य। जीवब्रह्मभेदोऽपि चन्द्रजलचन्द्रन्यायेनोपाधिनाऽप्युपपन्नो न वास्तविकतामपेक्षते। उपजीव्यविरोधादपि नाभेदं भेदो बाधते, भेदोपजीव्यत्वादभेदस्य। न ह्येकत्वमन्तरेण द्वित्वमात्मानं लभते, नानैकत्वावगाह्यपेक्षाबुद्धिजन्यत्वाद्द्वित्वादेः। तात्पर्य्यञ्च श्रुतेरद्वैत एवोपक्रमादिलिङ्गेन निर्णीयते। "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्युपक्रम्य "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्युपसंहारेण नवकृत्वोऽभ्यासेन चाद्वैते तात्पर्य्यनिश्चयात्। तदुक्तम्—

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये॥" इति

अपूर्वताऽज्ञातज्ञापकत्वम्, तच्चात्मैक्ये एव शास्त्रस्योपपद्यते। तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अप्युच्छिन्नश्चिदात्मैकः पुमानस्तीति नेतरत् ।
स सङ्कल्पवशाद्बद्धो निःसंकल्पः प्रमुच्यते ॥
सदा सर्वेषु देहेषु पुमानेको व्यवस्थितः ॥" इति

आत्मैक्यज्ञानादेव निरतिशयानन्दरूपब्रह्मप्राप्तिः फलमुपपद्यते। भेदोऽपि स्वरूपभेदः; पटस्वरूपभेदो घटे, घटस्वरूपभेदः पटे इति भेदपुच्छलग्नतया घटपटयोः परस्परप्रवेशादभेद एव पर्य्यवस्यति । तदुक्तम्—

"यत्रोभयोः समो दोषः परिहारोऽपि वा समः ।
नैकः पर्य्यनुयोक्तव्यस्तादृगर्थविचारणे ॥" इति
"समस्तलोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।
का तदा नु गतिस्तद्वद्वस्तुधीव्यवहारयोः ॥
उपपादयितुं तैस्तैर्मतैरशकनीययोः ।
अनिर्वचनतावादपादसेवागतिस्तयोः ॥" इति च

लक्षणादिना तत्त्वंपदार्थशोधनपूर्वकतत्त्वमस्यादिमहावाक्यनिर्णयेनात्मैक्यमेव पर्य्यवस्यति । द्वैतमुपजीव्य तर्क्कादिचार्व्वाकादिशास्त्रप्रणयनं तु पाखण्डेनासुरविमोहतात्पर्य्येण वा । तत्त्वञ्च शिष्टापरिग्रहात्——प्रतीयते । तदुक्तम्——

"आन्विक्षिकीं तर्कविद्यामनुरक्तो निरर्थकाम् ।
तस्यैवं फलनिर्वृत्तिः शृगालत्वं वने मम ॥" इति

मनुश्च—"हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ।" इति
व्यासश्च—"एतेन शिष्टाऽपरिग्रहा व्याख्याताः ।" इति

बन्धमोक्षसुखदुःखादिव्यवस्थानञ्च तत्तदन्तःकरणावच्छेदभेदेनासकृदुपपादितमेव । परस्परविरुद्धद्वयमध्ये-एकतरनिषेधस्यापरविधिनान्तरीयकत्वमिति भेदाभेदयोर्भेदस्य नेह नानास्ति किञ्चनेति निषेधेऽभेदस्यैव पर्य्यवसानम् । तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"प्रामाणिको निषेधश्चेद्भेदोऽप्रामाणिकस्ततः ।
भेदस्यापि निषिद्धत्वाच्छ्रुतिभङ्गोऽन्यथा भवेत् ॥" इति

भेदोऽपि द्वैतमध्ये प्रविष्टः, द्वैतन्तु स्वयमेव विलयनशीलम् । तदुक्तम्— "संसार एव निसर्गोज्ज्वलजलभ्रमराकुलरक्तपीतश्वेतजलजघर्म्मतुहिनाक्रान्तविलयनशीलकुमुदनलिनीदलसमूहसरःकल्प इति न रागाय कल्पते" इति । तत्त्वमसि वाक्ये सर्वज्ञत्वाल्पज्ञत्वविशिष्टचैतन्ययोः तत्त्वंपदशक्ययोरैक्याऽयोगेऽपि भागत्यागलक्षणया लक्ष्यचैतन्यमात्रयोरैक्यमुपपद्यते । शक्तिग्रहोऽपि जीवेश्वरपदवत्तत्समानार्थकतत्त्वम्पदयोर्निरुक्तार्थे सम्भवत्येव । चैतन्यस्य जगत्कर्तृत्वश्रवणमपि मायाद्वारकमेवेति जगच्चैतन्यस्य विवर्त्तो मायायाः परिणाम इति चोच्यते । विवर्त्तः—उपादानविषमसत्ताककार्य्यापत्तिः, अतात्त्विकाऽन्यथाभावो वा । परिणामो नाम—उपादानसमसत्ताककार्य्यापत्तिः; तात्त्विकाऽन्यथाभावो वा । मायाया उपादानत्वं नाम जगदाकारेण परिणममानत्वम् । आत्मनो निमित्तत्वम् । उपादानत्वमपि जगदाकारेण परिणममानमायाऽधिष्ठानत्वरूपम् । 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रानुरोधात् । विवर्त्तपक्षे ब्रह्ममाययोः क्रमेण प्रधानोपसर्जनभावः, परिणामवादे च वैपरीत्यम् । उपाधित्वमेव मायाया उपसर्जनत्वं नाम । ब्रह्मणः सर्वथोपादानेऽप्रवेशादुपादाननिमित्तकारणभूतेश्वरे तत्पदं शक्तम्, अन्तःकरणोपहितचैतन्ये जीवे त्वं पदं शक्तम् । "स वाऽयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयः" इति, "स वा एष महानज आत्मा योऽयं विज्ञानमयः सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति" इति, "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति च श्रुतौ—अहमनुभवेऽपि-अहङ्कारोपहित एवात्मा भासत इति तत्रैव जीवे त्वम्पदशक्तिग्रहः । अहङ्कार एव वासनयाऽज्ञानमित्युच्यते कारणरूपेणेत्यज्ञानोपहितो जीवोऽनुपहित ईश्वर इति । अज्ञानोपहित ईश्वरः, अन्तःकरणोपहितो जीव इति ; अज्ञानप्रतिबिम्बो हि ईश्वरः, अन्तःकरणप्रतिबिम्बो जीव इत्यवच्छेदाभासप्रतिबिम्बवादा भवन्ति, जीवैकत्वनानात्ववादाश्च । पर एव स्वाविद्यया जीवभावमापद्य संसरति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"तदात्मानं स्वयमकुरुत" इति श्रुतेः, "मुच्यते च स्वविद्यया" इति च ।

तदुक्तम्—

"स्वाविद्यया हि पर एव सजीवभावमागम्य संसरति लिङ्गसमागमेन ।
ब्रह्मैव संसरति मुच्यत एतदेव दौवारिकं भवति संसरणन्तु तस्य।।"इति

"मुक्तिः पुनर्भवतिचिद्वपुषश्च तस्य
स्वज्ञानतः स्वमहिमप्रतिबोधतश्च ।।" इति

"स्वाज्ञानान्वयिनी चिदेव भवति स्वज्ञानमस्याः पुन-
र्नास्त्यन्तःकरणोपरागसकलीभावं विना युक्तितः ।।" इति

"पुर्य्यष्टकं भवति तस्य परस्य मोहा-
त्तेनान्वितस्य तु नभोमलवद्व्यलीकम् ।
दुःखं त्रिधा भवति संसरणाभिधानं
नान्यः परादधिकरूपभृदस्ति जीवः ।।" इति च

जीवस्य ब्रह्माऽभेदात् पुर्य्यष्टकसद्भावासद्भावाभ्यां संसारापवर्गौ। तदुक्तम्—

"न पुनरष्टकेन रहितस्य तव क्वचिदस्ति संसारयुजा ।
न पुनरष्टकेन सहितस्य तथा क्वचिदस्ति संसारविगमश्च ।।"इति

अज्ञानावच्छिन्नजीवत्वपक्षे—अज्ञानैकत्वानेकत्वाभ्यां जीवैकत्वनानात्ववाद इत्युक्तम् । आत्मजः प्राणः इतरान् प्राणान् सम्राडिवाधिकृतान् पृथक् पृथग्विनियुंक्ते । तदुक्तम्—"इहैवान्तःशरीरे स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्ति, स प्राणमसृजत्, प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियमिति । यथेमा नद्यः स्पन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं यान्ति, भिद्येते चासां नामरूपे । एवमिमे प्राणाः पुरुषायणाः पुरुषं प्राप्यास्तं यान्ति भिद्येते चैषां नामरूपे पुरुष इत्येवोच्यते । स एषोऽकलोऽमृतो भवति तदेष आरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिता इति तान्होवाचैतावदेवाहमेत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्परं ब्रह्मवेदनातः परमस्ति । तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापि यन्ति ।" इति

"दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥" इति

"अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ
दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष भूतान्तरात्मा ॥" इति

"पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्,
एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सौम्य !
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण, ।
अधश्चोर्ध्वञ्च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥" इति च

तदेकं ब्रह्म बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवौदकानां भावानाम् । एतत्कृते एव सान्तःकरणबुद्धीनां प्रवृत्तिः, राज्ञ इव कृते ग्रामाध्यक्षादीनाम् । तदुक्तम्—

"सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥
एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥
सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्त्वरजस्तमांसि परस्परविरुद्धान्यपि मिलितानि पुरुषार्थाय प्रभवन्ति । वर्त्तिस्नेहानला इव परस्परविरुद्धा रूपप्रकाशाय । तदुक्तम्—

"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥" इति
"जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥"
"अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः"

इति चाविरुद्धधर्म्मदर्शनेन पुरुषबहुत्वप्रतिपादनं सांख्यानामचतुरस्रम् । एकस्मिन्नप्यन्तःकरणोपाधिभेदेन—वृक्ष इव मूलशाखावच्छेदभेदेन संयोगतदभावयोः, आकाश इव घटपटाद्युपाधिभेदेन मालिन्यतदभावयोः, मुख इव च मुकुरतैलकृपाणाद्युपाधिभेदेन नानाकारस्य, एकस्यां त्वचीव प्रदेशभेदेन शीतोष्णस्पर्शयोरपर्य्यायं जननमरणादिविरुद्धधर्म्मसमावेशसम्भवात् । ऐकात्म्ये—शरीरान्तरसुखादेः शरीरान्तरेऽनुसन्धानापादनन्तु पूर्वजन्मशरीरसुखाद्यापादनमिव जन्मभेदेनान्तःकरणभेदेन समाधेयम् । आत्मनो ज्ञानरूपस्य स्वयं प्रकाशत्वम् "अत्रायं पुरुषः स्वयं ज्योतिः" इति श्रुतिसिद्धमिति न नैयायिकमीमांसकानां ज्ञाततालिङ्गकानुमानवेद्यत्वानुव्यवसायवेद्यत्वपक्ष इवाऽनवस्थादोषकलङ्कावसरः । ज्ञानयौगपद्यन्तु न व्यवसायानुव्यवसायौ—आश्रित्य, कारणकार्य्यरूपतया यौगपद्याऽयोगात् । सव्येतरविषाणवद्यौगपद्ये—कार्य्यकारणभावायोगात् । नापि कारणविषयभेदमादाय, मनःसंयोगरूपासमवायिकारणायौगपद्यात् । नापि तदैक्यमादाय, करणानां प्रत्ययपर्य्याये सामर्थ्यात् । दीर्घशष्कुलीभक्षणे यौगपद्याभिमानन्तु—उत्पलपत्रशतव्यतिभेदवन्मनस आशुसञ्चारात् । भेदाभेदयोः प्रत्यक्षागमविरोधे प्राबल्यमागमस्यैव, परत्वात् । तदुक्तं जैमिनिना—"पौर्वापर्य्ये पूर्वदौर्बल्यं प्रकृतिवत्" इति । कुमारिलेन मीमांसावार्त्तिके—

"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् ।
अन्योऽन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मायामयत्वसिद्धौ च प्रपञ्चस्य प्रमाणतः ।
प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ॥
अद्वैतागमवाक्यन्तु तत्त्वावेदनलक्षणम् ।
प्रमाणभावं भजते बाधवैधुर्य्यहेतुतः ॥" इति च

मायामयत्वाद्भेदबुद्ध्यागमयोरविशेषप्रसंगस्तु सर्वसत्यतायामपि समानः। विषयसत्यतया आगमज्ञानसत्यता विपर्य्यासविरोधिता च । आत्मसाक्षात्काररूपा चरमान्तःकरणवृत्तिर्विद्यारूपा वृत्त्यन्तरमिव वृत्तितयोपाधिरपि रजोऽन्तरं भिन्दत् स्वयमपि भिद्यमानं कतकरज इव जलं निर्मलमुपाध्यन्तरं भिन्दत् स्वयमपि भिद्यमानम्—आत्मानं निर्म्मलं करोतीति सिद्धमद्वैतागमवाक्यस्य मानत्वम्। तदुक्तम्—

"तस्मान्मायामयत्वेऽपि युक्ता ब्रह्मणि मानता ।
अद्वैतागमवाक्यानामिति तावद्व्यवस्थितम् ॥" इति

एतेन स्वप्रकाशानन्दरूपं निरावरणमद्वैतं ब्रह्मवेदान्तप्रमाणमिति सिद्धम्भवति। "आत्मा वारे ज्ञातव्यः" इति वचनन्तु विदितपदपदार्थस्य समधिगतशाब्दन्यायतत्त्वस्यान्तरेणापि विधिं शाब्दज्ञानोत्पत्तेः शाब्द्याम् । ज्ञानप्रकर्षहेतुभावस्यान्वयव्यतिरेकसिद्धतया भावनारूपायां फलतया स्वतःसुन्दरत्वेन स्वयमेव प्रवृत्तेर्ब्रह्मसाक्षात्काररूपायां त्रिविधायामपि प्रतिपत्तावप्रवृत्तप्रवर्त्तनरूपविध्यसम्भवात्—बाह्यविमुखतापादनेनान्तरश्रोतःसम्पादकतया विधिच्छायामात्रमिति न ब्रह्मज्ञानस्य कथमपि कार्य्यानुप्रवेशसम्भव इति कणादकपिलकुमारिलाक्षपादायुर्वेदपक्षपातिनः स्वरूपभेदवादिनः प्रागुन्नीतन्यायेन शिक्षणीयाः । स्वरूपभेदस्तु—-अभेदपर्य्यवसित इत्युक्तम्। धर्म्मविशेषरूपभेदस्तु घटः पटभिन्नः इतीव भेदः पटभिन्न इत्यपि सम्भवाद्भेदे भेदान्तरं तत्रापि भेदान्तरमित्यवस्थादुस्थ इति नाऽभेदबाधनेऽलमिति। अद्वैतमेव परमार्थ इति तत्त्वमस्यादिमहावाक्यानामखण्डार्थकत्वं सिद्धम्भवति । अखण्डार्थत्वन्नाम—'संसर्गानवगाहियथार्थज्ञानजनकत्वम् ।' तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताऽखण्डार्थता नाम तत्प्रातिपदिकार्थता ॥" इति

तेन परमानन्दरूपो मोक्ष इति सिद्धयति । विवेकख्यात्या पुरुषस्वरूपावस्थानन्तु न मोक्षः, आनन्दरूपत्वाभावे प्रवृत्त्यनुपपत्तेः । अपि च बन्धमोक्षयोः सामानाधिकरण्यात्—अज्ञानस्य बुद्धिधर्म्मतया तद्भावाभावकृतं बन्धमोक्षयुगलं न पुरुषस्य युक्तम् । न ह्यन्यधर्म्मेणान्यो युज्यते । नहि साधुतस्करयोरनपराधापराधकृतं मोक्षबन्धद्वयमन्योऽन्यं सङ्कीर्य्यत इति । नहि प्रकृती राज्ञीव नर्त्तकी स्वसाक्षात्कारं प्रणाड्या चानन्दमिव पुरुषे किञ्चिज्जनयति, अनाधेयातिशयत्वात् । पुरुषे प्रकृतिगतबन्धादि निरूपयन् सिद्धशितिमानं सौधमपि परिणततालफलकालिम्ना निरूपयेत् । तदुक्तम्—

"तस्मान्न बद्ध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥" इति

अज्ञानरागनिमित्तको बन्धो नातद्धर्म्मिणि पुरुषे युज्यते । तदुक्तम्—

"धर्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्य्ययादिष्यते बन्धः ॥
रूपैः सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषस्यार्थं विमोचयत्येकरूपेण ॥" इति

तथा चानाद्यविद्यैव संसारः । निखिलविकल्पातीतपरिशुद्धपरमात्मविद्योदयाधीनस्तदस्तमय एव मोक्षः । एकमेव खल्वपराधीनप्रकाशमतिशयानन्दरूपमनाद्यविद्यावशेनाद्वितीयमपि सद्वितीयमिव सांसारिकधर्म्मकलुषितमिव च जीवव्यपदेशं ब्रह्माऽवभासते । एकस्यैवानाद्याविद्यावशादविचारितरमणीयोऽयमतदाकारावभासः । एतेन—

"कस्याविद्या यदुच्छित्तिर्मुक्तिरिष्टा परात्मनः ।
विद्या स्वभावतोऽयुक्ता साऽतो जीवो न भिद्यते ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शितदिशा कस्येयमविद्या ब्रह्मणो जीवस्य वा ? नाद्यः, परात्मनः प्रकाशरूपतया—अविद्याया अतद्रूपतया परस्परप्रत्यनीकभावेनाश्रयाश्रयिभावायोगात् । न द्वितीयः, स किं ब्रह्मणो भिद्यते न वा ? आद्ये—'एकमेवाद्वितीयम्, अनेन जीवेनात्मने' त्याद्यभेदश्रुतिव्याकोपः । द्वितीये—स एव प्रथमपक्षोक्तदोष आविर्भवति । अविद्याकृतजीवभावे तद्भेदे च तदाश्रयाविद्येति च अविद्याकृतो जीवो जीवाश्रयाऽविद्येति परस्पराश्रयदोषमावहति । अनादित्वाद्बीजाङ्कुरन्यायेन परिहारस्तु व्यक्तिभेदाद्बीजाङ्कुरे सम्भवन्नपि प्रकृते वीतरागजन्मादर्शनात्-जातमात्रस्य स्तन्याभिलाषादेक एव नानाजन्मभागित्यात्मैक्ये न सम्भवति । जीवस्याप्यनादित्वे न ब्रह्मप्रतिविम्बता । विम्बप्रतिविम्बयोः समानकालत्वायोगात्, प्रतिबिम्बस्य बिम्बसिद्ध्युत्तरकालीनत्वात्, अविद्याधीनस्तद्विभाग इति चानादित्वे दुर्निरूपमित्यपास्तम्, ब्रह्मण एवाविद्याविषयाश्रयत्वस्वीकारात् । एतेन पदार्थविचारे मनआत्मादिषु परस्परविरुद्धार्थाभिधानम् न विरोधमावहति, सर्वमविद्याविलसितमिति सुसमाधानत्वात् । तद्यथा——मनः सांख्यवैशेषिकपक्षे इन्द्रियम्, वेदान्तिनयेऽनिन्द्रियमिति । तदुक्तम्——"इन्द्रियञ्च भवति साधर्म्यात्" इति, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इति च । पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि । पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियाधिष्ठानानि, पञ्चेन्द्रियबुद्धयः । मनश्च प्रतिशरीरमेकं संयोगादिसन्निकर्षसहकृतं ज्ञानजनकमिति नानेकेन्द्रियज्ञानयौगपद्यम् । तदुक्तम्———"आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन" इति । बुद्धिश्च तृतीयक्षणध्वंसप्रतियोगिरूपा क्षणिका, न बौद्धवद्द्वितीयक्षणवृत्तिध्वंसप्रतियोगिरूपेति । आशुविनाशिन्यपि प्रदीपार्चिरिव वस्तुपरिच्छेदिका । इन्द्रियञ्च यद्यदात्मकं तत्तदात्मकमेवार्थं गृह्णाति हीनमिथ्यातियोगैः—किञ्चिद्दर्शनाऽयथादर्शनाऽतिशयदर्शनरूपैः स्वभावात् । एवं द्रव्यादीनां सुसंग्रहः शुभाय, दुःसंग्रहो दुःखायेति । पञ्चीकरणप्रक्रियया सर्वभूतात्मकेष्वपीन्द्रियेषु तेजश्चक्षुषि, खं श्रोत्रे, क्षितिः घ्राणे, आपो रसनेऽनिलः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शने इत्येवं विशेषेणापदेशो भवति । समनस्कमिन्द्रियमुपघातादिविकृतम्, मनोऽपि दुर्दैन्योद्विग्नत्वादिविकारयुक्तम्भवतीति । मनसो बुद्धेश्च समानहीनमिथ्यातियोगाः प्रकृतिविकृतिहेतवो भवन्ति । इन्द्रियनिरपेक्षं मनोग्राह्यं वस्तु चिन्त्यमित्युच्यते । समनस्कानामिन्द्रियाणां प्रकृतिभावे सात्मेन्द्रियार्थसंयोगादिना बुद्ध्या सम्यगवेक्षणादिभिर्यतितव्यम् । तस्मादात्महितमिच्छता सर्वदा सर्वेण भवितव्यम् । गर्भावस्थायामात्मा कुतः समायाति ? बुद्धिर्मनश्च कुतः ? मातृतः पितृतः आत्मतः सत्त्वतः सात्म्यत इति यदि! तदोद्भिज्जादीनां कुतः ? इति प्रश्नो ज्ञानादयः पूर्वाभ्यासादेवाविशन्तीति समाधेयः । शरीरे आत्मसम्बन्ध एव चैतन्यहेतुः । तदुक्तम्—

"अनादेश्चेतनाधातोर्नेष्यते परनिर्मितिः ।
पर आत्मा सचेद्धेतुरिष्यते परनिर्मितिः ॥" इति

चेतनाहेतुश्चात्मा नित्यत्वेन न क्रियते । एवमात्मनि—अनेकजन्मसम्बन्धिसंसारहेतुधर्म्माधर्म्मगुणशालिनि सिद्धे चैतन्यकारणे इन्द्रियादिसम्बन्धोऽपि कारणं भवन्न वार्य्यत इति । यदृच्छया सर्वमितिमतन्तु श्रेयस्कामैरूपेक्षणीयम्, प्रमाणानभ्युपगमात् । नहि तेन विना वस्तु सिद्ध्यति । तदुक्तम्—"प्रमेयसिद्धिः प्रमाणाद्धि" इति । तदेवं नास्तिकतमो निरस्य, आप्तवाक्यमनुसृत्य, ज्ञानाग्निनाऽज्ञानं विदाह्य, सद्बुद्धिप्रदीपेन सर्वमैहिकामुष्मिकं पश्येत् । द्विविधमेव सर्वं सच्चासच्चेति । तस्य च चत्वारि प्रमाणानि । प्रत्यक्षमनुमानमाप्तोपदेशो युक्तिश्चेति । आप्ताश्च कृतलक्षणाः । तद्यथा—

"रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये ।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा ॥
आप्ताः शिष्टा विशुद्धास्ते तेषां वाक्यमसंशयम् ।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तया ॥" इति

इदमलौकिकमाप्तलक्षणम् । लौकिकन्तु यथार्थज्ञानरागाभावाभ्याम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदुक्तं चरके पतञ्जलिना—"आप्तो नाम वस्तु याथात्म्यज्ञानवान् रागादिवशादपि नान्यथावादी यः सः" इति। एतेन आप्तोपदेशः प्रमाणशब्दस्य लक्षणमुक्तम्भवति। तदुक्तं गौतमेन—"आप्तोपदेशः शब्दः" इति। रूपरसगन्धस्पर्शशब्दकर्म्मणां हीनमिथ्यातियोगा ज्ञाने भवन्ति। रूपे सम्यग्दर्शनमतियोगोऽन्यथादर्शनं मिथ्यायोगोऽसम्यग्दर्शनं हीनयोगः। एवं रसादिष्वपि बोध्यम्। कर्म्मणामपि वाङ्मनःशरीरभेदभिन्नानां हीनादियोगा वेदितव्याः। तदेवं व्याधिपरीतेनापि हिताहितमवेक्ष्य धर्म्मार्थकामानामहितानामनुपसेवने हितानामुपसेवने यतितव्यमिति। न ह्यन्तरेण त्रयमेतन्मानसं किञ्चिन्निष्पद्यते सुखं दुःखं वा। तस्मात्तद्विद्यवृद्धानामुपसेवने—आत्मदेशकुलकालबलशक्तिज्ञाने प्रयतितव्यमिति। तदुक्तम्—

"मानसं प्रति भैषज्यं त्रिवर्गस्यानवेक्षणम्।
तद्विद्यसेवा विज्ञानमात्मादीनाञ्च सर्वशः॥" इति

आत्मादिपदार्थज्ञानञ्च प्रत्यक्षानुमानाप्तोपदेशेभ्यो भवति। आप्ता हि—अवितर्क्यस्मृतिविभागविशेषनिष्प्रीत्युपतापदर्शिनश्च। तेषां वचनं प्रमाणमप्रमाणमतद्विधानां मत्तोन्मत्तादीनाम्। समनस्कचेत्तनाधातुरूप आत्मा पुरुषशब्देनोच्यते। तदुक्तम्—

"दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॥" इति

"पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।
मनोदशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥
लक्षणं मनसो ज्ञानस्याभावो भाव एव वा।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे प्रवर्त्तते॥" इति

इन्द्रियसापेक्षमनोविषया रूपादयः। इन्द्रियनिरपेक्षतद्विषयस्तु कर्त्तव्याकर्त्तव्यचिन्तनम्, उपपत्त्या तद्विमर्शनम्, सम्भावनया तदूहनम्, गुणदोषविचारणरूपः सङ्कल्पः। तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"इन्द्रियाभिग्रहः कर्म्म मनसः स्वस्य निग्रहः ।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते ॥" इति

"इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते ।
कल्पते मनसाऽप्यूर्ध्वं गुणतो दोषतो यथा ॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यति तयाऽकर्त्तुं कर्तुं वा बुद्धिपूर्वकम् ॥" इति च

इन्द्रियाणि तु ज्ञानेन्द्रियाणि-एकैकाधिकपाञ्चभौतिकानि । हस्तादीनि पञ्चकर्म्मेन्द्रियाणि साङ्ख्यमते आहङ्कारिकाणि । तदुक्तम्—

"एकैकाधिकयुक्तानि खादीनामिन्द्रियाणि तु ।
पञ्चकर्म्मानुमेयानि येभ्यो बुद्धिः प्रवर्त्तते ॥"

"सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात् ॥" इति च

सत्यपि पाञ्चभौतिकत्वे एकैकाधिक्यादेव चक्षुरादौ तैजसादिव्यपदेशः। तानि चेन्द्रियाणि तत्तज्ज्ञानकर्म्मानुमेयानि । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुरसनघ्राणानि । कर्म्मेन्द्रियाणि तु—

"हस्तौ पादौ गुदोपस्थे जिह्वेन्द्रियमथापि वा ।
कर्म्मेन्द्रियाणि पञ्चैव पादौ गमनकर्म्मणि ॥
पायूपस्थौ विसर्गार्थौ हस्तौ ग्रहणधारणे ।
जिह्वा वागिन्द्रियं वाक्च सत्या ज्योतिस्तमोऽनृता ॥"

इत्युक्तदिशा हस्तादीनि इति।

"महाभूतानि खं वायुरग्निरापः क्षितिस्तथा ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः ॥
तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे ।
परः पूर्वगुणश्चैव क्रमशो गुणिषु स्मृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खरद्रवचलोष्णत्वं भूजलानिलतेजसाम् ।
आकाशस्याप्रतीघातो दृष्टं लिङ्गं यथाक्रमम् ॥
लक्षणं सर्वमेवैतत्स्पर्शनेन्द्रियगोचरम् ।
स्पर्शनेन्द्रियविज्ञेयः स्पर्शो हि सविपर्य्ययः ॥" इति

तदुक्तम्—"येनेन्द्रियेण यद्गृह्यते तेनेन्द्रियेण तज्जातिस्तदभावश्च गृह्यते" इति । यज्ज्ञानं यदिन्द्रियविषयसन्निकर्षजन्यं तत्तेन निर्दिश्यते रूपज्ञानं चाक्षुषज्ञानमित्यादि । तदुक्तम्—

"गुणाः शरीरे गुणिनां निर्दिष्टाश्चिह्नमेव च ।
अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः ॥
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते ।
याति सा तेन निर्देशं मनसा च मनोद्भवा ॥" इति

मानसी च बुद्धिश्चिन्त्यविषया घटस्मृतिः पटस्मृतिरिति । तदेवं चिन्त्याचिन्त्यनानार्थभेदाद्बुद्धयो नाना भवन्तीति । कार्य्यभेदाच्च कारणभेदकल्पनम् । यथा शब्दभेदेनाङ्गुष्ठमध्यमाङ्गुलिसंयोगभेरीदण्डसंयोगतत्तत्स्थानजिह्वाग्रसंयोगादिकं कल्प्यते । अहङ्कारस्य च सर्वकार्य्ययोगः, अहङ्करोमि, ददामि, जानामीति । प्रकृतिसंयोगवियोगौ बन्धमोक्षकारणे । तदुक्तम्—

"रजस्तमोभ्यां युक्तस्य संयोगोऽयमनन्तवान् ।
ताभ्यां निराकृताभ्यान्तु सत्त्ववृद्ध्या निवर्त्तते॥" इति

कर्म्मफलादिकं ज्ञातव्यम्—तदुक्तम्—

"अत्र कर्म्मफलञ्चात्र ज्ञानञ्चात्र प्रतिष्ठितम् ।
अत्र मोहः सुखं दुःखं जीवितं मरणं स्वता ॥
एवं यो वेद तत्त्वेन स वेद प्रलयोदयौ ।
पारम्पर्य्यं चिकित्साया ज्ञातव्यं यच्च किञ्चन ॥" इति

पुरुषश्च सर्वकारणम्—तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"भास्तमःसत्यमनृतं वेदाः कर्म्मशुभाशुभम् ।
न स्युः कर्त्ता च बोद्धा च पुरुषो न भवेद्यदि ॥
नाशयो न सुखं नार्त्तिर्न गतिर्नागतिर्न वाक् ।
न विज्ञानं न शास्त्राणि पुरुषो न भवेद्यदि ॥
कारणं पुरुषस्तस्मात्कारणज्ञैरुदाहृतः ।
न चेत्कारणमात्मा स्याद्भादयः स्युरहेतुकाः ॥
न चैषु सम्भवेज्ज्ञानं न च तैः स्यात्प्रयोजनम् ।" इति

एतत्संयुक्तमेव शरीरं भोगायतनं भवति । न चात्मानं विना देहसम्पत्तिः । तदुक्तम्—

"कृतं मृद्दण्डचक्रैश्च कुम्भकाराहते घटम् ।
कृतं मृत्तृणकाष्ठैश्च गृहकाराद्विना गृहम् ॥
यो वदेत्स वदेद्देहं सम्भूयकरणैः कृतम् ।
विना कर्त्तारमज्ञानाद्युक्त्यागमबहिष्कृतम् ॥
कारणं पुरुषः सर्वप्रमाणैरुपलभ्यते ।
येभ्यः प्रमेयं सर्वेभ्य आगमेभ्यः प्रतीयते ॥
न च तत्सदृशास्त्वन्ये पारम्पर्य्यसमुत्थिताः ।
सारूप्याद्ये त एवेति निर्दिश्यन्ते तथा तथा ॥
भावास्तेषां समुदयो निरीशः सत्त्वसंज्ञकः ।
कर्त्ता भोक्ता न स पुमानिति केचिद्व्यवस्थिताः॥" इति

अहङ्कारादयश्चात्मसद्भावे प्रमाणानि । तदुक्तम्—

"अहङ्कारः फलं कर्म देहान्तरगतिः स्मृतिः ।
विद्यते सति भूतानां कारणे देहमन्तरा ॥" इति

अयञ्चात्मा ज्ञानवान् करणयोगाद्भवति । तदुक्तम्—

"आत्मा ज्ञः करणैर्योगाज्ज्ञानं त्वस्य प्रवर्त्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणानामवैमल्यादयोगान्न प्रवर्त्तते ॥
पश्यतोऽपि यथाऽऽदर्शे समले नास्ति दर्शनम्।
तत्त्वं जले वा कलुषे चेतस्युपहते तथा ॥
कारणानि मनो बुद्धिर्बुद्धिकर्म्मेन्द्रियाणि च।
कर्त्तुः संयोगजं कर्म वेदना बुद्धिरेव च ॥
नैकः प्रवर्त्तते कर्त्तुं भूतात्मा नाश्नुते फलम्।
संयोगाद्वर्त्तते सर्वं तमृते नास्ति किञ्चन ॥" इति

स चात्मा सह प्रकृत्याऽनादिभावत्वान्नित्यस्तदन्यस्त्वनित्यः। तदुक्तम्—

"अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः।
सदकारणवन्नित्यं दृष्टं हेतुजमन्यथा ॥
अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः।
व्यक्तञ्चेन्द्रियकञ्चैव गृह्यते तद्यदिन्द्रियैः ॥
अतोऽन्यत्पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियम्।
खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाऽष्टमः ॥
भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश।
बुद्धीन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियाणि च ॥
समनस्काश्च पञ्चार्था विकार इति संज्ञिताः।
इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम् ॥
अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः।" इति

बुद्ध्यादिक्रमेण जगदुत्पद्यते। तदुक्तम्—

"जायते बुद्धिरव्यक्ताद्बुद्ध्याऽहमिति मन्यते।
परं खादीन्यहङ्कारादुत्पद्यन्ते यथाक्रमम् ॥
ततः सम्पूर्णसर्वाङ्गो जातोऽभ्युदित उच्यते।
पुरुषः प्रलये चेष्टा पुनर्भावैर्वियुज्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अव्यक्ताद्व्यक्ततां याति व्यक्ताद्व्यक्ततां पुनः ।
रजस्तमोभ्यामाविष्टश्चक्रवत्परिवर्त्तते ॥" इति

न चात्मा संसारदशायामेतैर्वियुज्यते । तदुक्तम्—

"अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न विमुक्तपूर्वः ।
नैवेन्द्रियैर्नैवमनोमतिभ्यां न चाप्यहङ्कारविकारदोषैः ॥" इति

संसारश्च रागादितो भवति । तदुक्तम्—

"येषां द्वन्द्वे परा शक्तिरहङ्कारपराश्च ते ।
उदयप्रलयौ तेषां न तेषां सत्त्वतोऽन्यथा ॥" इति

पुरुषलिङ्गानि—

"प्राणापानौ निमेषाद्या जीवनं मनसो गतिः ।
इन्द्रियान्तरसञ्चारः प्रेरणं धारणञ्च यत् ॥
देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणन्तथा ।
दृष्टस्य दक्षिणेनाक्ष्णा सव्येनावगमस्तथा ॥
इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः ।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः ॥
यस्मात्समुपलभ्यन्ते लिङ्गान्येतानि जीवतः ।
न मृतस्यात्मलिङ्गानि तस्मादाहुर्मनीषिणः ॥
शरीरं हि गते तस्मिन् शून्यागारमचेतनम् ।
पञ्चभूतावशेषत्वात् पञ्चत्वं गतमुच्यते ॥
अचेतनं क्रियावच्च मनश्चेतयिता परः ।
युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः ॥

क्रिया च—चेतनावान् यतश्चात्मा ततः कर्त्ता निरुच्यते ।
अचेतनत्वाच्च मनः क्रियावदपि नोच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वातन्त्र्यञ्च—यथा स्वेनात्मनाऽऽत्मानं नयते सर्वयोनिषु ।
प्राणैस्तन्त्रयते प्राणी न ह्यन्योऽस्य प्रवर्त्तकः ॥

वशित्वञ्च—वशी तत्कुरुते कर्म यत्कृत्वा फलमश्नुते ।
वशी चेतः समाधत्ते वशी सर्वं निरस्यति ॥" इति

आत्मन एव किञ्चिद्धर्म्मविषये प्रश्नोत्तरे—

"सर्वाः सर्वगतत्वाच्च वेदनाः किं न वेत्ति सः ।
देही सर्वगतो ह्यात्मा स्वे स्वे संस्पर्शनेन्द्रिये ॥
सर्वाः सर्वाश्रयस्थास्तु नात्माऽतो वेत्ति वेदनाः ।
न पश्यति विभुः कस्माद्विभुत्वञ्च ततः कथम् ॥
विभुत्वमत एवास्य यस्मात्सर्वगतो महान् ।
मनसश्च समाधानात्पश्यत्यात्मा तिरस्कृतम् ॥
नित्यानुबन्धं मनसा देहकर्म्मानुपातिना ।
सर्वयोनिगतं विद्यादेकयोनावनिश्चितम् ॥" इति

क्षेत्रं क्षेत्रज्ञो वा पूर्वमत्राह—

"आदिर्नास्त्यात्मनः क्षेत्रपारम्पर्य्यमनादिकम् ।
अनादित्वाच्चयोरस्मात्किं पूर्वमिति नोच्यते ॥" इति

साक्षी चैष सर्वेषामित्याह—

"ज्ञः साक्षीत्युच्यते नाज्ञः साक्षी आत्मा यतः स्मृतः ।
सर्वे भावा हि सर्वेषां भूतानामात्मसाक्षिकाः ॥" इति

प्रश्नः—"स्यात् कथञ्चाविकारस्य विशेषो वेदनाकृतः ।" ?

अस्योत्तरम्—

"नैकः कदाचिद्भूतात्मा लक्षणैरुपलभ्यते ।
विशेषोऽनुपलभ्यस्य तस्य नैकस्य विद्यते ॥
संयोगः पुरुषस्येष्टो विशेषो वेदनाकृतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदना यत्र नियता विशेषस्तत्र तत्कृतः ॥
आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्त्तते ।
सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे ॥
निवर्त्तते तदुभयं वशित्वञ्चोपजायते ।
सशरीरस्य योगज्ञास्तद्योगमृषयो विदुः ॥" इति

योगश्च चित्तवृत्तिनिरोधलक्षणो ध्येयातिरिक्तविषयवृत्तिनिरोध-सर्ववृत्ति-निरोधाभ्यां संप्रज्ञातोऽसम्प्रज्ञातश्चेति द्विधा कीर्त्यते । योगसाधनञ्च-युक्ताहारविहारादिकं यमनियमादि बहिरङ्गम्, धारणादि संयमाख्यमन्तरङ्गम्। तदुक्तम्—"योगश्चित्तवृत्तिनिरोधः", "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ योगाङ्गानि ।"

"युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥" इति

योगस्यावान्तरफलं विभूतिजातं परमफलं कैवल्यं यत्तृतीयचतुर्थपादे वर्ण्यते समारोहेणेति । देहाद्देहान्तरं दर्शयति—

"भूतैश्चतुर्भिः सहितः सुसूक्ष्मैर्मनोजवो देहमुपैति देहात् ।
कर्मात्मकत्वान्न तु तस्य दृश्यं दिव्यं विना दर्शनमस्ति रूपम् ॥
स सर्वगः सर्वशरीरभृच्च स विश्वकर्मा स च विश्वरूपः ।
स चेतनाधातुरतीन्द्रियश्च स नित्ययुक्सानुशयः स एव ॥
भूतानि चत्वारि तु कर्मजानि यान्यात्मलीनानि विशन्ति गर्भम् ।
सबीजधर्म्माण्यपरापराणि देहान्तराण्यात्मनि याति यान्ति ॥
रूपाद्धि रूपप्रभवः प्रसिद्धः कर्मात्मकानां मनसो मनस्तः ।
भवन्ति येत्वाकृतिबुद्धिभेदा रजस्तमस्तत्र च कर्महेतुः ॥
अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न वियुक्तरूपः ।
न कर्म्मणा नैव मनोमतिभ्यां न चाप्यहङ्कारविकारदोषैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रजस्तमोभ्यां हि मनोऽनुबद्धं ज्ञानाद्विना तत्र हि सर्वदोषाः।
गतिप्रवृत्त्योस्तु निमित्तमुक्तं मनः सदोषं बलवच्च कर्म्म ॥"इति

आत्मन एव रोगनैरुज्ये प्रश्नोत्तराभ्यामाह—

"रोगाः कुतः संशमनं किमेषां हर्षस्य शोकस्य च किं निमित्तम्।
शरीरसत्त्वप्रभवा विकाराः कथं न शान्ताः पुनरापतेयुः ॥"

इति प्रश्ने—

उत्तरम्—"प्रज्ञापराधी विषमास्तथार्था हेतुस्तृतीयः परिणामकालः।
सर्वामयानां त्रिविधा च शान्तिर्ज्ञानार्थकालाः समयोगयुक्ताः ॥
धर्म्याः क्रिया हर्षनिमित्तमुक्तास्ततोऽन्यथा शोकवशं प्रयान्ति।
शरीरसत्त्वप्रभवास्तु रोगास्तयोरवृत्त्या न भवन्ति भूयः ॥
रूपस्य सत्त्वस्य च सन्ततिर्या नोक्तस्तदादिर्न हि सोऽस्ति कश्चित्।
तयोरवृत्तिः क्रियते पराभ्यां धृतिस्मृतिभ्यां परया धिया च ॥
सत्त्वाश्रये वा द्विविधे मयोक्ते पूर्वं गदेभ्यः प्रतिकर्म नित्यम्।
जितेन्द्रियं नानुपतन्ति रोगास्तत्कालयुक्तं यदि नास्ति दैवम् ॥" इति

कर्म्माणि कर्तृपृष्ठं धावन्तीं वानरीं शिशव इव न विमुञ्चन्ति। सर्वस्यात्मजानामिन्द्रियाणां भावाभावहेतुर्दैवम्। इन्द्रियाणि कर्माधीनानि भोगसाधनानि। सत्स्वसत्सु वा बाह्येन्द्रियेषु मनोयोगाज्ज्ञानवानेवात्मा। तदुक्तम्—

"न कर्त्तुरिन्द्रियाभावात् कार्य्यज्ञानं प्रवर्त्तते।
या क्रिया वर्त्तते भावैः सा विना तैर्न वर्त्तते ॥
जानन्नपि मृदोऽभावात् कुम्भकृन्न प्रवर्त्तते।" इति
"इन्द्रियाणि च संक्षिप्य मनः संक्षिप्य चञ्चलम्।
प्रविश्यात्मानमात्मज्ञः स्वे ज्ञाने पर्य्यवस्थितः ॥
एतैरविमलं सत्त्वं शुद्ध्युपायैर्विनश्यति।
मृज्यमान इवादर्शस्तैलचैलकरादिभिः ॥
ग्रहाम्बुदरजोधूमनीहारैरसमावृतम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथार्कमण्डलं भाति भाति सत्त्वं यथाऽमलम् ॥
ज्वलत्यात्मनि संरुद्धं तत्सत्त्वं संवृतायते ।
शुद्धः स्थिरप्रसन्नार्चिर्दीपो दीपाशये यथा ॥
शुद्धसत्त्वस्य या शुद्धा सत्या बुद्धिः प्रवर्तते ।
यया भिनत्त्यतिबलं महामोहमयं तमः ॥
सर्वभावस्वभावज्ञो यया भवति निस्पृहः ।
योगं यया साधयते साङ्ख्यः सम्पद्यते यया ॥
यया नोपैत्यहङ्कारं नोपास्ते कारणं यया ।
यया नालम्बते किञ्चित्सर्वं संन्यस्यते यया ॥
याति ब्रह्म यया नित्यमजरं शान्तमव्ययम् ।
विद्यासिद्धिर्मतिर्मेधा प्रज्ञा ज्ञानञ्च सा मता ॥
लोके विततमात्मानं लोकञ्चात्मनि पश्यतः ।
परावरदृशः शान्तिर्ज्ञानमूला न नश्यति ॥
पश्यतः सर्वभावान् हि सर्वावस्थासु सर्वदा ।
ब्रह्मभूतस्य संयोगो न शुद्धस्योपजायते ॥
नात्मनः करणाभावाल्लिङ्गमप्युपलभ्यते ।
स सर्वकरणायोगान्मुक्त इत्यभिधीयते ॥

शुद्धसत्त्वस्य योगादिसाधनपरस्य सर्वँ साधनं सुखाय कल्पते ।

रजस्तमोऽभिभूतमनसस्तु विपरीताहारविहाराभ्यां स्रोतांसि विकृतिमापन्नानि रोगाय भवन्ति । तदुक्तम्—

"अतिप्रवृत्तिः सङ्गो वा शिराणां ग्रन्थयोऽपि वा ।
विमार्गगमनं वापि स्रोतसां दुष्टिलक्षणम् ॥" इति

स्रोतःसु दुष्टेषु वातपित्तश्लेष्मागन्तुकनिमित्ता रोगाः क्षिप्रमभिनिर्वर्त्तन्ते । अनुचिताहारादिना भयरोगादिना च मनस्युपहते बुद्धौ च प्रचलितायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांसि—आवृत्य जनयन्त्युन्मादम्। उन्मादश्च मनोबुद्ध्यादिविभ्रमरूपः। तत्पूर्वरूपञ्च शिरःशून्यत्वादि। उन्मादकारणेभ्य एवापस्मारस्योत्पत्तिः। वस्तुविभ्रमः स्मृतिलोप एव चानयोर्भेदः। प्रभवसमयश्चानयोर्द्वादशपञ्चाशद्वर्षमध्यकालः। पूर्वरूपञ्चापस्मारस्य—

"हृद्व्यथा जृम्भणं सादो वर्ष्मणो मनसोऽपि च।
भवेद्भविष्यति रोगे जयापस्मारसंज्ञके॥" इति

तदेवं शारीरमानसभेदभिन्नाध्यात्मिकाधिदैविकाधिभौतिकत्रिविधोपतापशान्त्युपाया भैषज्यसेवन-कमनीयकामिनीसेवन-मन्त्रौषधिप्रयोग-नीतिशास्त्राभ्यासादयः। (अभेदस्य वास्तवत्वेऽपि भेदप्रतिपादनं बुद्धिमान्द्यादभेदमपश्यतामुपवासाद्वरं भिक्षेति न्यायेन भेदबुद्ध्यापि स्वस्वप्रेमानुसारं सविग्रहोपासने प्रवृत्तय इति तदुपास्त्याऽभेदमेधोदये शालिवृद्धौ कोद्रवत्यागन्यायेन भेदबुद्धित्याग इति)। स्मरोन्मादश्च-विरहावस्थायां वातशुक्रोपस्थविकारात् स्त्रीपुंसयोर्भवति। तेन चाचिन्त्यचिन्तनादिमरणान्तविकारः। तदुक्तम्—

"तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदुष्य।
स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः॥" इति

नर इति प्राणिमात्रोपलक्षणम्। स्रोतांसि चाशितपानादे रसादिशुक्रपर्यन्तं धातोर्धात्वन्तरपरिणाममार्गाः। नहि तैर्विना तथा परिणामः शक्यते भवितुम्। एवं प्राणात्ममनोवहानि स्रोतांसि, येभ्यो मनः सर्वेन्द्रियैर्युज्यते। धमन्य एवासंख्येयाः स्रोतांसीति केचित्, तत्समुदाय एव पुरुष इति च वदन्ति। अस्तु सर्वथा सन्ति स्रोतांसीति। यद्यपि दश दश वातपित्तश्लेष्मवाहिन्यः, सप्त धातुवाहिन्यः, प्राणात्ममनोवाहिन्य एवं नानास्रोतांसि। तथापि योगविभागादिष्टसिद्धिरिति भाष्योक्तदिशा स्वस्वकार्य्यकरणात्सम्यक्शरीरस्थितिरूपेष्टसिद्धिर्भवति। तथा त्वं रूपं गृहाण, त्वं गन्धमिति तत्तदर्थानिर्देशेऽपि चक्षुरादीनि रूपादौ स्वे स्वेऽर्थे प्रवर्त्तन्ते। तदुक्तं महाभाष्ये—"अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति" इति। प्रत्ययाः कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णानि । स्रोतसां सर्वशरीरव्यापनादेव सर्वशरीरेऽन्नरसाप्यायनम् । स्रोतसां दुष्टानां ज्ञानन्तु—प्राणवहानां हृदयं मूलं सशूलसशब्दोच्छ्वसनेन । उदकवहानां तालुमूलं जिह्वादिशोषणपिपासातिवृद्धिभ्याम् । अन्नवहानामामाशयो मूलं वामपार्श्वश्चारोचकादिना । रसवहानां हृदयं मूलम्, मांसवहानां स्नाय्वादि । स्रोतसां "धमन्यो नाड्यो मार्गाः" इत्यादीनि नामानि । प्रदुष्टा—अन्योन्यं दूषयन्ति स्रोतांसि धातवो धातूनिति । दोषाश्च वातपित्तश्लेष्माणो सर्वदूषकाः । कथमेतानि दुष्यन्ति तदुच्यते—

"क्षयात्संधारणाद्रौक्ष्याद्व्यायामात्क्षुधितस्य च ।
प्राणवाहीनि दुष्यन्ति स्रोतांस्यन्यैश्च दारुणैः ॥
औष्ण्यादामाद्भयात्पानादतिशुष्कान्नसेवनात् ।
अम्बुवाहीनि दुष्यन्ति तृष्णायाश्चातिपीडनात् ॥
अतिमात्रस्य चाकाले चाहितस्य च भोजनात् ।
अन्नवाहीनि दुष्यन्ति वैगुण्यात्पावकस्य च ॥
गुरुशीतमतिस्निग्धमतिमात्रं समश्नुताम् ।
रसवाहीनि दुष्यन्ति चिन्त्यानामतिचिन्तनात् ॥
विदाहीन्यन्नपानानि स्निग्धोष्णानि द्रवाणि च ।
रक्तवाहीनि दुष्यन्ति भजतांश्चातपानलौ ॥
अभिस्यन्दीनि भोज्यानि स्थूलानि च गुरूणि च ।
मांसवाहीनि दुष्यन्ति भुक्त्वा च स्वपतां दिवा ॥
अव्यायामाद्दिवास्वापादमेध्यानाञ्च सेवनात् ।
मेदोवहानि दुष्यन्ति वारुण्याश्चातिसेवनात् ॥
व्यायामादतिसंक्षोभादस्थ्नामतिविघट्टनात् ।
अस्थिवाहीनि दुष्यन्ति वातलानाञ्च सेवनात् ॥
उत्पेषादत्यभिस्यन्दादभिघातात्प्रपीडनात् ।
मज्जवाहीनि दुष्यन्ति विरुद्धानाञ्च सेवनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकालयोनिगमनान्निग्रहादतिमैथुनात् ।
शुक्रवाहीनि दुष्यन्ति शस्त्रक्षाराग्निभिस्तथा ॥
मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात् ।
मूत्रवाहीनि दुष्यन्ति क्षीणस्यातिकृशस्य च ॥
विधारणादत्यशनादजीर्णाध्यशनात्तथा ।
वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च ॥
व्यायामादतिसंक्षोभाच्छीतोष्णक्रमसेवनात् ।
स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा ॥
आहारश्च विहारश्च यः स्याद्दोषगुणैः समः ।
धातुभिर्विगुणश्चापि स्रोतसां सप्त दूषकाः ॥
अतिप्रवृत्तिः संगो वा शिराणां ग्रन्थयोऽपि वा ।
विमार्गगमनश्चापि स्रोतसां दुष्टिलक्षणम् ॥" इति

स्रोतांसि, दोषाः, धातवः, मलप्रसादरूपाणि हिताहितसेवनादिभिः कर्णादिमलान् प्रसादाँश्च जनयन्ति नैरुज्यरोगप्रस्थाणि शुभाशुभाभ्यां कल्पन्ते । क्वचित्कालादिविशेषवशाद्धिताहितविपर्य्यय इति विस्तरेण प्रतिपादितमात्रेयाग्निवेशसम्वादे सुश्रुते चरके च । तदुक्तम्—"सन्ति हि ऋतेप्यहिताहारोपयोगादन्या रोगप्रकृतयः" इति । तद्यथा—कालविपर्य्ययः प्रज्ञापराधः परिणामः, असात्म्यश्च शब्दादि इति । अशितपीतादि पाकनिमित्ताश्च पञ्चभूतोष्माणः । तदुक्तम्—

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सतामसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्ति हि ॥" इति

देशकालकृताश्च दोषगुणा वस्तूनां भवन्ति । यथा व्रीहिः पित्तकर्त्तृत्वेनापथ्योऽनूपदेशगतश्च, धन्वदेशे हीनबलः, शरत्काले वलवान् । एवमन्यत्र । रोगश्च मज्जादिशरीरदेशविशेषगतोऽसाध्यो भवति । ते च प्रकुपितवातादिना—अश्रद्धादिकराः । तदुक्तम्—

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अश्रद्धा चारुचिरास्यवैरस्यमरसज्ञता ।
अङ्गमर्दो ज्वरस्तन्द्रा हृल्लासो गौरवं तमः ॥" इति

रोगा रसदोषजाः-"पाण्डुत्वं स्रोतसां रोधः क्लैव्यं सादः कृशाङ्गता ।
नाशोऽग्नेरयथाकालं वलयः पलितानि च ॥"इति

रक्तदोषजाः—"कुष्ठवीसर्पविडका रक्तपित्तमसृग्दरः ।
गुदमेढ्रास्यपाकश्च स्नीहा गुल्मोऽथ विद्रधिः ॥
नीलिका कामला व्यङ्गं पिप्लवस्तिलकालकाः ।
दद्रुश्चर्मदलं श्वित्रं पामा कोठास्त्रमण्डलम् ॥"इति

मांसदोषाः—"अधिमांसार्वुदं कीलगलशालुकशुण्डिकाः ।
पूतिमांसालजीगण्डगण्डमालोपजिह्विकाः ॥" इति

मेदःसंश्रयाः—"मांसप्रदोषजान् विद्याद्रोगान् मेदःप्रदोषजान् ।
निन्दितानि प्रमेहाणां पूर्वरूपाणि यानि च ॥"इति

अस्थिजाः—"अध्यस्थि दन्तदन्तास्थि मेदःशूलं विवर्णता ।
केशलोमनखश्मश्रुदोषाश्चास्थिप्रकोपजाः ॥"इति

मज्जगताः—"रुक् पर्वणां भ्रमो मूर्च्छा दर्शनं तमसो मताः ।
अरुषां स्थूलमूलानां पर्वजानाञ्च दर्शनम् ॥" इति

शुक्रजाः—"शुक्रस्य दोषाज्जायन्ते रोगाः क्लैव्यमहर्षणम् ।
रोगिणां दैन्यमल्पायुर्वैरूप्यश्च प्रजायते ॥
न वा संजायते गर्भः पतति प्रसवत्यपि ।
दुष्टं हि शुक्रं सापत्यं सदारं बाधते नरम् ॥" इति

इन्द्रियगताः—

"इन्द्रियाणि समाश्रित्य प्रदुष्यन्ति यदा मलाः ।
उपघातोपतापाभ्यां यो जयन्तीन्द्रियाणि ते ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नाय्वादिगताः—

"स्नायुशिराकण्डराभ्यां दुष्टाः क्लिश्नन्ति मानुषम् ।
स्तम्भसङ्कोचखल्लीभिर्ग्रन्थिस्फुरणसुप्तिभिः ॥
मलानाश्रित्य कुपिता भेदशोषप्रदूषणम् ।
दोषा मलानां कुर्वन्ति सङ्गोत्सर्गावतीव च ॥" इति

एतेषां प्राप्तिपरिहारोपायाः—

"विविधादशितात्पीतादहिताल्लीढ़खादितात् ।
भवन्त्येते मनुष्याणां विकारा ये उदाहृताः॥
तेषामिच्छन्ननुत्पत्तिं सेवेत मतिमान् सदा ।
हितान्येवाहितादीनि नस्युस्तज्जास्तदामयाः ॥
रसजानां विकाराणां सर्वं लङ्घनमौषधम् ।
विधिशोणितकेऽध्याये रक्तजानां भिषज्जितम् ॥
मांसजानान्तु संशुद्धिः शस्त्रक्षाराग्निकर्म च ।
अष्टौ निन्दितकेऽध्याये मेदोजानां चिकित्सिते॥
अस्थ्याश्रयाणां व्याधीनां पञ्चकर्माणि भेषजम् ।
वस्तयः क्षीरसर्पींषि तिक्तकोपहितानि च ॥
मज्जशुक्रसमुत्थानामौषधं स्वादु तिक्तकम् ।
अन्नं व्यवायव्यायामौ शुद्धिकाले च मात्रया ॥
शान्तिरिन्द्रियजानान्तु त्रिमर्मीये प्रवक्ष्यते ।
तान्वादिजानां प्रशमो वक्ष्यते वातरोगिके ॥
व्यायामादुष्मणस्तैक्ष्ण्याद्धितस्यानवधारणात् ।
कोष्ठाच्छाखामला यान्ति द्रुतत्वान्मारुतस्य च ॥
तत्रस्थाश्च विलम्बन्ते कदाचिन्न समीरिताः ।
नादेशकाले कुप्यन्ति भूयो हेतुप्रतीक्षिणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृद्ध्याभिष्यन्दनात्पाकाच्छ्रोतोमुखविशोधनात् ।
शाखां मुक्त्वा मलः कोष्ठं याति वायोश्च निर्गतात् ॥
सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ।
सुखं नास्ति विना धर्म्मात्तस्माद्धर्म्मपरो भवेत् ॥

ज्ञानाज्ञानविशेषात्तु मार्गामार्गप्रवृत्तयः ।
हितमेवानुरुन्धन्ते प्रपरीक्ष्य परीक्षकाः ॥
रजोमोहावृतात्मानः प्रियमेव तु लौकिकाः ।
श्रुतं बुद्धिः स्मृतिर्दार्ढ्यं धृतिर्हितनिषेवणम् ॥

वाग्विशुद्धिः शमो धैर्यमाश्रयन्ति परीक्षकम् ।
लौकिकं नाश्रयन्त्येते गुणमोहतमश्रितम् ॥
तन्मूला वहुलाश्चैव रोगाः शारीरमानसाः ।
प्रज्ञापराधादहितानर्थान् पश्च निषेवते ॥

सन्धारयति वेगाँश्च सेवते साहसानि च ।
तदात्वसुखसंज्ञेष्वभावेष्वज्ञोऽनुरज्यते ॥
रज्यते न तु विज्ञात्मा विज्ञाने ह्यमलीकृते ।
न रागान्नाप्यविज्ञानादाहारमुपयोजयेत् ॥

परीक्ष्य हितमश्नीयादेही ह्याहारसम्भवः ।
शुभाशुभसमुत्पत्तौ तान्परीक्ष्योपयोजयेत् ॥
परिहार्य्याण्यपथ्यानि सदा परिहरन्नरः ।
भवत्यनृणतां प्राप्तः साधूनामिह पण्डितः ॥

यत्तु रोगसमुत्थानमशक्यमिह केनचित् ।
परिहर्त्तुं न तत्प्राप्य शोचितव्यं मनीषिणा ॥

आहारसम्भवं वस्तु रोगाश्चाहारसम्भवाः ।
हिताहितविशेषाश्च विशेषः सुखदुःखयोः ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणरक्षार्थं सर्वप्रवृत्तेः प्राणवहा नाड्यो दश। तदुक्तम्—

"अर्थे दश महामूलाः समासक्ता महाफलाः।
महच्चार्थश्च हृदयं पर्य्यायैरुच्यते बुधैः॥" इति

हृदयस्था दशप्राणधमन्यो महदोजःफला महाफलाः, दशेन्द्रियपञ्चार्थपञ्चमहाभूतोपाधिमान् भूमात्मा चतुर्विधः, विश्वतैजसप्राज्ञतुरीयभेदात्। बाह्यप्रज्ञो जागरितस्थान आद्यः, अन्तःप्रज्ञः स्वप्नस्थानस्तैजसः, सुषुप्तिस्थानश्चेतोमुखः प्राज्ञः, सर्वोपाधिमतीतस्तुरीयः। इन्द्रियाणि स्वाश्रयाश्रितानि। आत्मा अनाश्रयः। मनश्च तदाश्रयं हृदयाश्रितम्। हृदयं द्व्यङ्गुलम्। मनश्चिन्तितं वाचा वदति कर्म्मणा करोति च। मनसः उपघातान्मरणं भवति। किन्तन्मरणं तदुच्यते प्रश्नोत्तररूपेण। तदुक्तम्—

"मरणं मे समासेन कथयेन्दुसमानने।
किं सुखं मरणं किं वा दुःखं मृत्वा च किम्भवेत्॥
त्रिविधाः पुरुषाः सन्ति देहस्यान्ते मुमूर्षवः।
मूर्खोऽथ धारणाभ्यासी युक्तिमान् पुरुषस्तथा॥
अभ्यस्य धारणानिष्ठो देहं त्यक्त्वा यथासुखम्।
प्रयाति धारणाभ्यासी युक्तियुक्तस्तथैव च॥
धारणा यस्य नाभ्यासं प्राप्ता नैव च युक्तिमान्।
मूर्खः स्वमृतिकालेऽसौ दुःखमेत्यवशाशयः॥
वासनावेशवैवश्यं भावयन् विषयाशयः।
दीनतां परमामेति परिलूनमिवाम्बुजम्॥
अशास्त्रसंस्कृतमतिरसज्जनपरायणः।
मृतिमनुभवत्यन्तर्दाहमग्नाविव च्युतः॥
यदा घर्घरकण्ठत्वं वैरूप्यं दृष्टिवर्णजम्।
गच्छत्येषोऽविवेकात्मा तदा भवति दीनधीः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमान्ध्यमनालोको दिवाप्युदिततारकः ।
साभ्रदिङ्मण्डलाभोगोद्यतमेचकिताम्बरः ॥
मर्मव्यथाविच्छुरितः सम्भ्रमद्दृष्टिमण्डलः ।
आकाशीभूतवसुधो वसुधाभूतखात्परः ॥

परिवृत्तककुप्चक्र उह्यमान इवार्णवे ।
नीयमान इवाकाशे घननिद्रो सुखाशयः ॥
व्यथां विमोहं मूर्च्छान्तं भ्रमव्याधिमचेतनम् ।
किमर्थमयमायाति देहो ह्यष्टाङ्गवानिति ॥

यदा व्यथावशान्नाड्यः स्वसङ्कोचविकाशनैः ।
गृह्णन्ति मारुतो देहे तदोज्झति निजां स्थितिम् ॥
प्रविष्टा न विनिर्यान्ति गताः सम्प्रविशन्ति नो ।
यदा वाता विनाड़ीत्वात्तदा स्पन्दात्स्मृतिर्भवेत् ॥

न विशत्येव वातो न निर्याति पवनो यदा ।
शरीरनाडीवैधुर्य्यान्मृत इत्युच्यते तदा ॥
अगन्तव्यो मया नाशः कालेनैतावतेति या ।
पूर्वसम्विदिता सम्वित् याति तच्चोदिता मृतिम् ॥

ईदृशेन मयेहेत्थं भाव्यमित्यादिस्वर्गजा ।
सम्विद्वीजकला नाशं न कदाचन गच्छति ॥
सम्विदो वेदनं नाम स्वभावो व्यतिरेकवान् ।
तस्मात्स्वभावसम्वित्तेर्नान्ये मरणजन्मनी ॥

क्वचिदावृत्तिमत्सौम्यं क्वचिन्नद्यां जलं यथा ।
क्वचित्सौम्यं क्वचिज्जीवधर्मेदं चेतनं तथा ॥
यथा लतायाः पर्वाणि दीर्घामध्यममध्यतः ।
तथा चेतनसत्ताया जन्मानि मरणानि च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न जायते न म्रियते चेतनः पुरुषः क्वचित् ।
स्वप्नसम्भ्रमवद्भ्रान्तमेतत्पश्यति केवलम् ॥
पुरुषश्चेतनामात्रं स कदा क्वेव नश्यति ।
चेतनव्यतिरिक्तत्वे वदान्यत् किं पुमान् भवेत् ॥
कोऽन्यद्यावन्मृतं ब्रूहि चेतनं कस्य किं कथम् ।
म्रियन्ते देहलक्ष्याणि चेतनं स्थितमक्षयम् ॥" इति

अनिष्टप्रसज्जनेनापि चेतनमरणं वारयति—प्रतिदेहं चेतनभेदे मानाभावात् । 'एको देवः सर्वभूतेषु गूढः' इत्यादिश्रुतेश्चैकस्मिन् चेतने मृते सति तदधीनसत्तास्फूर्त्तिकं समष्टिव्यष्टिचित्रं नामरिष्यद्धै । वै शब्दः काकौ, तस्मिंश्च मृते सति निरुपादानजगत्सत्ताऽयोगादेकमृतौ सर्वभावमृतिदोषो नाऽभविष्यत्किमिति ?

"अमरिष्यन्न वै चित्तमेकस्मिन्नेव तन्मृते ।
अभविष्यत्सर्वभावमृतिरेकमृताविह ॥
वासनामात्रवैचित्र्यं यज्जीवोऽनुभवेत्स्वयम् ।
तस्यैव जीवमरणे नामनी परिकल्पिते ॥
एवं न कश्चिन्म्रियते जायते न च कश्चन ।
वासनावर्त्तगर्त्तेषु जीवो लुठति केवलम् ॥
अत्यन्तासम्भवादेव दृश्यस्याशौचवासना ।
नास्त्येवेति विचारेण दृढज्ञानेन नश्यति ॥" इति

प्रश्नः—"यथैव जन्तुर्म्रियते जायते च तथा पुनः ।
तन्मे कथय देवेशि ! पुनर्बोधविवृद्धये ॥" इति

उत्तरम्—"नाडीप्रवाहे विधुरे यदा वातं विसंस्थितम् ।
जन्तुः प्राप्नोति तदा शाम्यतीवास्य चेतना ॥
शुद्धं हि चेतनं नित्यं नोदेति न च शाम्यति ।
स्थावरे जङ्गमे व्योम्नि शैलेऽग्नौ पवने स्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केवलं वातसंरोधाद्यदा स्पन्दः प्रशाम्यति ।
मृत इत्युच्यते देहस्तदाऽसौ जड़नामकः ॥
तस्मिन् देहे शवीभूते वाते निर्वाततां गते ।
चेतनं वासनामुक्तं स्वात्मतत्त्वेऽवतिष्ठते ॥
ततोऽसौ प्रेतशब्देन प्रोच्यते व्यवहारिभिः ।
चेतनं वासनामिश्रमामोदानिलवत्स्थितम् ॥
इदं दृश्यं परित्यज्य यदास्ते दर्शनान्तरे ।
स स्वप्न इव सङ्कल्प इव नानाकृतिस्तदा ॥
तस्मिन्नेव प्रदेशेऽन्तःपूर्ववत्स्मृतिमान् भवेत् ।
तदेव मृतिमूर्च्छान्ते पश्यत्यन्यशरीरकम् ॥
भवन्ति षड्विधाः प्रेतास्तेषाम्भेदमिमं शृणु ।
सामान्यपापिनो मध्यपापिनः स्थूलपापिनः ॥
सामान्यधर्म्मा मध्यमधर्म्मा चोत्तमधर्म्मवान् ।
एतेषां कस्यचिद्भेदो द्वौ त्रयोऽप्यथ कस्यचित् ॥
कश्चिन्महापातकवान् वत्सरं स्मृतिमूर्च्छनम् ।
विमूढ़ो नु भवत्यन्तःपाषाणहृदयोपमः ॥
ततः कालेन सम्बद्धो वासनाजठरोदितम् ।
अनुभूय चिरं कालं नारकं दुःखमक्षयम् ॥
भुक्त्वा योनिशतान्युच्चैर्दुःखाद्दुःखान्तरं गतः ।
कदाचिच्छ्रममायाति संसारस्वप्नसम्भ्रमे ॥
अथवा मृतिमोहान्ते जडदुःखशताकुलाम् ।
क्षणाद्वृक्षतादितामेव हृत्स्थामनुभवन्ति ते ॥
स्ववासनानुरूपाणि दुःखानि नरकेषु च ।
अनुभूयानुयोनिषु जायन्ते भूतले चिरात् ॥
अथ मध्यमपापो यो मृतिमोहादनन्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स शिलाजठरं जाड्यं कश्चित्कालं प्रपश्यति ॥
ततः प्रबुद्धः कालेन केनचिद्वा तदैव वा ।
तिर्य्यगादिक्रमैर्भुक्त्वा योनिं संसारमेष्यति ॥
मृत एवानुभवति कश्चित्सामान्यपातकी ।
स्ववासनानुसारेण देहं सम्पन्नमक्षतम् ॥
स स्वप्न इव सङ्कल्प इव चेतति तादृशम् ।
तस्मिन्नेव क्षणे तस्य स्मृतिरित्थमुदेति च ॥
ये तूत्तममहापुण्या मृतिमोहादनन्तरम् ।
ते व्योमवायुवलिताः प्रयान्त्योषधिपल्लवम् ॥
तत्र चारुफलं भुक्त्वा प्रविश्य हृदयं नृणाम् ।
रेतसामधितिष्ठन्ति गर्भं यान्ति क्रमोचिते ॥
स्ववासनानुसारेण प्रेता एता व्यवस्थिताः ।
मूर्च्छान्तेऽनुभवन्त्यन्तःक्रमेणैवाक्रमेण च ॥
आदौ मृता वयमिति बुद्ध्यन्ते तदनुक्रमात् ।
वन्धुपीडादिदानेन प्रोत्पन्ना इति वेदिनः ॥
ततो यमभटा एते कालपाशान्विता इति ।
नीयमानाः प्रपद्यैभिः क्रमाद्यमपुरं त्विति ॥
उद्यानानि विमानानि शोभनानि पुनः पुनः ।
स्वकर्मभिरुपात्तानि दिव्यानीत्येव पुण्यवान् ॥
हिमानि कण्टकश्वभ्रशस्त्रीपत्रवनानि च ।
स्वकर्म्मदुःकृतोत्थानि सम्प्राप्तानीति पापवान् ॥
इयं मे सौम्य संजाता सरणिः शीतशाद्वला ।
स्निग्धच्छाया सवापिका पुरःसंस्थेति मध्यमः ॥
अयं प्राप्तो यमपुरमहमेष स भूतपः ।
अयं कर्मविचारोऽत्र कृत इत्यनुभूतिमान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रत्येकमभ्येति पृथुः संसारखण्डकः ।
यथासंस्थितनिःशेषपदार्थाः चारुभासुराः ॥
आकाश इव निःशून्ये शून्यात्मैव विबोधनात् ।
देशकालक्रियादैर्घ्यभासुरोऽपि न किञ्चन ॥
इतोऽयमहमादिष्टः स्वकर्म्मफलभोजने ।
गच्छाम्याशु शुभं स्वर्गमितो नरकमेव च ॥
यः स्वर्गोऽयं मया भुक्तो भुक्तोऽयं नरकोऽथ वा ।
इमास्ता योनयो भूत्वा जायेऽहं संसृतौ पुनः ॥
अयं शालिरहं जातः क्रमात्फलमहं स्थितः ।
इत्युदर्कप्रबोधेन बुद्ध्यमानो भविष्यति ॥
सगर्भो जायते लोके पूर्वकर्म्मानुसारतः ।
भव्यो भवत्यभव्यो वा बालको ललिताकृतिः ॥
ततोऽनुभवतीन्द्राभं यौवनं मदनोन्मुखम् ।
ततो जरां पद्ममुखहिमाशानमिव च्युतम् ॥
पुनः स्वप्नवदायातं पिण्डैर्देहपरिग्रहम् ।
याम्यं याति पुनर्लोकं पुनरेव भवाक्रमम् ॥
भूयो भूयोऽनुभवति नाना योन्यन्तरोदरे ।
गतोऽपि व्याधिमरणं पुनर्मरणमूर्च्छनम् ॥
इत्थं जवं जवीभावमामोत्तमतिभासुरम् ।
भूयो भूयोऽनुभवति व्योम्न्येव व्योमरूपवान् ॥
परमार्थघनं शैलाः परमार्थघनं द्रुमाः ।
परमार्थघनं पृथ्वी परमार्थघनं नभः ॥
सर्वात्मकत्वात् स यतो यथोदेति चिदीश्वरः ।
परमाकाशशुद्धात्मा तत्र तत्र भवेत्तथा ॥
सर्गादौ स्वप्नपुरुषन्यायेनादिप्रजापतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा स्फुटं प्रकथितस्तथाऽद्यापि स्थिता स्थितिः ॥
प्रथमोऽसौ प्रतिस्पन्दः पदार्थानां हि बिम्बकम् ।
प्रतिबिम्बितमेतस्माद्यत्तदद्यापि संस्थितम् ॥
यन्नाम सुपरिस्थानं देहस्यान्तर्गतोऽनिलः ।
करोत्यङ्गपरिस्पन्दं जीव इत्युच्यते ततः ॥
सर्गादावेव येनैषा जङ्गमेषु स्थिता स्थितिः ।
सचेतनाश्च निष्पन्दास्तेनैते पादपादयः ॥
चिदाकाशोऽयमेवांशं कुरुते चेतनोदितम् ।
स एव सम्विद्भवति शेषम्भवति नैव तत् ॥" इति

आत्मा प्रथमं बुद्ध्यादिलिङ्गशरीरं तद्द्वारकं स्थूलशरीरं द्वितीयमनुप्रविश्य चेतयतु, किं बुद्धिवृत्तिद्वारकल्पनयेति तु न सत्,—चिदध्यस्तत्वेन चित्त्वे पाषाणादेरपि चैतन्यप्रसङ्गात् । तस्माद्बुद्धेरेवैष स्वभावो यद्वृत्त्या पुरुषस्यानुभवाय भवति । जगत्तु न परमार्थसत् किन्तु ईश्वरस्याऽविद्ययाऽतात्त्विकाऽन्यथाभावरूपो विवर्त्तः । ईश्वरस्य सर्वार्थप्रतिभासेऽपि स्वरूपाप्रच्युतिलक्षणबोधबाधितत्वादत्रासत्यता । भवन्ति चात्र—

"नरोपाधिपुरं प्राप्तं चेतत्यग्निपुरं नयत् ।
न तस्य नाग्नि चिज्जीवं नो जीवत्येष सर्गगः ॥
यथा खं खं तथा भूमिर्भूमितो नाम्बुवज्जलम् ।
यद्यथा चेतति स्वैरं तद्वेत्त्येव तथा वपुः ॥
इति सर्वशरीरेण जङ्गमत्वेन जङ्गमम् ।
स्थावरं स्थावरत्वेन सर्वात्मा भावयन् स्थितः ॥
तस्माद्यज्जङ्गमं नाम तत्स्वबोधनरूपवत् ।
तेन बुद्धं ततस्तद्वत्तदेवाद्यापि संस्थितम् ॥
यद्वत्ताभिधमाबुद्धं स्थावरत्वेन वै पुनः ।
जड़मद्यापि संसिद्धं शिलातरुतृणादि च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तु जाड्यं पृथक्किञ्चिदस्ति नापि च चेतनम् ।
नास्ति भेदोऽत्र सर्गादौ सत्तासामान्यकेऽपि च ॥
वृत्ताणामुपलानां वा नामान्तःस्था स्वसंविदः ।
बुद्ध्यादिविहितान्येव तानि तेषामिति स्थितिः ॥
कृमिकीटपतङ्गानां या नामान्तःस्वसम्विदः ।
तान्येव तासां बुद्ध्यादीन्यभिन्नाऽर्थानि कानिचित् ॥
यथोत्तराब्धिजनता दक्षिणाब्धिजनस्थितिम् ।
न किञ्चिदपि जानाति निजसम्वेदनादृते ॥
स्वसंज्ञानुभवे लीनास्तथा स्थावरजङ्गमाः ।
परस्परं यदा सर्वे स्वसङ्केतपरायणाः ॥
यथा शिलान्तःसंस्थानां वहिष्ठानाञ्च वेदनम् ।
असज्जडञ्च भेकानां मिथोऽन्तस्तस्थुषां तथा ॥
सर्वं सर्वगतं चित्तं चिद्व्योम्ना यत्प्रचेतितम् ।
सर्गादौ स्पन्दनो वायुः स इहाद्यापि संस्थितः ॥
चेतितं यत्तु सौखिर्य्यं तन्नभस्तत्र मारुतः ।
स्पन्दात्मेत्यादिसर्गेहाः पदार्थेष्विव संस्थिताः ॥
चित्तन्तु परमार्थेन स्थावरे जङ्गमे स्थितम् ।
चोपनान्यनिलैरेव भवन्ति न भवन्ति च ॥
एवं भ्रान्तिमये विश्वे पदार्थाः संविदंशवः ।
सर्गादिषु यथैवासँस्तथैवाद्यापि संस्थिताः ॥
यथा विश्वपदार्थानां स्वभावस्य विजृम्भितम् ।
असत्यमेव सत्याभं तदेतत्कथितन्तव ॥
नरो यथैकदेशस्थो दूरदेशान्तरस्थितम् ।
संपश्यति निधानं स्वं मनसाऽनारतं सदा ॥
भ्रान्तिमात्रमसङ्ख्येयं जगज्जीवकणोदरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वटधानातरुमिव स्थितं को वा नु पश्यति ॥
यथा जीवद्वपुर्बीजमङ्कुरं हृदि पश्यति ।
स्वभावभूतं चिदणुस्त्रैलोक्यनिचयं तथा ॥
यथा स्ववासनान्तःस्थमभीष्टं परिपश्यति ।
जीवो याति शताढ्योऽपि भ्रमे परिगतोऽपि सन् ॥" इति

श्राद्धे प्रश्नः—

"भगवत्पिण्डदानादिवासनारहिता कृतिः ।
कीदृक् सम्पद्यते जीवः पिण्डो यस्मै न दीयते ॥" १ इति

उत्तरम्—

"पिण्डोऽथ दीयते मा वा पिण्डो दत्तो ममेति चेत् ।
वासना हृदि संरूढा तत्पिण्डफलभाङ्नरः ॥
यच्चित्तं तन्मयो जन्तुर्भवतीत्यनुभूतयः ।
सदेहेषु विदेहेषु न भवन्त्यन्यथा क्वचित् ॥
सपिण्डोऽस्मीति संवित्त्या निष्पिण्डोऽपि सपिण्डवान् ।
निष्पिण्डोऽस्मीति संवित्त्या सपिण्डोऽपि न पिण्डवान् ॥
यथा भावनमेतेषां पदार्थानां हि सत्यता ।
भावना च पदार्थेभ्यः कारणेभ्य उदेति हि ॥
यथा वासनया जन्तोर्विषमप्यमृतायते ।
असत्यः सत्यतामेति पदार्थो भावनात्तथा ॥
कारणेन विनोदेति न कदाचन कस्यचित् ।
भावना काचिदपि नो इति निश्चयवान्भव ॥" इति

प्रश्नः—

"देशकालादिना ब्रह्मन् वासना समुदेति चेत् ।
तन्महाकल्पसर्गादौ देशकालादयः कुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणे समुदेतीदं तैस्तदा सहकारिभिः ।
सहकारिकारणानामभावे वासना कुतः" ॥ १ इति

उत्तरम्—

"एवमेतन्महाबाहो ! सत्यात्मन्न कदाचन ।
महाप्रलयसर्गादौ देशकालौ न कौचन ॥
उदेत्यसत्यमेवाशु तथा सत्यं विलीयते ।
भ्रान्तिर्भ्रमवतो रज्ज्वामपि सर्पभ्रमे गते ॥
समस्तस्याप्रबुद्धस्य मनोजातस्य कस्यचित् ।
बीजं विना मृषैवेयं मिथ्यारूढ़िमुपागता ॥
स्वप्नोपलम्भं स्वर्गाख्यं स सर्वोऽनुभवन् स्थितः ।
चिरमावृत्तदेहात्मा भूचक्रभ्रमणं यथा ॥" इति

प्रश्नः—

"ब्रह्मन् लोकैः पुरस्थस्य गच्छतो योगिनो निजाम् ।
आतिवाहिकतां देहः कीदृशोऽयं विलोक्यते ॥" इति

उत्तरम्—

"देहाद्देहान्तरप्राप्तिः पूर्वदेहं विना सदा ।
आतिवाहिकदेहेऽस्मिन् स्वप्नेष्विव विनश्वरी ॥" इति

योगिनां द्विविधं मरणम्—एकं प्रारब्धभोगाय नानादेहकल्पनम्, अपरं विदेहकैवल्यम् । आद्ये देहाद्देहान्तरं स्वाप्निकदेहान्तरमिव विनश्वरमिति तत्त्वम् । भवन्ति चात्र—

"यथातपे हिमकणः शरद्व्योम्नि स्थितोऽम्बुदः ।
दृश्यमानोऽप्यदृश्यत्वमित्येवं योगिदेहकः ॥
द्रागित्येवाथवा कश्चिद्योगिदेहो न लक्ष्यते ।
योगिभिश्च पुरो वेगात् प्रोड्डीन इव खे खगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्ववासनाभ्रमेणैव क्वचित्केचित्कदाचन ।
मृतोऽयमिति पश्यन्ति केचित्तद्गतमानसाः ॥
भ्रान्तिमात्रन्तु देहात्मा तेषां तदुपशाम्यति ।
सत्यबोधेन रज्जूनां सर्पबुद्धिरिवात्मनि ॥
को देहः कस्य वा सत्ता कस्य नाशः कथं कुतः ।
स्थितं तदेव यदभूदबोधः केवलं गतः ॥
सन्देहः क इवात्रैषां पशवो ह्यविवेकिनः ।
यथा दृष्टं विचेष्टन्ते कुत एषां विचारणा ॥
यथा स्वप्नस्तथा जाग्रदिदं नास्त्यत्र संशयः ।
स्वप्ने पुरमसद्भाति सर्गादौ भात्यसज्जगत् ॥
झटित्येव यथाकाशं भवति स्वप्नपर्वतः ।
क्रमेण वा तथा बोधे खं भवत्याधिभौतिकम् ॥
उड्डीनोऽयं मृतो वेति पश्यन्ति निकटस्थिताः ।
मिथ्यादृष्टय एवेमाः सृष्टयो मोहदृष्टयः ॥
मायामात्रदृशो भ्रान्तिः शून्याः स्वप्नानुभूतयः ॥

स्वप्नानुभूतय इमा मरणान्तबोधे भ्रान्त्येतरभ्रमदृशः स्फुटसर्गभासः ।
भ्रान्त्यातिवाहिकशरीरगताःसमस्ता मिथ्योदिता मृगनदीशरणक्रमेण
अहन्त्वमित्यादिजगत्स्वरूपा विशुद्धबोधैकविभा विभाति ।
आकाशकोशे निजशून्यतैव द्वैतैक्यसङ्कल्पविकल्पनाच्च ॥" इति

प्रश्नः—

"अहं जगदिति भ्रान्तिः परस्मात्कारणं विना ।
यथोदेति तथा ब्रह्मन् भूयः कथय साधु मे ॥" इति

उत्तरम्—

"समस्ताः समतैवान्ताः संविदो बुध्यते यतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वथा सर्वदा सर्वं सर्वात्मकमिदं जगत् ॥
सर्वा हि सर्वार्थदृशो ब्रह्मैवेमाः पृथङ् न तत् ।
सर्वाऽथ शब्दार्थकला रूपमासां न विद्यते ॥
कटकत्वं पृथग्हेम्नस्तरङ्गत्वं पृथग्जलात् ।
यथा न सम्भवत्येवं न जगत्पृथगीश्वरात् ॥
एष एव जगद्रूपं जगद्रूपन्तु नेश्वरे ।
हेमैव कटकादित्वं कटकत्वं न हेमनि ॥
यथाऽवयविनो रूपमनेकाऽवयवात्मकम् ।
तथा नवयवत्वात्तु चितः सर्वात्मकं जगत् ॥
यत्तुल्यकालमखिलं तन्मात्रावेदनं परे ।
अन्तःस्थं तदिदं भाति जगदित्यहमित्यपि ॥
लेखौघानां यथा भेदः सन्निवेशशिलोदरे ।
तथाऽनन्यजगद्देहं चेत्यन्तश्चिद्घने घनम् ॥
स्थितास्तरङ्गाः सलिले यथान्तरतरङ्गिते ।
सृष्टिशब्दार्थरहितास्तथान्तःसृष्टयः परे ॥
न सर्गे तिष्ठति परं सर्गस्तिष्ठति नो परे ।
अवयवावयविवत्सत्ता नावयवैस्तयोः ॥
यथैतत्सरणं वायौ तथा सर्गः स्थितः परे ।
असत्कल्पेऽपि सत्कल्पः सत्येऽसत्य इवापि च ॥
अन्यरूपा यथानन्या तेजस्यालातकोदरे ।
तथा ब्रह्मणि विश्वश्रीः सत्याऽसत्यात्मिका चितिः ॥
अनुकीर्णा यथा पङ्के पुत्रिका चाथ दारुणि ।
यथा वर्णा मषीकल्के तथा सर्गाः स्थिताः परे ॥
अनन्यान्येव कचति ब्रह्मतत्त्वमरुस्थले ।
असत्यात्मनि सत्यैव त्रिजगन्मृगतृष्णिका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मणा चिन्मयेनात्मा सर्गात्मैव विभाव्यते ।
न भाव्यते चानन्यत्वाद्बीजेनान्तरितद्रुमः ॥
यथा क्षीरस्य माधुर्य्यं तीक्ष्णत्वं मरिचस्य च ।
द्रवत्वं पयसश्चैव स्पन्दनं पवनस्य च ॥
स्थितोऽनन्यो यथाऽन्यः सन्नास्ति तत्र तथात्मनि ।
सर्गो निर्मलचिद्रूपः परमात्मात्मरूपभृत् ॥
वासना चित्तजीवादिवेदनं वेदनोदितम् ।
नोदेत्यवेदनादेव परस्मादेव पौरुषात् ॥
योऽयं सर्वगतो देवः परमात्मा महेश्वरः ।
स्वच्छस्वानुभवानन्दस्वरूपोऽन्तादिवर्ज्जितः ॥
एतस्मात्परमानन्दच्छुद्धचिन्मात्ररूपिणः ।
जीवः सञ्जायते पूर्वं सचित्तं चित्ततो जगत् ॥
तत्रेमाः परमादेशे चिद्व्योम्न्यनुभवात्मिकाः ।
असङ्ख्याः प्रतिबिम्बन्ति जगज्जातपरम्पराः ॥
ब्रह्मणः स्फुरणं किञ्चित्पद्यवाताम्बुधेरिव ।
दीपस्येवाप्यवातस्य तं जीवं विद्धि मानद ॥
शान्तत्वोपगमेच्छस्य मनाक् संवेदनात्मकम् ।
स्वाभाविकं यत्स्फुरणं चिद्व्योम्नः सोऽङ्ग जीवकः ॥
यथा वातस्य चलनं कृशानोरुष्णता यथा ।
शीतात्मता तुषारस्य तथा जीवत्वमात्मनः ॥
चिद्रूपस्यात्मतत्त्वस्य स्वभाववशतः स्वयम् ।
मनाक् संवेदनमिव यत्तज्जीव इति स्मृतम् ॥
जीवोऽहंकृतिमादत्ते सङ्कल्पकलयेद्धया ।
स्वैतयापघनतया नीलिमानमिवाम्बरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहं भावो हि दिक्कालव्यवच्छेदीकृताकृतिः ।
स्वयं सङ्कल्पवशतो वातस्पन्द इव स्फुरन् ॥
सङ्कल्पोन्मुखतां यातस्त्वहङ्काराभिधः स्थितः ।
चित्तं जीवो मनो माया प्रकृतिश्चेति नामभिः ॥
तत्सङ्कल्पात्मकं चेतो भूततन्मात्रकल्पनम् ।
कुर्वन् ततो व्रजत्येव सङ्कल्पाद्याति पञ्चताम् ॥
तन्मात्रापञ्चकाकारं चितस्तेजःकणो भवेत् ।
अजातजगति व्योम्नि तारकाः पेलवा यथा ॥
तेजः कणत्वमादत्ते चित्तं तन्मात्रकल्पनात् ।
शनैः स्वस्मात्परिस्पन्दाद्बीजमङ्कुरतामिव ॥
असौ तेजःकणोऽण्डाख्यः कल्पनात्कश्चिदण्डताम् ।
प्रयात्यन्तःस्फुरद्ब्रह्मा सङ्कल्पात्पिण्डतामिव ॥
कश्चिद्रागिति देहादिकल्पनाद्याति देहताम् ।
भ्रान्तित्वं वदतद्रूपं गन्धर्वैश्च न सत्पुरम् ॥
कश्चित्स्थावरतामेति कश्चिज्जङ्गमतामपि ।
कश्चिद्याति खचर्य्यादिरूपः सङ्कल्पतः स्वतः ॥
सर्गादावादिजो देहो जीवः सङ्कल्पसम्भवः ।
क्रमेण पद्मासाद्य वैरिञ्चि कुरुते जगत् ॥
आत्मभूः कलनात्माऽसौ यत्सङ्कल्पयति क्षणात् ।
तत्स्वभाववशादेव जातमेव प्रपश्यति ॥
चित्स्वभावसमायातं ब्रह्मत्वं सर्वकर्म्मणाम् ।
संसृतौ कारणं पश्चात् कर्म्म निर्माय संस्थितम् ॥
चित्तं स्वभावात्स्फुरति चितः फेनमिवाम्भसः ।
कर्म्माभिवर्द्धते पश्चाड्डिण्डीरमिव रज्जुभिः ॥
सङ्कल्पकल्पनावीजं तदात्मैव हि जीवकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्म पश्चात्ततोऽत्युच्चैरुत्थायाकर्मतः क्रमात् ॥
क्रोड़ीकृताङ्कुरं पूर्वं जीवो धत्ते स्वजीवितम् ।
पश्चान्नानात्वमायाति पत्राङ्कुरफलक्रमैः ॥
भावाभावलसद्दोलं तेनायमवलोक्यते ।
सर्गः सदसदाभासः पूर्वगन्ध इवेच्छया ॥
न कश्चिद्विद्यते भेदो द्वैतैककलनात्मकः ।
ब्रह्मजीवमनोमायाकर्तृकर्मजगद्दृशाम् ॥
अपारापारविस्तारसंवित्सलिलवल्गनैः ।
चिदेकार्णव एवायं स्वयमात्मा विजृम्भते ॥
असत्यमस्थैर्य्यवशात् सत्यं सम्प्रति भासते ।
यथा स्वप्नं तथा चित्तं जगत्सदसदात्मकम् ॥
न सन्नासन्न सञ्जातश्चेतसो जगतो भ्रमः ।
अथ धीसमवायान्तमिन्द्रजालमिवोत्थितम् ॥
अनाख्यस्य सरूपस्य सर्वाशान्तिमितात्मनः ।
चेत्योन्मुखतया चित्तं चित्ताज्जीवत्वकल्पनम् ॥
जीवत्वादप्यहम्भावस्त्वहम्भावाच्च चित्तता ।
चित्तत्वादिन्द्रियादित्वं ततो देहादिविभ्रमाः ॥
देहादिमोहतः स्वर्गनरकौ मोक्षबन्धने ।
बीजाङ्कुरवदारम्भः संरूढे देहकर्म्मणोः ॥
द्वैतं यथा नास्ति चिदात्मजीवयोस्तथैव भेदोऽस्ति न जीवचित्तयोः।
यथैव भेदोऽस्ति न जीवचित्तयोस्तथैव भेदोऽस्ति न देहकर्म्मणोः॥
कर्म्मैव देहो ननु देह एव चित्तं तथैवाहमितीह जीवः।
स जीव एवेश्वरचित्स आत्मा सर्वः शिवस्त्वेकपदोक्तमेतत् ॥
एवमेकं परं वस्तु राम नानात्वमेत्यलम् ।
नानात्वमिवसञ्जातं दीपाद्दीपशतं यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा द्वित्वं शशाङ्कादौ पश्यत्यक्तिनिकोचनात् ।
चित्तं चित्कल्पनाक्रान्तं तथैव परमात्मनि ॥
समस्तशक्तिखचितं ब्रह्म सर्वेश्वरं सदा ।
यथैव शक्त्या स्फुरति प्राप्तान्तामेव पश्यति ॥
स्वमायां वेत्ति सर्वात्मा चिरश्चेतनरूपिणीम् ।
सा प्रोक्ता जीवशब्देन सैव सङ्कल्पकारिणी ॥
स्वभावात्कारणं द्वित्वं पूर्वसङ्कल्पचित्स्वयम् ।
नानाकारणतां पश्चाद्द्याति जन्ममृतिस्थितः ॥
स्वतोबीजफला विप्लुट् यथा बोजम्पुनर्भवेत् ।
यथा चिच्चेत्यचित्तादि त्यक्त्वा संस्था न तिष्ठति ।
यद्यप्यबोधे बोधे वा बीजाम्भस्तरुबीजयोः ॥
इयान् भेदोऽस्ति न जगद्ब्रह्मणोरपि चित्ततः॥
बीजमङ्कुरपत्रादियुक्त्या यद्वत्फलम्भवेत् ।
चिन्मात्रं चित्तजीवादियुक्त्या तद्वत्फलम्भवेत् ॥
यथा वासनया जन्तुर्नीयते भवपञ्जरे ।
तद्वासनानुरूपेण फलं समनुभूयते ॥
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा विमृश्य च ।
इन्द्रमानन्दयत्येषा तेनेन्द्रियमिति स्मृतम् ॥
सर्वस्य दृश्यजालस्य परमात्मन्यलक्षिते ।
प्रकृतत्वेन भावानां लोके प्रकृतिरुच्यते ॥
सदसत्तां नयत्याशु सत्तां वाऽसत्त्वमञ्जसा ।
सत्ताऽसत्ताविकल्पोऽयं तेन मायेति कथ्यते ॥
दर्शनश्रवणस्पर्शरसनघ्राणकर्म्मभिः ।
क्रियेति कथ्यते लोके कार्य्यकारणतां गता ॥
चित्ते चेत्यानुपातिन्या गतायाः सकलङ्कताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्फुरद्रूपधर्म्मिण्या एताः पर्य्यायवृत्तयः ॥
चेतनीयकलङ्काङ्काज्जाड्यजालानुपातिनी ।
सङ्ख्याविभागकलना स्वबैकल्पाकुलेव चित् ॥
जीव इत्युच्यते लोके मन इत्यपि कथ्यते ।
चित्तमित्युच्यते सैव बुद्धिरित्युच्यते तथा ॥
नानासङ्कल्पकलितं पर्य्यायनिचयं बुधाः ।
वदन्त्यस्याः कलङ्किन्याश्च्युतायाः परमात्मनः ॥
मनो हि न जडं साधो नापि चेतनतां गतम् ।
म्लाना जडा तदा दृष्टिर्मन इत्येव कथ्यते ॥
मध्ये सदसतो रूपं प्रतिभूतं यदाविलम् ।
जगतः कारणं नाम तदेतच्चित्तमुच्यते ॥
भासते नैकरूपेण निश्चयेन विना स्थितिः ।
येन सा चित्तमित्युक्ता तस्माज्जातमिदं जगत् ॥
जड़ाजड़दृशोर्मध्ये दोलारूपं स्वकल्पनम् ।
याश्रितो म्लानरूपिण्यास्तदेतन्मन उच्यते ॥
चिन्निष्पन्दो हि मलिनः कलङ्कविकलान्तरम् ।
मन इत्युच्यते राम न जडं न च चिन्मयम् ॥
तस्येमानि विचित्राणि नामानि कलितान्यलम् ।
अहङ्कारम्मनोबुद्धिजीवाद्यानीतराण्यपि ॥
यथा गच्छति शैलूषो रूपाण्यत्र तथैव हि ।
मनो नामान्यनेकानि धत्ते कर्म्मान्तरं व्रजत् ॥
चित्ताधिकारवशतो विचित्रा विकृताभिधाः ।
यथा याति नरः कर्मवशाद्याति तथा मनः ॥
या एताः कथिताः संज्ञा मया राघव चेतसः ।
एता एवान्यथा प्रोक्ता वादिभिः कल्पनाशतैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वभावाभिमतां बुद्धिमारोप्य मनसा कृताः ।
मनोबुद्धीन्द्रियादीनां विचित्रा नामरीतयः ॥
मनो हि जडमन्यस्य भिन्नमन्यस्य जीवतः ।
तथाहङ्कृतिरन्यस्य बुद्धिरन्यस्य जीवतः ॥
अहङ्कारम्मनोबुद्धिदृष्टयः सृष्टिकल्पना ।
एकरूपतया प्रोक्ता या मया रघुनन्दन ॥
नैयायिकैरितरथा तादृशाः परिकल्पिताः ।
अन्यथा कल्पिताः साङ्ख्यैश्चार्व्वाकैरपि चान्यथा ॥
जैमिनीयैश्चार्हतैश्च बौद्धैर्वैशेषिकैस्तथा ।
अन्यैरपि विचित्रैस्तैः पाञ्चरात्रादिभिस्तथा ॥
सर्वैं रेव च गन्तव्यं तैः पदं पारमार्थिकम् ।
विचित्रं देशकालोत्थैः पुरमेकमिवाध्वगैः ॥
यया वासनया जन्तुर्नीयते भवपञ्जरे ।
तद्वासनानुरूपेण फलं समनुभूयते ॥
अज्ञानात्परमार्थस्य विपरीतावबोधतः ।
केवलं विवदन्त्येते विकल्पैरारुरुक्षवः ॥
स्वमार्गमभिशंसन्ति वादिनश्चित्रया दृशा ।
विचित्रदेशकालोत्था मार्गं स्वं पथिका इव ॥
कार्य्यकालश्च सञ्ज्ञानां परिभाषणमीरितम् ।
यथोद्देशश्च सञ्ज्ञानां भाषणं भाष्यसम्मतम् ॥
यथैव पुरुषस्नानदानादानादिकाः क्रियाः ।
कुर्व्वन् तत्कर्त्तृवैचित्र्यमेति तद्वदिदं मनः ॥
विचित्रकार्य्यवशतो नामभेदेन कर्त्तृता ।
मनः सम्प्रोच्यते जीववासनाकर्मनामभिः ॥
चित्तमेवेदमखिलं सर्वेणैवानुभूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अचित्तो हि नरो लोकं पश्यन्नपि न पश्यति ॥
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा घ्रात्वा शुभाशुभम् ।
अन्तर्हर्षं विषादश्च समनस्को हि विन्दति ॥
आलोक इव सूर्य्याणामर्थानां कारणं मनः ।
वध्यते बद्धचित्तो हि मुक्तचित्तो हि मुच्यते ॥
दिक्कालाद्यनवच्छिन्नरूपत्वान्मेरुतो बृहत् ।
वालाग्रशतभागात्माप्येष सूक्ष्मपरोऽणुकः ॥
तज्जडानां परं विद्धि जडं येनोच्यते मनः ।
न चावगच्छति जडं मनो यस्य हिं चेतनम् ॥
न चेतनं न च जडं यदिदं प्रोत्थितं मनः ।
विचित्रसुखदुःखेहं जगदभ्युदितं तदा ॥" इति

अद्वितीयं ब्रह्मैवाऽविद्यया कलुषं जगत्कारणम्भवति । तदुक्तम्—

"उर्णनाभाद्यथा तन्तुर्जायते चेतनाज्जडः ।
नित्यं प्रबुद्धात्पुरुषाद्ब्रह्मणः प्रकृतिस्तथा ॥
अविद्यावशतश्चित्तभावनाः स्थैर्य्यमागताः ।
चितिपर्य्यायशब्दा हि भिन्नास्तेनेह वादिनाम् ॥
जीवो मनश्च ननु बुद्धिरहङ्कृतिश्चे-
त्येवं प्रथामुपगतेयमनिर्मला चित् ।
सैषोच्यते जगति चेतनचित्तजीव-
संज्ञागणेन किल नास्ति विवाद एषः ॥
चित्ताकाशचिदाकाशभूताकाशाश्च विस्तरात् ।
चेत्यानुपातरहितं सामान्येन च सर्वगम् ॥
यच्चिरात्वमनाख्येयं स आत्मा परमेश्वरः ।
आब्रह्मस्तम्बपर्य्यन्तं तृणादि यदिदं जगत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्सर्वं सर्वदात्मैव नाविद्या विद्यतेऽनघ ।
सर्वञ्च खल्विदं ब्रह्म नित्यं चिद्घनमक्षतम् ॥
कल्पना न्यायतो नास्ति विद्यते हि कदाचन ॥" इति

असन्दिग्धमिदं यच्चित्तमेव सर्वक्रियाकर्तृ भोक्तृ च । तदेव च चित्तमादर्शमिव मृच्चूर्णादिना संशोध्य, हिमकणमिवातपेन विलाप्य, रत्नतत्त्वमिव विवेकेन निर्धार्य्य परं श्रेयो भवति । इदमेव चाविद्याचित्तबुद्धिशब्दैरभिधीयते, शाखीव वृक्षतरुशब्दाभ्याम् । चित्ते च कल्पनाशून्ये समुदिते च विमले चिदर्कविम्बे सर्वं करामलकवदविकल्पेन भातीति । भवन्ति चात्र—

"जीवबीजं परं ब्रह्म सर्वत्र खमिव स्थितम् ।
तेन जीवोदरजयन्त्यपि जीवोऽस्त्वनेकधा ॥
चिद्घनैकघनात्मत्वाज्जीवास्तज्जीवजातयः ।
कदलीदलवत् सन्ति कीटा इव धरोदरे ॥
कुर्वतोऽकुर्वतो वापि स्वर्गेऽपि नरकेऽपि वा ।
यादृग्वासनमेतत्स्यान्मनस्तदनुभूयते ॥" इति

तस्मादज्ञानामेव कर्त्तृत्वभोक्तृत्वे, नतु विज्ञानाम् । ते तु कुर्व्वन्तोऽपि शरीरयात्रानिर्वाहकं कर्म पद्मपत्रमिवाम्भसा न तेन लिप्यन्ते । मनो हि वासनारूपं फलाय कल्पते । न मनो वस्तुतः—आनन्दादिस्वरूपम् । तदुक्तम्—

"नानन्दं हि निरानन्दं नाचलं न चलं स्थिरम् ।
न सन्नासन्न चैवन्तु मध्यगा हि मनो विदुः ॥" इति

सुखदुःखादिभोगस्य वासनानुरूपत्वादेव श्वभ्रपतनेऽपि शय्यासनवासनायां सुखमेव । शय्यासनेऽपि श्वभ्रपतनवासनायां दुःखमेवेति सर्वतन्त्रसिद्धान्तः । अद्वैतवासनावाँस्तु स्वतोऽन्यस्याभावात् सुखदुःखाभावेन विगतभयस्तिष्ठति । कुर्व्वन्नप्यकर्त्तेति न कर्मफलमनुभवति । मनसि सर्वबीजे परिहृते सर्वं परिहृतम्भवतीति । अपि चाद्वैतवासनावतो रागद्वेषाभावादपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न कस्यचिदुत्पादविनाशयोः सुखदुःखे, बालस्येव नगरनिर्म्माणतद्विनाशयोः। बालस्य कदाचित्स्यातामपि न च कदाचिदस्य । बन्धाभावादेव च न मोक्षोऽपि, मुचेर्बन्धनविश्लेषार्थत्वात् । तदुक्तम्——

"न बन्धोऽस्ति न मोक्षोऽस्ति नाबन्धोऽस्ति न बन्धनम् ।
अप्रबोधादिदं दुःखं प्रबोधात्प्रविलीयते ॥" इति

ब्रह्मात्मभावादेव सर्वशक्तिसम्पन्नः । ब्रह्म च सर्वशक्तिसम्पन्नं महामायमैन्द्रजालिकमिव घटं पटयितुमीष्टे । असच्चासत्करोति, सच्चासदिति । मेरौ चन्दनवनमिव लतायामुपलम्, कल्पपादपे रत्नस्तबकमिव व्योम्नि काननमुत्पादयति । गन्धर्वराजगृहे विपुलाङ्गनाजनमिव व्योम भूतले निवेशयति । अथवा न ब्रह्म यत्नेन किञ्चित्करोति नाशयति वा। किन्तर्हि ? शक्तय एव स्वात्मभूता आविर्भवन्ति तिरोभवन्ति च । समुद्र इव वीचयः, वट इव धानायाम्, क्षीर इव घृतं नात्र कश्चित् कर्त्ता भोक्ता वा। तदुक्तम्——

"सति दीप इवालोकः सत्यर्के इव वासरः ।
सति पुष्प इवामोदः स्वतः सम्पद्यते जगत् ॥
जायते नैव तद्वस्तु नात्मभूतं यदा मनः ।
जायते नैव तद्वस्तु स्वात्मभूतं यदा मनः ॥
कथं तज्जायते तस्मात्स्वात्मभूतं यदामनः ॥" इति

तस्माद् ब्रह्मण एव सर्वागमः । अवतीर्णतां तेषां समकालमेवाविद्योदेति । तदनु—सहस्रशाखो विचित्रशुभाशुभफलभासुरः स्फारतामेति संसारद्रुमः । तदुक्तम्—

"आशामञ्जरिताकृतिं विफलितं दुःखादिभिर्दारुणै-
र्भोगैः पल्लवितं जराकुसुमितं तृष्णालताभासुरम् ।
संसाराभिधवृक्षमात्मनिगडं छित्त्वा विवेकासिना
मुक्तस्त्वं विहरेह वारणपतिः स्तम्भादिवोन्मोचितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिन्मात्रदर्पणाकारे निर्मले स्वात्मनि स्थिते ।
इति भावानुसन्धानादहंकारो निवर्त्तते ॥
ऊर्मिजालमिवाम्भोधौ परो यः परिदृश्यते ।
शब्दोऽर्थः कलनाकारस्तद्ब्रह्मैव विदुर्बुधाः ॥
ब्रह्म चिद्ब्रह्म च मनो ब्रह्मविज्ञानवस्तु च ।
ब्रह्मार्थो ब्रह्मशब्दश्च ब्रह्मविद्ब्रह्मधातवः ॥
ब्रह्म सर्वमिदं विश्वं विश्वातीतञ्च तत्पदम् ।
वस्तुतस्तु जगन्नास्ति सर्वं ब्रह्मैव केवलम् ॥
क्वचिन्मनः क्वचिद्बुद्धिः क्वचिज्ज्ञानं क्वचित्क्रिया ।
क्वचिदेतदहङ्कारः क्वचित्पुर्य्यष्टकं स्मृतम् ॥
क्वचित्प्रकृतिरित्युक्तं क्वचिन्मायेति कल्पितम् ।
क्वचिन्मल इति प्रोक्तं क्वचित्कर्मेति शब्दितम् ॥
क्वचिद्बन्ध इति ख्यातं क्वचिच्चित्तमितिस्फुटम् ।
प्रोक्तं क्वचिदविद्येति क्वचिदिच्छेति संस्थितम् ॥
बहूनि ब्रह्मलक्ष्याणि शङ्करेन्द्रशतानि च ।
नारायणसहस्राणि समतीतानि राघव ॥
अन्येषु च विचित्रेषु ब्रह्माण्डेषु च भूरिशः ।
नानाचारविहाराणि विहरन्ति सहस्रशः ॥
तुल्यकालमनन्तेषु कालान्तरभवेषु च ।
जगत्सु प्रोद्भविष्यन्ति बहून्यन्यानि भूरिशः ॥
तेषामब्जोद्भवादीनां ब्रह्माण्डेषु दिवौकसाम् ।
उत्पत्तयो महाबाहो विचित्रा जनिता इमाः ॥
कदाचित्सृष्टयः शार्व्यः कदाचित्पद्मजोद्भवाः ।
कदाचिदपि वैष्णव्यः कदाचिन्मुनिनिर्मिताः ॥
कदाचित्पद्मजो ब्रह्मा कदाचित्सलिलोद्भवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अण्डोद्भवः कदाचित्तु कदाचिज्जायतेऽम्बरात् ॥
कस्मिँश्चिदण्डे त्र्यक्षोऽर्कः कस्मिँश्चिदपि वासवः ।
कस्मिँश्चित्पुण्डरीकाक्षः कस्मिँश्चित्त्र्यक्ष एव सः ॥
कस्याश्चिद्भूरभूत्सृष्टौ नीरन्ध्रतरसङ्कटा ।
कस्याश्चिन्नरनारीध्रा कस्याश्चिद्भूधरावृता ॥
भूरभून्मृन्मयी काचित् काचिदासीद्दृषन्मयी ।
आसीद्धेममयी काचित्काचित्ताम्रमयी तथा ॥
इहैव कानि चित्राणि जगन्त्यन्यान्यथाऽन्यथा ।
अन्यान्येकैकलोकानि निर्महांस्यपि कानिचित् ॥
अनन्तानि जगन्त्यस्मिन् ब्रह्मतत्त्वमहाम्बरे ।
अम्भोधिवीचिजलवन्निमज्जन्त्युद्भवन्ति च ॥
यथा तरङ्गा जलधौ मृगतृष्णा मरौ यथा ।
कुसुमानि यथा चूते तथा विश्वश्रियः परे ॥
भानोर्गणयितुं शक्या रश्मिषु त्रसरेणवः ।
आलोलवपुषो ब्रह्मतत्त्वेन जगतां गणाः ॥
यथा मशकजालानि वर्षादिष्वाकुलानि तु ।
उत्पद्योत्पद्य नश्यन्ति तथैवालोकसृष्टयः ॥
न च विज्ञायते कस्मात्कालात्प्रभृति चागताः ।
नित्यागमापायपरा एताः सर्गपरम्पराः ॥
अनादिमत्योऽविरतं प्रस्फुरन्ति तरङ्गवत् ।
पूर्वात्पूर्वं किलाभूवँस्ततः पूर्वतरं यथा ॥
भूत्वा भूत्वा प्रलीयन्ते ससुरासुरमानवाः ।
सरित्तरङ्गभङ्ग्यैव समस्ता भूतजातयः ॥
यथेदमण्डं वैरिञ्चं तथा ब्रह्माण्डपङ्क्तयः ।
याः सहस्रं परिक्षीणा नाडिका वत्सरेष्विव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्याः सम्प्रति विद्यन्ते वर्त्तमानशरीरकाः ।
प्रान्ते ब्रह्मपुरस्यास्य वितते ब्रह्मणः पदे ॥
ब्रह्मण्यन्या भविष्यन्ति भूत्वा भूत्वा यथा गिरः ।
ब्रह्मण्यन्ये भविष्यन्त्यः स्थिताः सर्गपरम्पराः ॥
घट इव मृदो राशावङ्कुरे पल्लवा इव ।
यावद्ब्रह्मचिदाकाशे तथा त्रिभुवनश्रियः ॥
स्फाराकारविकाराढ्याः प्रेक्ष्यमाणा न किञ्चन ।
इह सृष्टिषु मुख्यासु निष्कृष्टासु च मानद ॥
परमान्नभसो जातातथा तन्मात्रमालिका ।
कदाचित्प्रथमं व्योम प्रतिष्ठामधिगच्छति ॥
ततः प्रजायते ब्रह्मा व्योमजोऽसौ प्रजापतिः ।
कदाचित्प्रथमं वायुः प्रतिष्ठामधिगच्छति ॥
ततः प्रजायते ब्रह्मा वायुजोऽसौ प्रजापतिः ।
कदाचित्प्रथमं तेजः प्रतिष्ठामधिगच्छति ॥
ततः प्रजायते ब्रह्मा तैजसोऽसौ प्रजापतिः ।
कदाचित्प्रथमं वारि प्रतिष्ठामधिगच्छति ॥
ततः प्रजायते ब्रह्मा वारिजोऽसौ प्रजापतिः ।
कदाचित्प्रथमं पृथ्वी स्फारतामधिगच्छति ॥
ततः प्रजायते ब्रह्मा पार्थिवोऽसौ प्रजापतिः ।
एवं चत्वारि सम्पीड्य पञ्चमं वर्धते सदा ॥
तदा तज्जात एवैष कुरुते जागतीं क्रियाम् ।
कदाचिदप्सु वायौ वा सुस्फारेऽपि च तेजसि ॥
स्वयं सम्पद्यतेऽकस्मात्पुमान् प्रकृतिभावितः ।
तस्याथ शब्दो वदनात्कदाचिज्जायते पदात् ॥
कदाचिदंशात्पृष्ठाद्वा कदाचिल्लोचनात्करात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचित्पुरुषस्यास्य नाभौ पद्मं प्रजायते ।।
तस्मिन् संवर्द्धते ब्रह्मा पद्मजोऽसौ प्रकीर्त्तितः ।
मायेत्थं स्वप्नवद्भाति मिथ्यारचितचक्रिका ।।
मनोराज्यमिवालोलसलिलावर्त्तसुन्दरी ।
किमिवास्यां वद ज्ञप्तौ कथं सम्भवतीह ते ।।
कचिद्बालमनोराज्यमिदं पर्य्यनुयुज्यते ।
कदाचिदम्बरे शुद्धे मनस्तत्त्वानुरञ्जनात् ।।
सौवर्णं ब्रह्मगर्भञ्च स्वयमण्डं प्रवर्त्तते ।
कदाचिदेव पुरुषो वीर्य्यं सृजति वारिणि ।।
तस्मात्प्रजायते पद्मं ब्रह्माण्डमथवा महत् ।
तस्मात्प्रजायते ब्रह्मा कदाचिद्वायुरण्डजः ।।
पुनः सृष्टिः पुनर्नाशः पुनर्दुःखं पुनः सुखम् ।
पुनरज्ञः पुनस्तज्ज्ञो बन्धमोक्षदशः पुनः ।।
पुनः सृष्टिकारचितवीतस्नेहदशः पुनः ।
दीपा इव कृतालोकाः प्रशाम्यन्त्युद्भवन्ति च ।।
देहोत्पत्तौ विनाशे च दीपानां ब्रह्मणामपि ।
कालेनाधिकतां त्यक्त्वा नाशो भेदो न कश्चन ।।
पुनः कृतः पुनस्त्रेता पुनः सद्वापरः कलिः ।
पुनरावर्त्तते सर्वं चक्रावर्त्ततया जगत् ।।
पुनर्मन्वन्तरारम्भाः पुनः कल्पपरम्परा ।
पुनः पुनः कार्य्यदशाः प्रातः प्रातरहो यथा ।।
लोकालोककलाकालकलनाकलितान्तरम् ।
पुनः पुनरिदं सर्वं न किञ्चन पुनः पुनः ।।
अनाहते प्रतप्तेऽयःपिण्डे जलकणा इव ।
इमे भावाः स्थिता नित्यं चिदाकाशे स्वभावतः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचिदनभिव्यक्तं कदाचिद्व्यक्तिमागतम् ।
इदमस्ति परे तत्त्वे सर्वं वृन्त इवार्त्तवम् ॥
चित्स्पन्द एव सर्वात्मा सर्वदैवेदृशाकृतिः ।
यदस्माज्जायते सर्गो द्वीन्दुत्वमिव लोचनात् ॥
चितः सर्वाः समायान्ति सन्तताः सृष्टिदृष्टयः ।
तत्स्था एवात्मतत्स्थाभाश्चन्द्रादिव मरीचयः ॥
न कदाचन संसारः किलाऽयं साधु सन् सदा ।
सर्वशक्तावसंसारशक्तिता विद्यते यतः ॥
महाकल्पावधिः काले न संसारतयेद्धया ।
न भविष्यति संसार इदानीमिति युज्यते ॥
ज्ञदृष्ट्या सर्वमेवेदं ब्रह्मैवेति महामते ।
नास्ति संसार इत्येतदुपपद्यत एव वा ॥
पुनः पुनश्च भावित्वान्न कदाचिदनीदृशम् ।
जगदित्येतदुक्तन्तु न मृषा कुलवर्धन ॥" इति

कर्म्ममीमांसकाः—'वेदस्याध्ययनं सर्वं गुर्व्वध्ययनपूर्वकम्, वेदाध्ययनसामान्यादधुनाध्ययनं यथा' इति; 'यः कल्पः स कल्पपूर्वकः' इति; 'यो यः सूर्य्योदयः स सूर्य्योदयपूर्वकः, सूर्य्योदयत्वादिदानीन्तनसूर्य्योदयवदिति' च न्यायैः सर्वजगत्प्रवाहो 'नित्यः' इत्याहुः । अन्ये प्रलयप्रतिपादकपुराणादिवचनानुसारेण 'अनित्यः' इति प्रतिपादयन्ति । अद्वैतदृष्ट्या 'मिथ्या' इत्यद्वैतवादिनः ।

न तदस्ति न यन्नास्मिन्नेकस्मिन् वितितात्मनि ।
सङ्कल्पकलनाजालमनाख्येनोपपद्यते ॥
पुनः पुनरिदं सर्वं पुनर्मरणजन्मनी ।
पुनः सुखं पुनर्दुःखं पुनः करणकर्म्मणी ॥
पुनराशा पुनर्व्योम पुनरम्भोधराद्रयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्युदेति पुनः सृष्टिः खवदर्कप्रभा यथा ॥
पुनर्दैत्याः पुनर्देवाः पुनर्लोकान्तरक्रमाः ।
पुनः स्वर्गापवर्गेहा पुनरिन्द्रः पुनः शशी ॥
पुनर्नारायणो देवः पुनर्दनुसुतादयः ।
पुनराशाचलच्चारुचन्द्रार्कवरुणानिलाः ॥
सुमेरुकर्णिकाकान्ताः सह्यकेशरशालिनी ।
पूर्णस्फीतोदरोदेति रोदसी नलिनी पुनः ॥
व्योमकाननमाक्रम्य वल्गत्यंशुनखोत्करैः ।
तमःकरिघटा भेत्तुं पुनर्भास्करकेशरी ॥
पुनरिन्दुचलत्स्पन्दमञ्जरीसुन्दरैः करैः ।
करोत्यमृतमालादि दिग्वधूमुखमण्डनम् ॥
पुनः कार्यक्रियापेक्षैः संसारारम्भनामकम् ।
किञ्चित्पटघटं कृत्वा याति कालकपिञ्जलः ॥
पुनरिन्द्रादिके जाते सज्जमास्थाय केवलम् ।
आयात्यपरदेवेन्द्रषट्पदः स्वर्गपङ्कजम् ॥
पुनः कालकलस्तेन कृतभेदशरावकम् ।
चक्रमावर्त्तते वेगादजस्रं कल्पनामकम् ॥
पुनर्नीरसतामेति जगदस्तशुभस्थितिः ।
अभ्यासी भूतसङ्कल्पं संशुष्कमिव काननम् ॥
पुनः स्वर्गसमारम्भः प्रलये सर्वसम्भवः ।
सर्वं पुनरिदं साधो चक्रवत्परिवर्त्तते ॥
किमेतस्मिन्महामायाडम्बरे दीर्घशम्बरे ।
विभो सत्यमसत्यं वा निर्णयं यदिहोच्यते ॥
अज्ञातपरमार्थेन क्रियामात्रे च तिष्ठता ।
फलकार्पण्ययुक्तेन मनसा शोकरोषकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असच्च सदसत्सर्वं सङ्कल्पादेव नान्यतः ।
सङ्कल्पं सदसच्चैवमिह सत्त्वं किमुच्यताम् ॥
सङ्कल्प्यते यथा यद्यत्तथा भवति तत्क्षणात् ।
यत्किञ्चिदपि तत्वज्ञ सङ्कल्पय कदाचन ॥
निःसङ्कल्पो यथाप्राप्तव्यवहारपरो भव ।
चिदचेत्योन्मुखत्वं हि याति सङ्कल्पसंक्षये ॥" इति

एवं समष्टिसङ्कल्पाज्जगतो व्यष्टिसङ्कल्पाच्च बुद्ध्यहङ्कारप्राणेन्द्रियाद्याकारव्यष्टेरुत्पत्तिः ।

सङ्कल्पेन हि सङ्कल्पः स्वयमेव प्रजायते ।
वर्द्धते स्वयमेवाशु दुःखाय न सुखाय तु ॥
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि ।
किङ्करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥
आत्मना पूरितं विश्वं महाकल्पाम्बुना यथा ।
दुःखमात्मा सुखञ्चैव सुखदुःखेन सत्तया ॥
सर्वमात्ममयं ज्ञानं नष्टकष्टोऽहमात्मना ।
स बाह्याभ्यन्तरे देहे अधश्चोर्द्ध्वश्च दिक्षु च ॥
इत आत्मा ततश्चात्मा नास्त्यनात्ममयं क्वचित् ।
सर्वत्रैव स्थितो ह्यात्मा सर्वमात्ममयं स्थितम् ॥
सर्वमेवेदमात्मैवमात्मन्येव भवाम्यहम् ।" इति

बाह्याध्यात्मिकविभागवति देहे—अधः—उदूर्ध्वं प्राच्यादिषु च सर्वमात्मैवेति । तथा च श्रुतिः -"आत्मैवाधस्तादात्मैवोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणतः आत्मोत्तरतः आत्मैवेदं सर्वम्" इति । विवर्त्तात्मककल्पितविकारदर्शनेन सर्वमात्ममयमिति । तत्त्वदर्शने तु सर्वमात्मैवेति । परमार्थे तु—आत्मनि भवामीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"शिवः पुरुष ईशानो नित्यमात्मैव कल्पते ।
वार्य्येव सकलाम्भोधिर्न तरङ्गादयः क्वचित् ॥
पृथक्कटककेयूरनूपुरादिर्न काञ्चनात् ।
द्वैताद्वैतसमुद्भेदैर्जगन्निर्माणलीलया ॥
परमार्थमयी शक्तिरद्वैतैव विजृम्भते ।
राजा तु तत्र भगवानात्मा सर्वपदातिगः ॥
तेन मन्त्री कृतः प्राज्ञो मनोनामा महामते ।
मनोनिष्ठतया विश्वमिदं परिणतिं गतम् ॥
घटत्वेनेव मृत्पिण्डो धूमोऽम्बुदतयैव च ।
आत्मा नारायणश्चैव न भिन्नस्तिलतैलवत् ॥
तथैव शौक्ल्यघटवत् कुसुमामोदवत्तथा ।
भो हि विष्णुः स एवात्मा यो ह्यात्माऽसौ जनार्दनः ॥
विष्णवात्मशब्दौ पर्य्यायौ यथा विटपिपादपौ ।
सर्वस्यैव जनस्यास्य विष्णुस्त्वभ्यन्तरे स्थितः ॥
तं परित्यज्य ये यान्ति बहिर्विष्णुं नराधमाः ।
हृद्गुहावासिचित्तत्वं मुख्यं सानातनं वपुः ॥
शङ्खचक्रगदाहस्तो गौण आकार आत्मनः ।
यो हि मुख्यं परित्यज्य गौणं समनुधावति ॥
त्यक्त्वा रसायनं सिद्धं साध्यं संसाधयत्यसौ ।
अप्युत्सङ्गो ह्यमानानि पद्मानि सरिदम्भसाम् ॥
कानि नाम भवन्तीह शरीराणि तथात्मनः ।
संघट्टात्काष्ठपयसो यथोत्तुङ्गाः कणादयः ॥
देहात्मनः समायोगात्तथैताश्चित्तवृत्तयः ।
सम्बन्धादारुपयसां प्रतिबिम्बानि दारुणः ॥
यथा पयसि लक्ष्यन्ते शरीराणि तथात्मनि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा दर्पणबिम्बादौ प्रतिबिम्बानि वस्तुतः ॥
नासत्यानि च सत्यानि शरीराणि तथात्मनः ।
दारुवार्युपलास्फोटे दुःखिता न यथा क्वचित् ॥
संयुक्तेषु वियुक्तेषु न तथा पञ्चसु क्षतिः ।
दारुसंश्लेषिताच्तोयात् कम्पशब्दादयो यथा ॥
प्रज्ञायन्ते तथैवास्माद्देहाच्चित्परिबोधितात् ।
असत्प्रायो हि सम्बन्धो यथा सलिलकाष्ठयोः ॥
तथैव मिथ्यासम्बन्धः शरीरपरमात्मनोः ।
अन्तःसक्तं मनोबद्धं मुक्तं शक्तिसमन्वितम् ॥
अन्तःसंसक्तिरेवैकं कारणं बन्धमोक्षयोः ।
मनो बुद्धिरहङ्कारो वासनाश्चेन्द्रियाण्यपि ॥
एवं कलितनामाङ्कैः स्फुरत्यात्माब्धिरम्बुभिः ।
चित्ताहङ्कारयोर्द्वित्वं वचस्यस्ति न वस्तुतः ॥
यच्चित्तं सोऽहङ्कारो योऽहङ्कारो मनो हि तत् ।
व्यतिरिक्तं हिमाच्छौक्ल्यमिति सङ्कल्प्यते यथा ॥
मुधैव कल्प्यते भेदश्चित्ताहङ्कारयोस्तथा ।
अहम्भावादहङ्कारो मननान्मन उच्यते ॥
बोधनिश्चयतो बुद्धिरिन्द्रदृष्टेस्तथेन्द्रियम् ।
देहभावनया देहो घटभावनया घटः ॥
एष एव स्वभावात्मा जनैः पुर्यष्टकः स्मृतः ।
यदान्यः सर्वदेहेभ्यः खे पतत्पक्षिरूपिणः ॥
तदा तज्जीवसंस्पर्शाज्जीवात्मैकत्वमृच्छति ।
परमात्मेति कथितो मनःषष्ठेन्द्रियातिगः ॥
तस्मात्सम्पद्यते जीवः चिन्मूर्तिमननान्मनः ।
इत्यनानैव नानेदं नाना नाना च वस्तुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च नाना न चानाना नाना नानात्मकं ततः ।
नानात्वमायिकत्वेनानानात्वं न विरोधभाक् ॥
अतः सर्वमिदं ब्रह्म तच्च सर्वात्मकं यदा ।
तदा विश्वमिदं सर्वं ब्रह्मैवास्ति यथास्थितम् ॥
चिद्व्योम ब्रह्म चिन्मात्रमात्मा चिति महानिति ।
परमात्मेति पर्य्याया ज्ञेया ज्ञानवता त्विह ॥
ब्रह्मैवेति यदात्मानं स ब्रह्माऽयं प्रजापतिः ।
स च नो ब्रह्मणो भिन्नो द्रवत्वमिव वारिणः ॥
यत्सर्वं खल्विदं ब्रह्म तज्जलानिति संस्फुटम् ।
श्रुत्या ह्युदीर्य्यते साम्नि तस्मै ब्रह्मात्मने नमः ॥
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥
उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥
मनोऽहङ्कारयोरन्तर्द्वयोरेकतरक्षये ।
क्षीणे द्वे एव हि तदा पटशौक्ल्यं पटक्षये ॥
येन प्रस्पन्दते चित्तं येन न स्पन्दते तथा ।
चित्तं प्राणपरिस्पन्दमाहुरागमवादिनः ॥
परमात्मा तु नोदेति नास्तं याति कदाचन ।
न चास्मादन्यदस्तीति भावो वा भाव एव वा ॥” इति

वेदादिसकलशास्त्रपर्य्यालोचनया तदेवं तत्त्वजातं पर्य्यवस्यति-आत्मा एक एव सन्—अविद्याद्युपाधितदभावाभ्यां जीवपरमात्मभेदेन कल्पते । तत्रौपाधिकं रूपमवास्तवम् । रक्तत्वमिव स्फटिके जपाकुसुमौपाधिकम्, प्रतिबिम्बमिव जलाद्युपाधिकम् । अनौपाधिकं वास्तवम् । रक्तमिव जपाकुसुमे, बिम्बमिव मुखादि । तथा च श्रुतिः—“एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन”

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति। उपाधिश्च—'माया' इति विवर्त्तवादिनः। 'प्रकृतिः' इति परिणामवादिनः। 'परमाणुः' इत्यारम्भवादिनः। 'सृष्टिश्च महदादितः' इति साङ्ख्याः। 'आकाशादितः' इत्यौपनिषदाः। 'द्व्यणुकादितः' इति तार्किकाः। 'मनश्च इन्द्रियम्' इति साङ्ख्यादयः। 'नेन्द्रियम्' इत्यौपनिषदाः। एकमेव मनः संशयादिवृत्तिभेदेन मन इति चित्तमिति बुद्धिरिति चाख्यायते। तत्र—'मनः' इति नैयायिकैः। 'बुद्धिः' इति साङ्ख्यैः। 'चित्तम्' इति पातञ्जलैः। 'अन्तःकरणम्' इति वेदान्तिभिः। इन्द्रियन्तु ज्ञानकर्म्मभेदेन दशविधमिति सर्वतन्त्रसिद्धान्तः। 'भौतिकम्' इति नैयायिकादयः। 'आहङ्कारिकम्' इति साङ्ख्याः। भूतानि आकाशादीनि—अपञ्चीकृतानि सूक्ष्माणि, पञ्चीकृतानि स्थूलानि। सूक्ष्मसमष्टिरूपं हिरण्यगर्भशरीरम्। स्थूलसमष्टिरूपं विराट्शरीरम्। व्यष्टिरूपं जीवशरीरम्। शरीरञ्च जरायुजादि चतुर्विधम्। लोष्टपाषाणादि सर्वं भौतिकम्। पदार्थास्तु—'द्रव्यादिभेदेन सप्त' इति वैशेषिकाः। 'प्रमाणादिभेदेन षोडश' इति नैयायिकाः। 'आत्मादिपञ्चविंशतिः' इति साङ्ख्याः। 'सहेश्वरेण षड्विंशतिः' इति पातञ्जलाः। 'सृष्टिर्नित्या' इति मीमांसकाः। प्रलयवतीत्यन्ये। प्रलयश्च नित्यादिभेदेन चतुर्विधः। प्रमाणञ्च वादिभेदेन एकद्व्यादिसङ्ख्याभेदभिन्नम्। संसारोऽपवर्गश्चेत्यपरो भेदः। 'अनादिः सान्तः संसारः, सादिरनन्तोऽपवर्गः' इति नैयायिकाः। 'संसार आविद्यकः, मोक्षश्च ब्रह्मरूपोऽनादिरनन्तः' इत्यद्वैतवादिनः। शास्त्रञ्च—रोगो रोगनिदानमारोग्यं तन्निदानमिति चिकित्साशास्त्रमिव--हेयं हेयहेतु हानं हानोपाय इति चतुर्व्यूहम्। 'पदार्थतत्त्वज्ञानं मोक्षसाधनम्' इति नैयायिकाः। 'विवेकख्यातिः' इति साङ्ख्याः। 'चित्तलयः' इति पातञ्जलाः। 'ब्रह्मात्मैक्यविज्ञानम्' इत्यौपनिषदाः। 'आत्मा निर्गुणः' इति साङ्ख्यादयः। 'सगुणः' इति नैयायिकाः। 'श्रोत्रम्—आकाशमिति' नैयायिकाः। 'दिगिति' वेदान्तिनः। 'इन्द्रियं प्राप्यकारीति'—आस्तिकाः। 'अप्राप्यकारीति' नास्तिकाः। 'श्रोत्रं स्वदेशे विषयग्राहि' इति नैयायिकाः। 'विषयदेशे' इत्यन्ये। एवमन्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दपि तत्त्वजातमूह्यम् । पदार्थानां पुनः पुनरविकलरूपेण च कथनमुपादेयतासूचनाय । मन एव स्वस्य भावाभावाभ्यामात्मनो जीवब्रह्मभावसम्पादकत्वेन भोगमोक्षोपयोगितया सुखदुःखकारणत्वेन तत्प्राप्तिपरिहारार्थं विधिनिषेधशास्त्रप्रवर्त्तकतया च—अत्र शास्त्रे प्रधानम् । अन्यत्सर्वं प्रसक्तानुप्रसक्तमिति मनोविज्ञानमिति नाम सिद्धम् ।

उपसंहारः ।

शास्त्रस्यास्य तु यन्नाम करणं तद्विना परः ।
अभ्यासो ज्ञानसम्पत्त्यै न भूतो न भविष्यति ॥
सर्वदैवाविनाभावि चित्तं दृश्यमिहात्मनः ।
इह चामुत्र चैतस्य बोधान्ते शाम्यतः स्वयम् ॥
चित्तदृश्यशरीराणि त्रीणि साम्यन्ति बोधतः ।
पवनस्पन्दशैत्यानि कारणाभावतो यथा ॥
कारणं मौर्ख्यमेवास्य तच्चास्मादेव शास्त्रतः ।
किञ्चित् संस्कृतबुद्धीनां वाचितादेव शाम्यति ॥
अबुद्धमुत्तरग्रन्थात् पूर्वं पूर्वं हि बुद्धयते ।
ग्रन्थे परपदार्थज्ञः खेदवान्न निवर्त्तते ॥
उपायमिममावक्ष्ये विद्धि शास्त्रं भ्रमक्षये ।
अनन्यसाधारणतां गतमित्यनुभूयते ॥
तस्मादस्यैव शास्त्रस्य यथाशक्ति विचारयेत् ।
द्वौ भागौ भागमेकं वा तेन दुःखक्षयो भवेत् ॥
अपीदं मतमार्षं हि प्रमादाच्चेन्न रोचते ।
तदन्यदात्मविज्ञानशास्त्रं किञ्चिद् विचारयेत् ॥
अनर्थेनाविचारेण वयः कुर्यान्न भस्मसात् ।
बोधेन तत्त्वसारेण दृश्यं कर्त्तव्यमात्मसात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

आयुषः क्षण एकोऽपि सर्वरत्नैर्न लभ्यते ।
नीयते तद्वृथा येन प्रमादस्तु महानहो ॥
अविद्येयमनन्तेयमविद्यात्वेन चेतिता ।
ब्रह्मत्वेन परिज्ञाता भवति ब्रह्म निर्म्मलम् ॥
सर्वं ब्रह्मैव तद्विद्धि यत्तथैव तथैव तत् ।
सर्वस्यैक्यानुभूत्यर्थं श्रुतं श्रवणभूषणम् ॥
प्रबुद्धस्य परात्मेन्दोर्निस्पन्दममृताधिकम् ।
ऐक्यमास्वाद्य मुक्ता हि सर्वे वै जनकादयः ॥ इति

[१]

आयुर्वेदनिबन्धजातमखिलं संवीक्ष्य सर्वागमं
पौराणं वचनं तथा स्मृतिवचः शास्त्रं विचिन्त्याऽपि च ।
बुद्ध्या तन्मथनप्रजातममृतप्रायांशमादाय च
ग्रन्थस्त्वेष मया प्रयत्नरचितः स्यात्प्रीतये सर्वदा ॥

[२]

आत्मप्रधानमहदिन्द्रियभूतवर्गा-
ऽहङ्कारभौतिकमनःप्रविवेचनानि ।
यत्नेन वेदमितिहासपुराणशास्त्र-
मादाय सर्वजनमोदकृते कृतानि ॥

[३]

वेदादितः सकलमेव तु रत्नजातं
सारांशतोऽविकलतस्त्विह सञ्चितन्नु ।
तेनेदमस्तु भुवि मोदकृते बुधानां
स्वादः प्रपाणकमधुप्रभृतौ विशेषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[४]

निबन्धाः सन्त्येव प्रकृतविषये यद्यपि शतं
तथाऽप्यस्मिन्सर्वः सपदि भविता सादरमनाः ।
फलं वा पुष्पं वा भवतु शतशोऽपि क्षितितले
मनःप्रीत्यै नूनं भवति सहकारः समधिकः ॥

[५]

जनस्त्वायुर्वेदं पठति च निबन्धं रचयते
यथा दृष्टं प्रायः सममपि तथा न्यस्यति कृतौ ।
परोक्षं नाऽध्यक्षं ह्यनुभवपथं नो कलयते
न शब्दः प्रत्यक्षं जनयितुमलं स्यात्कथमपि ॥

[६]

निबन्धे वै कामं कमपि विषयं यं कलयते
न चादत्ते मानं किमपि ननु पौराणवचनम् ।
स्थिते चैवं कस्माद्भवतु च सतामादरपथे
ऋते मानान्मेयं व्रजति नहि सिद्धिं कथमपि ॥

[७]

समस्ता विन्यस्ता ह्यनुभवपथप्राप्तविषयाः
प्रमाणं यन्न्यस्तं सकलमपि पौराणवचनम् ।
निबन्धोऽयन्तेन व्रजतु च सतामादरपथं
त्वतिक्रामन्नन्यान् चिरमिह निबन्धान्विजयताम् ॥

[८]

प्राज्ञाः प्राज्ञतया न सन्त्यधिकृता अज्ञा न चाज्ञानतो
मध्या एव जना भवन्त्यधिकृताः शास्त्रेऽत्र तान् ब्रूमहे ।
चित्तैकाग्रतया चिरं विचिमुत प्राज्यानि तत्त्वानि तु
प्रोद्यज्ज्ञानवशेन कालवशतो मुक्तिद्वयं प्राप्नुत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[९]

अथवा—

मध्याः सन्त्वधिकारिणोऽपि च जना विज्ञास्तथाज्ञा अपि
सर्वेऽपि श्रवणादिसाधनविधावीयुः परं पाटवम् ।
एकत्रस्थिततत्त्वजातमखिलं सञ्चिन्वतां यत्सता-
मानन्दार्णवमग्नमानसविधौ शास्त्रं त्विदं कल्पते ॥

[१०]

बुधा यूयं नानागमनिगमशास्त्रादिषु किमु-
भ्रमन्तः श्रान्ताः स्थ प्रचुरतरतत्त्वस्य कलने ।
मया श्रान्त्वा पूर्वं विहितमिह तत्त्वस्य निचयं
विहायान्यत्कार्य्यं क्षणमपि सहर्षं कलयत ॥

[११]

हयनिधिनिधिचन्द्रे वैक्रमे हायनेन्द्रे
शुचिशितिरविवारे वेदतिथ्याः प्रचारे ।
व्रजरुसित**विहारी** शास्त्रमेतद्विहारी
व्यतनुत शिवहेतुप्रीतिरस्मादुदेतु ॥

शास्त्रान्ते मङ्गलमाचरणीयमिति सर्वमङ्गलमूर्द्धाभिषिक्तं नारायणसूक्ति-रूपं मङ्गलं प्रस्तूयते—

"सहस्रशिरसं देवं विश्वाक्षं विश्वसम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं प्रभुम् ॥
विश्वतः परमं नित्यं विश्वं नारायणं हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥
पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥
नारायणं परं ब्रह्म तत्त्वं नारायणः परः ।
नारायणः परं ज्योतिरात्मा नारायणः परः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायणः परो ध्याता ध्यानं नारायणः परः ।
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वसम्भुवम् ॥
पद्मकोशप्रतीकाशं हृदयं धार्य्यते सुखम् ।
अधस्तिष्ठति वितस्त्यान्तु नाभ्यामुपरि तिष्ठति ॥
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ।
सन्ततन्तु शिरोभिस्तु लम्बत्याकाशसन्निभम् ॥
तस्यान्तं सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतो मुखः ॥
सोऽग्र उद्विभजन् तिष्ठन् आहारमजरः कविः ।
तीर्य्यगूर्ध्वमधः कार्य्या रश्मयस्तस्य सन्तताः ॥
सन्तापयति स्वं देहमापादतलमस्तकम् ।
तस्य मध्ये वह्निशिखा अणीवोर्ध्वं व्यवस्थिताः ॥
नीलतोयजमध्यस्थविद्युल्लेखेव भास्वरा ।
नीवारशुकवत्तन्वी पीता भास्वत्यणूपमा ॥
तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतसं विरूपाक्षं विश्वरूपाय वै नमः ॥
ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ।

॥ इति नारायणसूक्तम् ॥

इति श्रीआयुर्वेदरत्नाकरवैष्णवधर्मसंरक्षकवैद्यरत्न—
पण्डितप्रवरब्रजविहारिचतुर्वेदिविरचिते

मनोविज्ञानशास्त्रे—उत्तरार्द्धं समाप्तम् ।
॥ शास्त्रञ्चेदं समाप्तमिति शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वैद्यरत्न महोदयानां व्रजविहारि चतुर्वेदिनां वंशवर्णनम्

१

निधायाङ्घ्रिद्वन्द्वं हृदि समकरन्दं सरसिजं
विहायान्यं कामं कर्मपि निजकामं कलयितुम् ।
इव व्यासः श्रीमच्चरणयुगदासः पुनरयं
समं श्रीमद्वंशं जगति हरिवंशं प्रथयते ॥

२

अस्ति क्ष्मातलमण्डनं गुणगणप्राप्त प्रकर्षोदयम् ।
किञ्जल्कः कमले जले च कमलं तारा पथे चन्द्रमाः ।
राष्ट्रे राजित नेपुराऽभिधपुरं वर्णै श्चतुर्भिर्वृतं
विद्वद्भिर्धनिभिर्महामहिमभिर्विज्ञानिभि र्वेष्टितम् ॥

३

आसँस्तत्र तदीयवंशज जना विद्याब्धिपारङ्गताः
श्रीमद्गौतमजैमिनि प्रभृतयः प्राप्ताऽवतारा इव ।
विख्याता भुवि पंक्तिपावनगिरा साराश्च संसारिणाम्
हाराः सर्वजनेषु राज्ञि यवनेऽप्यत्यन्तसम्मानिताः ॥

४

लोकख्यातसमृद्ध गोरखपुर प्रान्तान्तरोऽत्रासिनि
प्रान्ते देवरियेति सर्वविदिते सम्प्राप्तसर्वोदयैः ।
नीरान्तर्गत पद्म केसरलसत्कान्ति प्रति स्पर्द्धिनि
सम्प्राप्ता "महुऐ" समाख्यनगरे तत्रत्य सम्प्रार्थिताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५

तत्राऽपि स्वगुण प्रगीत यशसः संशिक्षयन्नर्थशः
सर्वे तत्पद पद्म नम्र शिरसः सम्भूय वैसङ्गसः ।
त्यक्त्वा सन्तत भावनैक मनसः कार्य्यान्तरं प्रायशो
भाजः सत्वरमाशिरादिवचसः सम्यक् श्रितश्रेयसः ॥

६

साङ्गं वेदमनेक शाखमखिलं शास्त्रं पुराणादिकं
सर्वं सम्यगनारतं द्विजगणानध्यापयन्तः स्वयम् ।
कुर्वन्तः श्रुतिबोधितामथ परानाचारयन्तः क्रियां
ख्याताः सर्व दिशासु सर्व जनता मान्यास्तथैवाऽभवन् ॥

७

के चित्तत्र चिरंस्थिता निजगुणा कृष्टैर्जनै रर्थिता ।
येषां वंशपरम्परागत जना स्तिष्ठन्ति सम्प्रत्यपि ।
के चित्तत्रगुणार्थिता अपि निज श्लोकस्य वृद्धौ तथ।
मातुर्वंश भवोपदेश कृतये हाजीपुरे संङ्गताः ॥

हाजीपुर वर्णनम् ।

८

सेवांयस्य विधातुमागतवती नारायणी स्वर्गतो
गंगाऽपि त्रिपथाश्रिताऽपि च तया सम्भूय सेवापरा ।
सम्भूयैव चिरं तदीय विरहं सोढुं न चैव क्षमा
मन्ये नायकमेकमाश्रितवती सेवा परा स्त्रीद्वयी ॥

९

आसीद्यस्य समीपवर्तिनि जले युद्धं गजग्राहयो-
र्ग्राहेणाभिभवं गतः करिवरो मज्जन्नगाधे जले ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णुं चक्रगदाधरं निजपदे पश्यन् करं साम्बुजं
प्रोत्क्षिप्यार्त्तिवचः प्रधान वचसा क्षिप्रं नमन्मोचितः ॥

१०

ज्ञात्वाऽशेष विशेषमाशु नगरं स्वं स्वं परित्यज्य च
प्राप्तौ यस्य दिदृक्षयेव निकटं सम्भूय वासङ्गतौ ।
प्रेम्णातत्र चिरं स्थितौ हरिहरौ दृष्ट्वैव मुक्तिप्रदौ
यन्नाम्नाऽपि च कीर्त्यते "हरिहर क्षेत्रं" जगन्मण्डले ॥

११

दृष्टयै यस्य समागता दशदिशः कौतूहलेनान्विता
यानैः प्रोद्भटवारणैरविमितैर्गोभिर्वृषै र्वाजिभिः ।
पण्ये सन्महिषैः क्रमेलकवरैर्नानाविधैर्वस्तुभिः
सम्भूयोत्सवमाचरन्ति सुचिरं काले शरत्संज्ञके ॥

१२

यन्माहात्म्य–विशेषलुब्धहृदयः सम्राड् विचारालयं
यस्यैवान्तर चारिणं प्रकृतवन् प्रान्तोपकार प्रदम् ।
यत्संलग्न विशालधूमशकटा रोहावरोहस्थलं
दृष्ट्यै सन्तत मागतस्य कृतये देशाद्विदेशादपि ॥

१३

यत्संस्पृष्ट नदीजलं सुविमलं पानावगाहक्षमं
पुण्योपार्जनमानसैः सुकृतिभिः संसेव्यमानं सदा ।
मुक्तौ लोलुपचेतसां मृतवतां शश्वत्समागच्छता–
मन्त्येष्टि क्रियया परं कुनहराघट्टः प्रसिद्धोभुवि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४

स्थानं रामपदाङ्कितं सुललितं मुक्तिप्रदं देहिनाम्
यस्यैवान्तर चारिसर्वजनता दृङ्मानसोल्लासकम् ।
यस्मिन् लक्ष्मणदास इत्यभिधया ख्यातो यतीनांवरो–
युक्तो योगि विरागिभिः कतिपयैः स्नेहेन सेवापरैः ॥

१५

विश्वामित्र वशिष्ठ गौतम मनुस्पर्धस्तपस्यादिभि–
र्वृद्धैरप्यति सङ्ख्यवर्षवयसा न ज्ञातजन्मक्षणः ।
धातेतिप्रथितोजनं सुसुखिनं साधूपदेशैः सृजन्
रक्षन् विष्णुरिति प्रथामुपगतः शश्वच्छुभाशीर्गिरा ॥

१६

दुःखं शम्भुरिति स्मृतः परिहरन् सर्वस्य कारुण्यतो-
ब्रह्मैवेति समष्टिभाव निगद व्याख्यातविश्वात्मतः ।
सर्वश्रेयसि योजयन्नुप दिशन् योगादिकं सर्वदा
युञ्जन् योगमनारतं चिरतरं यातः समाधिपरम् ॥

१७

यस्मिन्मानसहारि कल्पतरुभिः स्पर्धान्वितैराम्रकै
र्युक्तं सर्ववनन्तु नन्दनवनस्पर्धान्वितं सर्वदा ।
सर्वैरप्सरसां गणैर्विरचितस्पर्धाः सुपौरस्त्रियो–
देवस्पर्धिसुशिष्यपाठिगुरवः स्पर्धापरा धीषणे ॥

१८

यस्मिन् सर्वजनस्यवर्णनपथाऽतीता समृद्धिः परा
यन्नाम्नाऽपि सदेवहाटकपुरं हाजीपुरं गीयते ।
यस्मात्स्वर्णपुरं धनागमवशात्ख्यातंपुरं साम्प्रतं
लोके सोनपुरं प्रगीयतइदं ज्ञातं न केषामिह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९

संवासश्रयणात् सदैव सृजतां स्वांस्वां प्रजां वेधसां-
विष्णूनामनुरक्षतामनुपलं वासोन्नपानादिभिः ।
शम्भूनां हरताश्चदुःखनिवहं देवैर्निजैर्वज्रिणां
क्रीड़ामाचरतां यदद्रिपुरतो ब्रह्माण्डकाण्डायते ॥

२०

यस्मिन् विस्तृत सौध पंक्तिसितिम प्राप्तप्रभासोदया-
नाकांक्षन्ति जनादलेऽपि बहुलेदर्शेऽपिचन्द्रोदयम् ।
यस्मिन्सन्ततवासि सर्वजनतातेजः प्रभावोदय-
प्राप्त ब्रह्ममरीचिकार्य्यसुखिनः शीतेऽपिसूर्य्योदयम् ॥

२१

क्रीड़ासक्त परस्परास्यपवनामोदानुभूत्याश्रय-
क्षीणावस्थ रविश्रमोद्भवमनः खेदोद्भवक्षुष्टयः ।
यस्मिन्नोमलयानिलंह्वदि नवाकांक्षन्ति कस्तूरिकां
नैव स्नानविलेपनादिरचनां नैवान्नपानादिकम् ॥

२२

यस्यप्रान्त समन्ततः स्थितिभृतः सन्नद्धता माश्रिता-
आम्रास्तालवनं तथैवकदली नारायणीजाह्नवी ।
स्वैः स्वैः स्वादुफलैर्मनोहरतमैः पुण्यैस्तथावारिभि-
र्नानादिग्भ्य उपागतस्य पुरतः सत्कारमाकुर्वते ॥

२३

नानादिग्भ्यउपागता अतिथयः स्नानान्नपानादिभि-
र्वस्त्रालंकरणादिभिश्च सततंसत्कृत्य पूजांगताः ।
आहूताध्वजग्राहिभिः पवनतः सञ्जातचेष्टैः करै
र्येनोर्ध्वंम्प्रसृतै रिदंतुमनतंकेपान्नदङ्मार्गगम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४

आतिथ्यं दशदिग्भ्य आगतजने कर्तुं यदूर्ध्वीकृतै
दीर्घैं स्तालशिरश्चयैश्च परितोऽविश्रान्त मालोक्यते ।
भ्राजच्छश्वदगण्यपण्य विलसद्वीथीच्छटाराजितम्
विभ्रत्सर्व विशेषमेतदधुना सर्वोपरिभ्राजते ।

२५

यस्मिनन्पक्क रसाल ताल कदली खर्जूर सर्जासन–
प्राच्याम्रातक नारिकेरपनसैः सम्भूयसम्पादितैः ।
आमोदैरनुवासिताः सुमरुतश्चेतश्चमत्कारका–
दूरादेव समाचरन्ति सततं त्वभ्यागतस्वागतम् ॥

२६

यत्स्वर्गञ्चमहर्जनस्तपइदं सत्यं जनो मन्यते
भुञ्जत्सातिशयं सुखं क्वचिदपिप्रान्ते च दुःखास्पृशम् ।
ब्रह्मानन्दमनारतं त्वनुभवन् श्रेयः पदञ्च क्वचि–
द्दिष्ट्यारक्तविरक्त सर्व मनुजे स्वर्गापवर्गायते ॥

२७

यस्मिन्स्वान्तविनोदकारि विषयान्भुञ्जंश्च सर्वानपि
स्वर्लोकादिसुखञ्च चेतसिजनो नैवाधिकं मन्यते ।
ब्रह्मानन्द सहोदरं सुखमपि स्वान्ते समासादयन्
मुक्तिंप्राप्तइव स्वयं स्पृहयतेगन्तुं नचैव क्वचित् ॥

२८

प्रान्ते क्वापि वसन्ति सम्प्रतिजना ज्ञानादिभाजः परं
कुर्वन्तः सततं क्वचित् कतिपये पूर्तेष्टिहोमादिकम् ।
दानंक्वापि समाचरन्ति च तपश्चान्द्रायणादि क्वचि–
च्चेत्थं सम्प्रति राजते च सततं यस्मिन् युगानांचयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२९

स्वाध्यायञ्चरतां क्रमेण यजनं दीर्घां तपस्यामनु
ब्रह्मध्यान मनारतं विदधतां सर्वत्रसदभावतः ।
यस्मिन्नाश्रम सर्व साधु विलसन्माहात्म्यमानन्दय-
त्सर्वानेव समागतान्विलसति ख्यातं जगत्यामपि ॥

३०

यस्मिन् वारवधूजने विजयते गान्धर्ववेदः स्वयं
यस्मादेव विनिःसृता त्रिजगतां कल्याणमातन्वती ।
नानादिव्यरसायनौषधगण प्राज्य प्रचारा चिरा-
दायुर्वेदकथा प्रथाऽत्र भुवनेऽजस्रंनरीनृत्यते ॥

३१

एकंवेदमनेकशाख-मखिलैरङ्गै रुपाङ्गैर्वृतं
द्वौत्रीन् वाचतुरस्तथैव पठतां सद्भाव संसूचनम् ।
चातुर्वेदिजनेन यत्रवसता संशृण्वतां पश्यतां ।
न्यायः कैमुतिकः करोतिसततं प्रत्यक्षमक्षम्प्रति ॥

३२

यस्मिन् सर्वसमृद्धशालिनिपुरे हाजीपुरे संवसन्
मातुर्वंश परम्परागतधनं सम्प्राप्नुवन् वर्धयन् ।
शश्वद्दीनजनेव्ययं विरचयन् सत्कर्म्म सर्वंचरन्
कीर्तिं सर्वदिशासु विस्तृततमां शुभ्रां समुल्लासयन् ॥

३३

श्रीरामेतिसभाख्ययैव विदितं नृणां समाक्रीड़नं
वेत्तावेद चतुष्टयस्य तदिदं प्रख्यात्यु-पाख्यापदम् ।
श्रीराम प्रथमावसानग चतुर्वेदीति नामाक्षरः ,
ख्यातस्तत्रतदा तदातन जनैर्मानादिभिः सत्कृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८

३४

तस्यासन् जगतीतले दशरथस्येवात्मजाः सत्तमा–
श्चत्वारो "जयराम" नामविदितोरामः पुरोजन्मभाक् ।
तत्पश्चाद्भुवि रामलोचन इति प्रख्यापदख्यापित–
स्तत्पश्चाच्च सुलोचनोऽजनिसदायुक्त शिवस्तत्परः ॥

१०

३५

तत्राद्यस्य सुतद्वयं गुणगणैः श्रीरामकृष्णानुगं
जातं "रामनिशा" सुधेतिविदितं यद्वंशजाः सम्प्रति ।
तत्राप्याद्य महाशयाङ्ग जनितं रत्नत्रयम्भूतले
कन्यैकातनयद्वयं शिव "मणि" प्राग्वर्तिरामान्तिमम् ॥

३६

तत्राद्यस्य सुतत्रयं समभवद्भूषणं कर्म्मतः
श्रीमद्भैरव संज्ञकः प्रथमजो गंगा च वेणीपरः ।
अस्यद्वौ तनयौ सुते "महुअइ" ग्रामे सुपाणिग्रहे
त्वन्त्यस्यापि च कन्यके पुरि "नवापारे" च यद्वंशजाः ॥

श्रीमद्भैरववंशजः "शिव" युतोदीनो विहीनः सुतै
गंगा नामहाशयस्य तनयाश्चत्वार एकासुता ।
तन्नामानि "गणेश" एषपुरतो रामादिदीनः परः
श्रीमद्रामसमो गुणै रघुवरो नाम क्रियाभ्यासमपि ॥

३८

आख्यातः शिवशंकरोऽपि च शिवः कन्याख्यया "रुक्मिणी"
येटाराख्य पुरे कृतोपयमना पाण्डेय वाँकेसुता ।
रामोदारसुतं तथा सुतनयां "वेणीसमासादयत्"
तत्राद्यस्य सुतत्रयश्च तनयायुग्मञ्च भूभूषणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३९

श्रीमान् मोहनसंज्ञकः प्रथमजो मालीवनादिः परः
.दर्वारीति च तेत्रयो हरिहर ब्रह्मावतारा इव ।
तेषांम्पुत्रचतुष्टयाद्दशरथः श्रीमोहनोऽमन्यत
तत्रद्धा "ववध" व्रज प्रथमतः श्लिष्य द्विहारीपदौ ॥

४०

रामः कृष्णइह स्वनामगुणतः प्राप्तावतारावि
त्रेताद्वापर संज्ञकं कलियुगं सर्वस्य संसूचकौ ।
स्वीयं वासपुरं तथैव मथुराऽयोध्येति विख्यापका
वेतद्वावरज द्वयस्य विशदं प्रख्याति नामाक्षरम् ॥

भ्रातृचतुष्टये प्रथमस्य वर्णनम् १

४१

तत्रापि प्रथमश्च तातरहितो वालानुजोऽनाश्रयो-
युक्तोऽनेकजनैर्भजत्स्वयमपि स्वल्पं वयो निर्धनः ।
एतस्मिन्नपि दुःस्थितेऽपि विषये बुद्धयानिजान् पालयन्
प्राच्यावाच्यवचः पठन् स्वयमपि स्वीयान्स्वयम्पाठयन् ।

४२

विद्वत्तामनुजेषु सम्पदमपि प्राज्यां सुसम्पादयन्
नीतिंमोदफलेपुरे प्रकटयन् सत्पाटलीपुत्रके ।
वृत्तिंस्वानुज वर्ग योग्य विशदां तत्तत्स्थले कल्पयन्
सर्वं स्वेन च रक्षितम्परिजनं सानन्दमालोकयन् ॥

४३

आनन्दंव्यवहारतः स्वयमपि स्वान्ते समासादयन्
वेदान्तं सुविलोकयन् स्मृतियुतां पौराणवार्तां श्रयन् ।
संसारञ्च निभालयन् सुविरसञ्चित्ते परम्भावयन्
ब्रह्म ब्रह्ममितं विहायसकलान् ब्रह्माभवच्छाश्वतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४४

सोऽयं श्रीवसुदेव एव जनितौ श्रीकृष्णरामात्मकौ
यन्नारायण शब्द नाम चरमौ प्रेमप्रसिद्धान्वितौ ।
एकोन्यायविचार कार्य्य कुशलस्त्वन्यश्चिकित्सापर
स्तेनाभ्यां सकलोपकार करणाज्जातः कलिद्वापरः ॥

४५

तत्राद्यस्य सुतत्रयं समभव-द्रुद्रोमहेशोरमे
शःकन्या प्रतिभा परस्यच तथा कन्या प्रभाजायत ।
श्रीसत्पूर्वज धर्म्मतः प्रथमतः स्वीयार्जवाद्यैर्गुणा-
स्तेभ्यो वंशपरम्परा च भवतादित्येवमाशीर्वचः ॥

वैद्यराज वर्णनम् ।

४६

यद्ब्रह्म प्रकृतेर्विधिर्हरिहरौ पुत्रागुणैः कल्पिताः
कन्याः सांख्य मतेन बुद्धिमतयः सर्वैर्गुणैरन्विताः ।
यस्मिन्सर्जन-पालनान्तकरणं शक्तित्रयं वर्तते
येन क्रीड़नकै रलौकिकतमैर्बाल्येऽपि कृष्णायितम् ।

४७

ज्येष्ठभ्रातृपदाब्ज संश्रयवशा त्सर्वासुविद्यास्वपि
प्राप्तप्रौढ़ विचारशक्तिकतया काशीं समागत्यच ।
आयुर्वेद-विचारकौशलमपि प्राप्तं जगद्रक्षितुम्
कृष्णेनेव च येन बाल्यसमये विद्याब्धिपारः कृतः ॥

४८

यत्किञ्चिद्गुरुणाऽनयेति गदितं द्वित्राणक्रप्रामिकं
तत्सर्वं बहुमूल्यकं निजपणैरानीय पादेऽर्पितम् ।
गत्वारामपदादिकृष्णनिकटं वैदुष्यजिज्ञासया
किं किं शास्त्र मुपासितं त्विदमिदं प्रश्नोत्तरे संस्थिते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४९

आयुर्वेदविचार-शास्त्ररहितं सर्वं न संशोभते
तद्विद्यादिति सत्यवाक्य-ममृतं पीतं सुसम्पादितम् ।
काश्यां किञ्चिदपि प्रपठ्य कलिकातामेत्यसर्वं द्रुतम्
कार्य्यार्थीनतथा सुखं गणयते दुःखं मनस्वीजनः ॥

५०

गत्वोमाचरणं स्वशिष्यनिवहा-नध्यापयन्तं सुखं
कृत्वापंक्ति विचारणेच चकितं काश्याञ्जयं लब्धवान् ।
श्रीमन्तं विजयादिरत्नमतुलं श्रीकालिकातापुरे
संकुर्वन् मुनिशब्द वाच्यकथने मूकं जयं लब्धवान् ॥

५१

येनस्वीय पुरेस्वधीति विषया शाला विशाला कृता
छात्राणामशनादि सर्वं विषया साध्वी व्यवस्थाऽऽदृता ।
आर्त त्राण कृतेमहान् विरचितः शुभ्रश्चिकित्सालयः
प्रासादः परिवारवासकृतये त्वभ्रंलिहो निर्म्मितः ॥

५२

सोयं श्रीव्रजपूर्व संगमलसच्छ्लिष्यद्विहारीपदो
नाम्नालौकिक सर्वकार्य्यकरणाच्छ्री कृष्णचन्द्रः स्वयम् ।
सर्वं साधुविधाय कीर्तिमचलां संस्थाप्य हाजीपुरे
ख्यात्यै पाटलिपुत्र नामनगरं श्रीद्वारकामागतः ॥

५३

तत्र ब्रह्म विचारणे श्रुतिशिखाः सांगाः समालोचिता
धर्म्मस्याकलने विधिश्रुतिगतः पूज्यो विचारः कृतः ।
काणादेऽपिच गौतमीयवचने पातञ्जले कापिले
साहित्यस्मृतिजात पाणिनि कृतौ पौराण वार्तास्वपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५४

आयुर्वेदविचारणे प्रवटितः स्वीयः प्रकर्षः परः
कारुण्येन जगत्त्रयोप कृतयेऽनेकेनिबन्धाः १ कृताः ।
लोकानां हृदिभावितः स्वविषयः कृष्णावतारः परः
स्वीयैः शिष्यगणैर्गुणेन च समैर्भूमण्डलं मण्डितम् ॥

१ शास्त्र तत्वेन्दुशेखर शास्त्रतत्वरत्न त्रुटिविवेक आयुर्वेदतत्वरत्नाकर,

५५

यस्मिन्विष्णुरितिप्रतीति रखिलस्वान्ते जगत्पालनात्
सद्बुद्धेर्जननाज्जनस्य हृदये धातेतिलोके मतिः ।
नाशाद्दुष्टमतेस्तथा शिव इति स्वान्ते नकेषांमति-
र्ब्रह्मैवेति समष्टिभाव निगद व्याख्यात मस्मन्मतिः ॥

५६

व्यासः स्वात्म विचारणाच्छ्रुति शिखावाक्येन सांगेनच
न्यायादीश्वरसाधनादवयवात्पञ्चात्मकोद् गौतमः ।
आदानात्कणशः कणाद इति च द्रव्यादितत्वस्यच
धर्मस्याकलनेन जैमिनिमुनिः श्रुत्यर्थमीमांसया ॥

५७

व्यक्ता व्यक्त विवेचनेन कपिलः सम्यक्सहैवात्मना
योगेनाथ पतञ्जलिः प्रकटितः शब्दाश्रयात्पाणिनिः ।
काव्यं दृश्यमुदाहरंश्चभरतः श्रव्यञ्च काव्यं तथा
रीतिं दोषमलंकृतिं गुण मपिव्यादर्शयन् वामनः ॥

८

आयुर्वेदविचारणेन चरको धन्वन्तरि र्वाग्भटः
शुश्रुद्वेति विकल्प जालमखिलं व्याप्नोति यस्मिन्मनः ।
सूतः शौनक एष एव सततं पौराणवार्त्ताश्रय
स्त्राचार्य्यः सकलाञ्जनानुपदिशन् तातश्चवापालयन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५९

इष्टानन्दातुमना वरानभिमुखं काली सदैव स्थिता
लक्ष्मीः सर्व समृद्धि साधनपरा हस्तस्थिता राजते ।
जिह्वाग्रे च सरस्वती मधुरयावाचा नरीनृत्यते
वैशिष्ट्यं तदिदं सुदुर्लभतरं नागोचरम्पश्यताम् ॥

६०

कारुण्यादि–जलप्रवालपतिताः केवा न संसारिणो
भक्तिः पण्डित मण्डलीषु परमाशक्तिर्जये वादिनाम् ।
प्रेमाप्रेम समाश्रितेच सकले स्थेमानमालम्वते
तेजः सर्वविपत्त–तापन परं सूर्य्यं प्रतिस्पर्धते ॥

६१

कीर्तिः सर्वदिशं सदाविमलयन्ती चन्द्रिकां स्पर्धते
ख्यातिः सर्वजन श्रुतिप्रणयिनी त्रैलौक्यमाक्रामति ।
बुद्धिः सर्वपदार्थजात-विषया याथार्थ्यमालम्वते
विद्यास्वान्ततमस्तिरोविदधती हृद्यानवद्या भुवि ॥

६२

सर्वप्राणि मनोऽनुरञ्जनपरं शीलं स्वभाव स्तथा
सद्भावश्च तथार्जवं निजजने स्नेहः परश्चादरः ।
नैपुण्यं परमं समव्यवहृतावध्यापने पाटवं
सर्वस्योपकृतिः परेत्थमुदितो यस्मिन् गुणानांचयः ॥

६३

पूर्वंशुक्ल गृहेवसन् क्रमवशादभ्युन्नतिं प्राप्नुवन्
रक्षन्दीनजनान् सहस्रयुगतो द्रव्यं परश्चार्जयन् ।
आयुर्वेद विचार कौशललसच्छ्रवक्रियापाटवा–
त्सर्वान् वैद्यजनानधो विरचयन् रिद्धः स्वहस्तादिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६४

तेजः सम्प्रथयन् स्वशत्रुजनता स्वान्तं परन्तापयन्
कीर्तिंस्वां दशदिक्षु च प्रकटयन् लोकातिगैः स्वैर्गुणैः ।
आलापैर्मधुरैः परान्किमुजनान्प्राज्ञोऽपि सम्मोहय-
न्नानन्दं जनयञ्जनस्य हृदये दानैश्च मानैरपि ॥

६५

शास्त्रे वादकथासु तत्त्वविषयं कुर्वन्परं निश्चयं
जल्पेऽनल्पगिरा प्रकल्पनवशात् कुर्वन्जयं जातया ।
मूकानाशु वितण्डयैव रचयन् वाचासुधीरानपि
प्राज्ञान्प्रत्यत एव विभ्यतिपरं केवाऽपरेषां कथा ॥

६६

स्वातन्त्र्ये सतिसम्भवे परगृहेवासः सतांनोचितः
कृत्वाचैव-मनल्पकल्पनमपि स्वीयम्परन्दर्शयन् ।
प्रासादं यदुशिल्पिभिर्विरचयन्नभ्रंलिहाग्रं शुभं
द्रष्टॄणाञ्चमनोहरं सुखकरं त्वष्टुश्चमत्कारकम् ॥

६७

नारीणाञ्चनृणां तथागतवतां नानाविधस्यौषधे-
र्हासानाञ्च गवां तथैवपठतां पर्य्याप्तवासक्षमम् ।
तल्पञ्चैव सुखासनञ्च कशिपुः संख्यामति क्रामति
गावः क्षीरसमुद्रतामुपगताः कृष्यन्ति चक्षुर्नृणाम् ॥

६८

नारीचाप्सरसं नरश्चविबुधं गौः कामधेनुन्तथा
प्रासादः कनकाचलं जलनिधिं गंगाप्यतिक्रामति ।
स्वान्ते चित्रमिदन्तुनैव कलये नाम्नैव विख्यापितो-
लोकानांहित काम्यया त्ववतरन् कृष्णस्तुयत्रस्वयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६९

आरोहस्यकृतेऽवरोहणकृते वाह्ये तथाऽभ्यन्तरे
सोपानानि च यत्र सन्ति शतशो नानाविधैर्धातुभिः ।
विन्यस्तानि शुभानि कीर्तिगणनात्कार्य्याय रेखाइव
मन्ये वर्णननायकस्यजगतां मान्यस्यसम्यक् स्फुटा ॥

७०

नाम्ना कीर्तिगुणव्रजेन भुवने विष्णुत्वमाख्यापितम्
येनैव प्रतियन्ति सत्वरमिमे संगत्यचैकाग्रतः ।
शंखं चक्रगदारि पद्ममिलितं विष्णुत्वविख्यापकं
हस्ताब्जद्वय पादपद्मयुगले चिह्नन्तु पश्यन्तुते ॥

७१

दृष्ट्वा स्वीयगुणैः समंगुणचयं ज्ञात्वा च नाम्नाहरिं
स्वात्मानं हृदिभावयंश्च मदनं सम्मोहयन् शंकरम् ।
धात्रावर्णिततुल्यतां हरिहरस्तोत्रे च सम्यक्स्मरन्
स्नेहं स्वीत्मतया चकारपरमं श्रीमालवीयः स्वयम् ॥

७२

माधुर्य्यञ्च हितानुबन्धिनि सहालापे च यच्छ्रूयते
यच्छास्त्रीय कथाऽमृताशनविधौ तृप्तिश्च नोजायते ।
नैतच्चित्रमिदं परस्परवचः संलापनं स्वेतयो-
र्विष्णुत्र्यम्बकयोः प्रसिद्धविदुषोः सोदर्य्ययोर्मन्यते ॥

७३

सोऽयं नाम निवेदितं निजपरं कृष्णावतारं स्मरन्
साधूनामुपकारकं करुणया दुष्टस्य संहारकम् ।
तन्तत्ख्यातिशयं स्मरन्निजकृतं पूर्वं युगे द्वापरे
सर्वस्योपकृते समं प्रकटयत्यस्मिन युगेऽपिद्रुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७४

पूर्वं नामपरञ्च काममखिलं सम्पादयन् दृश्यतां
शास्त्राणां पठनं पुरा गुरुकुले लोकोपकारस्ततः ।
तत्तत् कार्यमलौकिकं रचयितुं नामानुसारि प्रियं–
पश्चाज्जन्मभुवः परत्र गमनं देशे नदीवेष्टिते ॥

७५

ग्रामः पाटलिपुत्रतां परिहरन् यद्द्वारकात्वं गतो–
गंगेयं त्रिपथाश्रिता सुरनदी यत् सागरत्वं गता ।
नैतच्चित्र मिदं पुरापि विवुधा गोपालतामाश्रिता
श्वेतः प्रीति कृतेऽवतार समये देव्यश्च गोप्योऽभवन् ॥

७६

यद् गंगाम्बुसमुद्र वेष्टितवपु निर्मीयते सुन्दरं
यन्नाना विध सौध पंक्तिषु नृणां त्वष्टुः परं कौशलम् ।
यत्स्वाम्यस्य समुद्भवद्गुणगणो नाम्नैव कृष्णः पर
स्तेनेयं नगरी भविष्यति परं सत्यं नवा द्वारका ॥

७७

यच्छम्भुश्च समागतः सहशिवः प्रागेव चालोकितुं–
शास्त्राध्यापनसद्म सुन्दरवपु र्यद्भाविशिष्यालयः ।
आयुर्वेद विचारणार्थ मनिशं यत्स्याच्चिकित्सालयो–
रोगार्तालय निर्मितिः क्वचिदपिस्याद् यद् गवामालयः ॥

७८

देशेकापि भवेदनाथजनता सद्मापि पद्मालयः
पाकस्यालय निर्मितिः क्वचिदपिप्रान्ते भवेद् यच्छुभा ।
यन्नानौषधवृक्ष शाल्युपवनं स्पर्धान्वितं नन्दने
स्यादेतेन पुरीयमत्र जगति स्पर्धिष्यते द्यामपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७९

विद्वांसो गुरवः स्वशिष्य निवहान् यत्पाठयन्तेऽमरान्
त्वष्ट्रा शिल्पिभिरागतैर्यदनिशं निर्मीयते सुन्दरम् ।
यन्मर्त्यैस्त्रिदशैः शुभार्थ मिलितैरिन्द्रोभवान वेष्ट्यते
तेनेयं नगरी करोति च तिरो मन्ये पुरीं वासवीम् ॥

अथाऽस्यद्दिनचर्य्या वर्णनम् ।

८०

रात्रेरन्तिमयामबुद्धहृदयः शय्यां द्रुतं सन्त्यजन्
भृत्यान् स्वान् परिचारकान् कतिपयैः शब्दैः सुसम्बोधयन् ।
स्नानान्तं स्वशरीर कार्य्य मखिलं शीघ्रं सुसम्पादयन्
चैलादिश्च कुशोत्तरं सुखकरं सिद्धासनं त्वाश्रयन् ॥

८१

सन्ध्यावन्दन मश्चरन् सुर ऋषीन् पितॄँश्च सन्तर्पयन्
गायत्रीं प्रजपन् शताधिक मितां ध्यायन्निजां देवताम् ।
पूजां सर्व विधिं हृदा हरिहरब्रह्मादिकस्याचरन्
नैवेद्यं सविधे सुपात्र लसितं नानाविधं चार्पयन् ॥

८२

मध्वाज्यैर्दधिदुग्ध गाङ्ग सलिलै र्विष्णुं शिवं स्नापयन्
कर्पूरेणाच केशरेण सहितं श्रीखण्डमालेपयन् ।
दुर्वाभिः सहपुष्प विल्व तुलसी पत्राण्यु पर्य्यर्चयन्
क्षन्तव्यत्व मथार्जवेन सहजप्राप्तत्रुटेः प्रार्थयन् ॥

८३

मूर्ध्ना च प्रणमन् विसर्जन मथागन्तुं जलेनाचरन्
भद्रं सर्वजनस्य सर्व समये स्वान्तेन सम्प्रार्थयन् ।
इष्टं देवमनुस्मरन् स्वहृदये नान्यं परं भावयन्
संसारं कलयँश्च दुःखबहुलं त्यक्तैषणोवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८४

श्राद्धं श्रीवलिविश्वदेव सहितं नित्यं सुसम्पादयन्
होमंञ्चापि समाचरन् सुविविधैरर्कादि काष्ठैः शुभैः ।
पुष्पैः पत्रपलासकुन्दवकुलै रक्तै र्गवां सर्पिषा
साकल्यैः शुभतण्डुलादि रचितैः स्तोत्रं पठन् सुस्वरम् ॥

८५

स्वल्पैर्मोदक शष्कुलि प्रभृतिभिः प्राणान् सुसन्तर्पयन्
सर्वं सत्वरमष्टवादसमयं यावत् सुसम्पादयन् ।
दीनान् दुःख समाकुलान् बहुजनान्नानादिशश्चागतान्
रक्षन्नौषधदानमानकरणैं र्घण्टाद्वयम्प्रायशः ॥

८६

आहूतश्च जनै र्ज्वरादि विविधैर्दुःखै र्भृशं पीड़ितैः
गत्वातद्गृहमौषधैश्च विविधैः पथ्योपदेशादिभिः ।
रक्षां साधुविधाय वादनयुगं वेश्मागतः स्वं पुनः
सन्ध्यां मध्यदिने भवांश्च विधिवत् स्नानादि पूर्वांचरन् ।

८७

मध्याह्ने भुजिमाचरन् वहुजनैः सार्धञ्च नानाविधां
शय्यामाशु समाश्रयन् सुविमलां निद्रां नचैवाश्रयन् ।
शास्त्रालोचनमाचरन् कतिपयान् शिष्यान् समध्यापयन्
आलापञ्च समागतैः सुमधुरं तथ्यंहितञ्चाचरन् ॥

८८

आहूतः पुनरेवदुःखिनिवहैर्गत्वा च तत्तद्गृहं
रक्षन्नौषधदानपथ्य विधिना सायं पुनश्चागतः ।
शास्त्रालापमुपाचरन् कतिपयैरायव्ययं दैनिकम्
पश्यन् वादनवात्मकञ्च समयं यावत् सुसन्तोपतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८९

स्नानंसान्ध्य विधिं तथा भुजिमपि स्वीयैः सहैवाचरन्
शय्यामध्यगतः पुराणकथया कालञ्च कञ्चिन्नयन् ।
घण्टापञ्चमिते निशीथ समये स्वास्थ्याय निद्रां भजन्
संज्ञां सत्वरमाश्रयन् परदिने सर्वं तथैवाचरन् ॥

९०

इत्येवं दिनचर्य्यया स्वसमयं पुत्रैश्च पौत्रैः सह
प्राज्ञैराप्तजनैर्हितार्थकथया सर्वस्य संयापयन् ।
कार्यैरन्यजनस्य दुर्लभतमैर्विष्णुत्वमाख्यापयन्
नाम्ना चात्रयुगे स्वयं विजयते कृष्णावतारः परः ॥

९१

वैशिष्ट्यं सुनिभाल्य सर्वमभितः कीर्तिं गुणानांव्रजं-
योग्यं योग्यतमायदेयमिति च स्वान्ते विचार्य्योऽपिच ।
रत्नं सर्वजनेषु रत्नपदतः श्रीमन्तमाभूषयत्
सम्प्रत्येव चिराद् गुणज्ञ पदवीं सम्राट् समासादयत ॥

अथास्य परिवार वर्णने पूर्व पत्नी वर्णनम् ।

९२

श्रीरुक्माङ्गद धर्मभङ्ग जननी ब्रह्मात्मजा मोहिनी
मन्दारेऽभ्युदितोऽथ भैरवपुरे या स्वेच्छयान्तर्हिता ।
सेयं पूर्व सतीव पर्वतभवा त्वार्याख्यया जन्मभा-
गुत्पाद्यैकसुतं परं हरिपुरो नारायणं संस्थिता ॥

अस्याः पुत्र वर्णनम् ।

९३

सोऽयं सर्वगुणेन सर्व जनता चेतश्चमत्कारको-
दैवी वाक् परिशीलिता प्रथमतो भाषाततश्चाङ्गला ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्राणां परिशीलनं विरचितं बुद्ध्याल्पकालेन वा
आयुर्वेद विचार कौशलपरो रक्षां विधातुं नृणाम् ॥

६४

पूर्वं स्वीय पुरेच भागलपुरे रक्षन् जनानां व्रजं-
पश्चात् पाटलिपुत्र नाम्नि नगरे स्नेहात् पितुश्चागतः ।
रक्षन् दीनजनं निजैः सुमधुरालापै र्जनान् मोहयन्
सम्राजा वहुभिस्तदोय पुरुषैः प्रेम्णापरं प्रार्थितः ॥

६५

आयुर्वेदविचारकारि सुमहद्विद्यालयाध्यक्षतां-
यातस्तत्र निजं परं नवनवं कुर्वन् विचारं हितम् ।
कर्तव्यं भवतां सतामिदमिदं शिष्यांस्तथाध्यापकान्
स्वीयं सर्वं हितानुवन्ध्युपदिशन् शश्वद् वचोवर्तते ॥

६६

वाल्येऽप्यांगलसंस्कृताभिधवचःपारञ्च यत्प्राप्तवान्
शास्त्राण्या कलितानि यच्च मनसा स्वल्पेन कालेनच- ।
आयुर्वेदविचारणापि परमा यत्तूर्णमासादिता-
नैतच्चित्रमिदन्तु तस्यसुतयोर्विष्णुत्वमारव्यापितम् ॥

अथास्य पुत्रद्वय वर्णनम् ।

६७

पुत्रौद्वौ जनितौ प्रभाव विदितौ स्कन्दो गणेशः स्वयं-
नाम्ना च प्रथमो जगद्विलसितो नारायणान्तः श्रुतः ।
श्री नारायण संज्ञयैव विदितप्राज्यप्रकर्षोऽपरः
दैवींवाचमथापि चाङ्गलगिरं संसेवमानौ ननम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९८

ज्येष्ठः सत्कुलजां गुणैर्विलसितां रम्यां वधूमुद्वहन्
कौमारं व्रतमाचरन् तदनुजः शोभान्वितौ द्वावपि ।
रामं कृष्णमिवात्मनो गुणगणैः स्वं दर्शयन्तौ जनान्
सर्वस्यापि जनस्य शान्त हृदये सन्तौ स्वभावादिभिः ॥

९९

इत्थं सर्वगुणान्वितावनुपमौ प्राप्तौ मिथस्तुल्यतां–
सौहार्दं परमं जने च सकले सन्दर्शयन्तौ मिथः ।
स्वीयं वन्धुजनं स्वकीयगुणतः सन्तोषयन्तौ परं
जीव्यास्तां शरदां शतादपि परं हृष्टौ स्वपुत्रादिभिः ॥

अथास्य द्वितीय पत्नी वर्णनम् ।

१००

यापूर्वं विरजा नदीच यमुना कृष्णावतारे श्रिता
या गंगा निकटे गृहीत जनना नाम्ना रमासुन्दरी ।
यस्याः सन्ति सुतद्वयं च तनयास्तिस्रः शुभाङ्गा नवाः
सेयं स्वामिन माश्रिता विजयते पद्मेव नारायणम् ॥

अस्याः प्रथम पुत्र वर्णनम् ।

१०१

ज्येष्ठः श्री पुरुषोत्तमस्त्वभिधया विख्यात सद्वैभवः
किञ्चिन्न्यून गुणादिभिर्विलसितः स्वभ्रातृवर्य्यस्य च ॥
आयुर्वेद विचारकौशल युतोदीनस्य रक्षापरः
सर्वेषां हृदि वर्ततेऽनवरतं शीलस्वभावादिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०२

सोऽयं स्वीयगुणादि कृष्ट छपराप्रान्त स्थितैः प्रार्थित-
स्तेषामेव मनोऽनु रञ्जनकृते तत् प्रान्त मेवाश्रितः ।
आयुर्वेद विशालसद्मनि वसन् रद्माँश्च दीनान जनान्
पश्यन् स्वीय जनं यथा स्वसमयं हृष्टश्चिरं वर्तते ॥

१०३

शश्शच्छ्री पितृमातृ भक्ति निरतः स्वभ्रातुराज्ञाकर-
स्तेनायं निजकर्म धर्म कुशलैः पुत्रै स्त्रिभिः संयुतः ।
क्लेशंनो कलयन् सुखँश्च कलयन् सानन्द चित्तश्चिरं
सत्यं श्री पुरुषोत्तमोऽस्तिभुवने सत्यं स्वनामाश्रयन् ॥

अथास्य पुत्रत्रय वर्णनम् ।

१०४

पुत्रास्ते निज पितृ भक्ति निरताः शास्त्रं पठन्तः सुखं
नाम्नाचाद्य सुतोजयश्च विजयो मध्योऽजयश्चान्तिमः ।
आलापै र्मधुरैर्जनस्य मनसं स्वान्तं हरन्तः सुखं-
जीव्यासुः शरदांशतं सुसुखिनः सर्वस्य सन्तुष्टये ॥

अथास्य द्वितीय पुत्र वर्णनम् ।

१०५

पूर्वं भ्रातृयुगं स्वनाम विदितं नारायणांश द्वयं-
सञ्जातं बदरी वनान्नर पुरो नारायणश्चागतः ।
योवै लल्लन संज्ञयाच परया प्रोक्तस्तृतीयः सुतः
किंवद्ये गुणमस्य नाम विदितं सर्वेतिवृत्तं यतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०६

सोऽयञ्चान्त्यतयैव चाल्प वयसं प्राप्तोऽपि भाषाद्वये
बुद्धया प्रेमनिवद्ध शान्त मनसा प्राप्तः परं पाटवम् ।
श्रेयासं प्रणमन् नमन् वुधजनान् पित्रोःपदाब्जं स्तुवन्
भ्रात्रोर्भक्ति मुपाचरन् स्वहृदये हृष्यन् चिरञ्जीवतु ॥

१०७

रामप्यार्य्यपरा परा ननु शिवप्यारीच कन्या द्वयी-
पूर्णं जात करग्रहा पतिगृहे राजत्यलङ्कुर्वती ।
अन्त्यानूढ़तया स्थिता पितृगृहे योगादि मायाऽऽख्यया
व्युत्पन्नाः सुरवाचि वैद्यक वचः सारांशभाजः समाः ॥

१०८

कन्या चावरजा शुधाकृतियुता विद्यादिभिः सद्गुणैः
सावित्री च सरस्वती किमुसती लक्ष्मीः किमाद्याम्बिका ।
इत्थं सर्वजनस्य संशयकरी पित्रोः पदाब्जे नता
सौभाग्यं लभतां चिरंप्रमुदिता जीव्याच्छतं चाशिषा ॥

वैद्य राजस्य तृतीय भ्रातृ वर्णनम् ।

१०९

एतद्वर्णन नायक प्रियकरो भ्राता तृतीयः पुरा
चातुर्वैद्यु पनामयुक्त विदिताऽयोध्येति नामाक्षरः ।
प्रोक्तः सोयमनेक भाषणपटुः प्राप्त क्रिया कौशलः
शास्त्र ञ्चांगल वाच मल्प दिवसै र्भ्रातृ प्रसादाद्विदम् ॥

११०

आयुर्वेद विचारणे सुकुशलो भैषज्य सम्पादने--
रक्षायाञ्चजनस्य पाटव वशात् प्राप्तः प्रसिद्धिं पराम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्तः श्रेष्ठ जनेऽनुजे च सकले दीनेदयार्द्रः परं–
स्वान्ते सर्वजनस्य साधुनिवसन् शीलैः स्वभावादिभिः ॥

१११

भ्रातृ स्थापित पाठ सद्मनि बुधान् शिष्यान् परंमानयन्
शान्ते चेतसि सन्ततञ्च कलयन् संसारनिः सारताम ।
सर्वं वन्धुजनं तथैव सुहृदं दुःखार्णवे मज्जयन्
हाहाकारमपारमत्र जनयन् लीनः परेब्रह्मणि ॥

अथास्य पुत्र वर्णनम् ।

११२

याते तत्र रवाविव कचिदपि प्राप्तेऽन्धकारे शुचि–
प्रोद्यन् चंद्रइवापरः प्रभुपुरो नारायणः सत्वरम् ।
शोकं सर्वजनस्यमाश्वपनुदन् मोदं समुद्भावयन्–
दैवीं चांगगिरं तथैव कलयन्नायुर्वचः शीलयन् ॥

११३

रक्षन् सर्वजनं पितेव सकलं भारंवहन् भावनं
मान्यञ्च प्रणमन् निजं गुणगणं सर्वत्र विख्यापयन् ।
कार्य्ये नैपुण मार्जवञ्च जनतामादर्शयन् यत्स्थित–
स्तन मन्ये खलु कार्य कारणगतं साहाय्यमालम्बते ॥

११४

जातं तस्य सुतद्वयं गुरुजनप्रेम प्रसादोद्भवं–
भ्राजत् सूर्य पुरो लसच्छिवपुरो नामान्त नारायणम् ।
सारूप्यञ्चपरम्परागतमुरीकुर्वन्निजैः सद्गुणै–
र्भाषायुग्म मुपाश्रयाद्विजयतां सानन्दमानन्दयन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थ भ्रातृ वर्णनम् ।

११५

तुर्य्यः सोदर सञ्चयान्तपतितः सेर्वस्यच स्नेहभाक्
चातुर्वेदिपुरो विलासि मथुरामध्य प्रसादान्तिमः ।
वाल्ये संस्कृत मांगलं च वचनं स्वल्पेन कालेन च
प्रज्ञातः कलयन् परीक्षणविधौ श्रेष्ठं पदंप्राप्तवान् ॥

११६

भक्त्याच प्रणमन्पितुः पदयुगं मातुस्तथाग्रे भुवां-
मान्यान् वन्धुजनान् नमन् बुधजनान् स्नेहाद्भजन् चेतसा ।
स्वान्ते च प्रणमन् परात्मविषयं वादं वुधैराचरन्-
एवं स्वंगुणगौरवं प्रकटयन् सम्राड् जनैरर्थितः ॥

११७

न्यायाधीशपदं लभन् सुनिपुणंकुर्वन् सुनीतिं नृणां-
तत्तत्स्थानमितः समुन्नतिकृतेसर्वाः प्रजा नन्दयन् ।
सम्राजञ्च तथा तदीय पुरुषान् नीत्यैव सन्तोषयन्-
तुष्ट्या रायवहादुरेतिपदमीमासादयल्लौकिकीम् ।

११८

ज्ञानीत्वेवमलौकिकं पदमितः पूर्वंसुशान्तान्तरो-
योगक्षेमपरः कथंकथमपि स्वानां शरीरस्यच ।
त्यक्त्वा लौकिकशासनं स्वहृदये शान्ते परंभावयन्
सर्वं ब्रह्ममयं जगत् प्रकलयन् स्वान्ते ह्युदास्तेपरम् ॥

११९

मैत्रेयीमनु चक्रतुर्गुणगणैर्भार्येऽथ कात्यायनीं
कन्ये द्वे च सरस्वती प्रतिविधी शील स्वभावादिभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् सन्तान सहोदरोद्भवभवैर्युक्तश्च सांसारिकं
सौख्यं प्राप्तइव स्वयं विजयते वैराग्यमन्तः श्रितः ॥

१२०

सोऽयं स्वीयगुणैः सुनीतिलसितैः श्रामद्भिरावर्जितै-
र्भूमिंप्रस्तरमिष्टकां तृणचयं काष्ठं तथाऽन्यान्यपि ।
आदायान्तिक मागतै कतिपयैः प्रान्तस्थितैः प्रार्थितो-
निर्मायोत्तम सद्म साधुनिपुणैः सार्द्धवसन् वन्धुभि ॥

१२१

सत्कुर्वन् सुधियं धनैर्गृहगतं दीनंजनं पोषयन्
शश्वद्भावनया परात्मकथया कालंनिजं यापयन् ।
आलापैर्मधुरैः समानवयसं सम्मोहयन् सर्वदा
दर्भंगामधिराजते सुरइव प्रेमोल्लसन्मानसः ॥

अथोप संहारेण वैद्यराज वर्णनम् ।

१२२

अन्यैर्लालितपालिता वहुधनैः शश्वद्वशे च स्थिता--
ग्राम्या रासविहारि नन्दन पुरो देवादयो वान्धवाः ।
विद्यायां निरता निदेश करणेदक्षाः स्वरक्षापराः
शश्वत् पादनता प्रमोदजनकास्तिष्ठन्तु साग्रंशतम् ॥

१२३

शत्रुत्वं समुदाचरन्तिभवतां दुष्टाश्चयेवादिन--
स्तेसर्वेऽभिमुखं गता विधिवशाद् ध्वंसन्तएवात्मना ।
दृष्टैवं भुवि संस्मरन्ति च बुधा अत्रेतिहासं शुभं-
श्रौतंप्राणमुपागताः कलुषितं कर्तुं यथैवाऽसुराः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२४

ये श्रीमच्चरणार विन्द युगलध्यानैक चित्ता जनाः
पश्यन्ति प्रणमन्ति साधुपरया वाचा स्तुवन्ति द्रुतम् ।
तेसर्वे श्रियमाप्नुवन्ति परमां मोदन्त एवानिशं–
दृष्टान्ता वह्वोऽत्र दूरनिकटस्थानस्थिताः श्रीमताम् ॥

१२५

आज्ञायाः करणात् वशेच भवनात् कामाविघातादपि
प्राकाम्यञ्च वशित्वमत्र जगतामीशित्वमालोक्यते ।
मन्येभाविच पञ्चकं तदपरं शीघ्रं समक्षं नृणां–
मैश्वर्य्योदयमीश्वरः पुनरिह प्रत्यक्षमालोच्यते ॥

१२६

यत्तत्वांशसमुद्भवा वहुजनाः प्रायेण नारायणाः
सर्वे सर्व विदः प्रमाण पटवः कारुण्यरत्नाकराः ।
ब्रह्माण्डान्तरवर्तिनोऽपि भवतां मायैक सत्वाश्रिताः
श्रीमन्तं समुपासितुञ्च मिलिता ब्रह्मेति मन्येहितत् ॥

१२७

श्रीमद्विष्णु समुद्भवाः सुकृतिनः प्रायेण नारायणाः
सौम्याः सद्गुणशालिनः सुकरुणा सत्कर्मनिष्ठाः पराः ।
नैतच्चित्रमिदन्तु कार्यकरणे सारूप्यमालोक्यते–
शुक्लांशूद्भव शुक्ल तन्तुजनिता दृष्टाहिशुक्लाः पटाः ॥

१२८

यद्भीताः समुपासते च वहवस्ते कर्मकाराहरेः
कर्मस्वं स्वमिहाचरन्ति सततं शश्वन्नताः पादयोः ।
नैतच्चित्रमिदन्त्वपिश्रुतिगतं वृत्तंसमालक्ष्यते–
भीषाऽस्मात्पवतेऽनिलोऽभ्युदयते सूर्य्यश्चतद् ब्रह्मणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२९

आज्ञां मूर्ध्नि समाश्रितास्तवहरे मौला मिवश्रेयसीं–
स्वं स्वं कर्म समाचरन्ति निपुणाः सर्वेऽपि यत्तेमनाः ॥
नैतच्चित्रमिदं यदौपनिषदं त्वत्रापि संलक्ष्यते–
गार्गि ब्राह्मण वर्णितं मृदुपदं तेब्रह्मणः शास्वतम् ॥

१३०

एवंयत्र परापरत्र विषये दृष्टिर्विनिक्षिप्यते
सर्वत्रैवपरात्मता च भवतः साक्षात् समालक्ष्यते ।
ब्रह्माऽगोचर मामनन्ति मनसो बाचोऽपि वेदाःसमे
वर्ण्यं नैवमितीव सत्वरमयं मौनं समालंवते ॥

१३१

श्रीमद् वंशभवस्य वर्णनमिदं संक्षेप सारान्वितं–
पूर्णं भक्तिरसेन मोदकृतये श्रीद्भवद्ब्रह्मणः ।
श्लोकानाञ्च शतं सपादशतकं विष्णौ भवत्यर्थये
सर्वं वस्तु सपादमर्पयतिहि स्वेष्टे जनो दैवते ॥

१३२

इयंमाला स्पष्टा समजनि यदष्टाधिकशता--
सुवर्णाभावर्णाहृतहृदयकर्णा जनिमताम् ।
लसत्पद्या हृद्या सकलमनवद्या सुरुचिरा
भवत् कण्ठे श्लिष्टा भवतुच विशिष्टा चिरतरम् ॥

१३३

वहुल दल नभस्ये जीव वारे प्रशस्ये
तिथिवर शुभदर्शे पितृपीयूषवर्षे ।
रस जल निधिरामे चन्द्रयोगाभिरामे
सन इद मिह तूर्णं वर्णनं साधुपूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३४

गते स्वर्गं ताते तदनुगति मातेति विकल-
स्त्वनाथः संजातः कथमिव सनाथः प्रभवतात् ।
इतीवाऽयं येन प्रकटित दयेन प्रतिविधिः
कृतस्तस्य स्तोत्रं स्तुतसकल गोत्रंविजयताम् ॥

अथवा

१३५

गतः स्वर्गं भ्राता तदनुच जमाता विधिवशात्
ततः साध्वीपत्नी तदनुपतिवत्नी च तनया ।
द्वयीत्थं कालेऽस्मिन्नति सपदि वालेनरचिता-
सवंशश्री विष्णोस्तव तु रिपुजिष्णोः स्तुतिरियम् ॥

अथवा

१३६

पुरायुक्तो ग्रामे कनपद विराभेनिवसता
स्मृतां सद्भिर्गंगां कृतकलुषभंगां स्वजननीम् ।
मुकुन्देतिख्यातं हरिमिहतु तातंचभजता
पितृभ्यांहीनेन प्रथम इति दीनेन वयसि ॥

१३७

वरण्यं साधूनां कमपिच शरण्यं श्रितवता
चिरं वाराणस्यां परमपद काश्यांच वसता ।
समांहृद्यां गंगाधर चरण विद्यां कलयता
तथा सर्वां विद्यां जनमनसिहृद्यां रचयता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३८

महद् वन्धूद्भेदप्रभव वहुखेदन्त्व सहता
क्रियानामख्यातं हृदि सपदिभातं पदयुगम् ।
स्तुतिः प्राप्ते कालेद्रुतमति च वालेन रचिता
भवेत्सर्वानिष्ट प्रलयकृदभीष्टप्रजननी ॥

इति वंश वर्णनम् ।

रत्नाकर प्रेस मुजफ्फरपुर द्वारा मुद्रित, १०००–१९४१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धिशुद्धिपत्रम् ।

अशुद्धिः	शुद्धिः	पृ०	पं०
-वस्थामाद्य	-वस्थामासाद्य	३	६
-तस्थित-	-तत्स्थित-	६	१२
किं प्रयोजनः	किम्प्रयोजनः	११	१४
-हङ्क्कार-	-हङ्कार-	,,	१८
-मारभमाणां	-मारभ्यमाणां	१९	२०
कर	कार	२६	१४
रूपं	रूपः	२८	१२
ज्ञानान्तर्य्यं	ज्ञानानन्तर्य्यं	२९	६
वात्सायनेन	वात्स्यायनेन	३७	२१
समवत	समवेत	४६	६
वाचं	वाव	४९	४
उपासते	उपास्ते	,,	९
वाचस्पतये:	वाचस्पतयः	,,	२१
पर	पार	५५	८
हतेनसाम्	हृतैनसाम्	६२	१४
विचारयति	निवारयति	६६	१०
षाटकौशिक	षाट्कौशिक	७२	१७
स्त्र्यत्त	त्र्यत्त	७३	१९
वशिष्ठादौ	वाशिष्ठादौ	७९	७
अन्तरामा	अन्तरात्मा	८७	२४
रूप	रूपम्	८९	४
यदिच्छथ	यदीच्छथ	,,	१२
क्रियात्	कृतं	९१	२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धिः	शुद्धिः	पृ०	पं०
शीर्षः	शीर्षा	९२	१
निराकार	निराकारं	९३	२
पुरुष्टतम्	पुरुष्टुतम्	,,	८
समनकाः	समनस्काः	११२	७
सम्वित्	संवित्		यत्र तत्र
तथा नवयवत्वात्त्	तथाऽनवयवत्वात्तु	१३५	९
तन्मात्रापञ्चकाकारं	तन्मात्रपञ्चकाकारः	१३७	७
कश्चिद्रागिति	कश्चिद्द्रागिति	,,	१३
सर्वाशान्तिमितात्मनः	सर्वाशास्तमितात्मनः	१३८	१४
चुतायाः	च्युतायाः	१४०	७
याश्चितो	यच्चितो	,,	१५
अहङ्कारम्मनो—	अहङ्कारमनो—	१४१	५
असच्चा	असच्च	१४४	७
-द्दषन्मयी	-दृद्दषन्मयी	१४६	६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंशवर्णनस्थ-अशुद्धिशुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०
क्षमा	क्ष्मा	१	५	यदु	बहु	,,	११
त्रा	ल्ला	,,	१३	वि	विं	,,	,,
यैः	ये	,,	१४	णां	णा	,,	१३
व	वा	३	१२	त्का	का	१५	३
धि	धिं	४	,,	द्वि	दि	१७	५
घ्र	घ्न	५	८	श्च	च	१८	१२
वि	ति	,,	१०	स	सं	,,	२०
हि	हु	,,	१५	स्थ	स्य	१९	६
स्मिन्	स्मि	६	५	त्	न्	,,	११
त्सा	न्सा	,,	१०	तो	ता	,,	१५
दभाष	द्भाव	७	२	ला	ली	,,	२०
भा	मा	,,	१७	तस्य सुतयोः	नामविदितं	२०	१४
षां	षा	९	३	मनसं	सततं	२२	१२
य	यस्य	,,	८	स्य	स्या	,,	१४
त्स्व	न्स्व	,,	११	हाय्य	ह्स्य	२४	१५
क	का	११	६	वि	नि	२५	१८
ति	र्ति	,,	१५	भि	भिः	२६	६
द्द	दु	१२	८	त्त	त्ते	२७	१२
ष्ठान्	ष्ठा	१३	१	मनाः	जनाः	२८	२
क्त	ल्क	,,	१७	र्थं	र्पं	,,	११
क	का	१४	२				

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu